appears to be only one foreign tradition of Sun-priests in India—the Magas from eastern Iran and different names are simply designations created by different historical circumstances, and acculturations. These priests enjoyed social respect till 8th century A.D. and even in present day India they are equal citizens with equal opportunities.

To conclude and recapitulate, the Indian Sun-prients were known by various designations—Magas, Bhojakas, Yājakas, Śākadvīpīya Brāhmaṇas etc. and they came from the Śākadvīpa which may be located in Hilmand Sistan region of Afghanistan (formerly in eastern Iran). They came in three waves—the Achamenid invasion (5th-4th centuries B.C.), the Śaka-Kuṣāṇa period (Ist-2nd century A.D.) and lastly in the 6th-7th centuries A.D. as a reaction to Islamic invasion in Afghanistan. They started the tradition of the worship of the Sun-image in temples and gave new vigour and popularity to the Indian Sun-cult. They were absorbed in Hindu society as Brāhmaṇas by the 5th-6th centuries A.D. They were degraded socially after the 8th century A.D. due to many objectionable practices of the Bhojakas.[54] But at present they are integral part of the Brāhmaṇa caste in India. Thus the saga of Indian Sun-priests is full of romance, significance and mythical ecstasy.

———

54. Lindkner, Cgr., Buddhist References to old Iranian Religion, *Acta Iranica*, Leiden, 1988 (in print)

# KALPASŪTRAS IN THE PURĀṆAS

By

RAM SHANKAR BHATTACHARYA

**The name Kalpa**

The Purāṇas are found to contain a few valuable pieces of information about Kalpa or the Kalpasūtras[1] and a large number of passages about its subject matter. Commentaries of the Kalpa-sūtras are also mentioned in the Purāṇas.[2] It is needless to say that the Puranic account of the Kalpa-sūtra is based on Vedic tradition.

*Kalpa* is a masculine word. It is however rarely used in the Purāṇas in neuter (इतिहासपुराणानि छन्दः कल्पानि····श्रूयन्ते, Sk. Puruṣo-ttama. 32.29) which must be taken as an example of Puranic licence.

*Kalpa* is hardly referred to by other names. The word Veda-sūtra has undoubtedly been used for Kalpasūtra in Sk. Nāgara-khaṇḍa 129.71 (कात्यायनं सुतं प्राप्य वेदसूत्रस्य कारकम्). The commentator Śrīdhara takes *anuvāka* in the sense of Kalpasutra while commenting on Viṣṇu-p. 1.22.82 (*Anuvākāśca*.......). The meaning is doubtful; the word *anuvāka* has been used in many places in the Purāṇas and the epics,[3] but nowhere it seems to mean Kalpasūtra.

---

1. The compound word Kalpasūtra contains two words kalpa and sūtra. Kalpa means that in which the process of performing sacrifices has been conceived; sūtra means that which by using *samjñā*, *paribhāṣa* etc. supplies information about the performance of *yajña* (Tantravārttikā 1.3.11); विधानं कल्प इतिकर्तव्यता इत्यर्थः (Śabara's bhāṣya 11.2.28). कल्पः सूत्रग्रन्थः, अनुष्ठेयक्रमः कल्पः, Ānandagiri on Muṇḍaka-up. 1.1.5). On सकल्प (a name of Śiva), Nilakaṇṭha remarks : यज्ञकल्पकेन प्रयोगविधिविचारेण सहितो यीमांसान्यायसंबः (Anuśāsana-p. Ch. 17).
2. सभाष्यकल्पसूत्रैः (Sk. Puruṣottama, 17.47).
3. See Bhāgavata-p. 3.13.32: Śānti-p. 10.1; 47.26.

**Kalpa—one of the Vedāṅgas**

In the Puranic passages enumerating the six *aṅgas* (accessories) of the Vedas, Kalpa is invariably mentioned. It is remarkable to note that the name is read in the second place,[4] which is evidently in accordance with Vedic tradition (see Muṇḍaka Up. 1.1.5 : शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति).

From Nāradīya 1.51.8 it appears that each śākhā of the Vedas has its own Kalpasūtra.[5]

The Viṣṇudharmottara identifies six deities with the six *aṅgas*. It identifies Kalpa with Brahmā, the creator (कल्पो ब्रह्मा प्रकीर्तितः, 3.73.44).

**Closer relation of the Kalpasūtras with the Vedas**

Though the Kalpa is regarded as one of the six *aṅgas* of Veda yet the Puranic statements enumerating Kalpa separately from other *aṅgas*[6] undoubtedly show that Kalpa is more elosely connected with the Vedas than the other *aṅgas*. Expressions like मन्त्र-ब्राह्मण-कल्पैः (Vāyu-p. 59.138) also show a closer connection of Kalpa with the Veda.

The peculiar connection of the Śrautasūtra (one of the three subdivision of Kalpa) with the Vedas seems to be the basis of this closer connection. It is wellknown that (i) the Śrautasūtras have

---

4. शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा। छन्दः शास्त्रं षडेतानि वेदाङ्गानि विदुर्बुधाः ॥ (Nāradīya-p. 1.50.10); शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषं षडङ्गानि भवन्त्येके (Devī-p. 107.24-25); शिक्षा कल्पो व्याकरणं निरुक्तं छन्द एव च।. ज्योतिषं चापरा विद्या (Liṅga-p. 1.85. 52b-53a); शिक्षा कल्पो व्याकरणं निरुक्तं छन्द एव च। ज्योतिःशास्त्रं न्यायविद्या सर्वेषामुपबृंहणम् ॥ (Kūrma-p. 1.2.266). See also Agni-p. 1.15b-16a Here six *aṅgas* are mentioned along with Mīmāṁsā and other *vidyās*.
5. कल्पसूत्राण्यपि प्रतिशाखं शाखान्तराधीतेन न्यायप्रासरूपेण च अङ्गेनोपेतस्य प्रतिपन्नस्य कर्मणः प्रतिपादनेन········(Skanda on Nirukta, p. 3).
6. कल्पसूत्रमतः परम्। वेदाङ्गानि·······(Saura-p. 26.5-6); एकां शाखां सकल्पांश्च षड्भिरङ्गैरधीत्य च (Sk. Kumārikā 5.114).

a high position in the eyes of the *yājñikas*; and that (ii) the Śrautasūtras are in conformity with thc Brāhmaṇa works (one of the two portions of the Vedas) so far as the sacrificial acts are concerned. The word Śrauta used in the name Śrautasūtra also shows its closer connection with the Vedas.[7]

**Is Kalpa one of the materials of the original Pnrāṇa-saṁhitā ?**

While speaking the composition of a Purāṇa-saṁhitā by Vyāsa, the Viṣṇu-p. declares :

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥

(3.6.16; see also Vāyu-p. 60.21 and Brahmāṇḍa-p. 1.34.21).

The verse says that like *ākhyānas*, *upākhyānas* and *gāthās*, *Kalpaśuddhīs* were also incorporated by Vyāsa while composing the original Purāṇa-saṁhitā. *Kalpaśuddhi* may be taken to mean the religious matter (rites and customs) described in the Purāṇas. Since the use of the word *śuddhi* has no relevance, the import of the word is doubtful. Śrīdhara's explanation of कल्पशुद्धि as वाराहादि-कल्पनिर्णय does not seem to be correct. The reading कल्पजोक्ति in Brahmāṇḍa-p. 1.34.21 is also not quite happy.

The Vāyu-p. (60-21) has the reading कुलकर्मभिः which does not suit here, for *karmans* may properly be included in the first three elements. It is interesting to note that Jīvagosvāmin reads द्विजसत्तमाः (a word in the vocative case) in the place of Kalpaśuddhibhiḥ while quoting the Vāyu-verse in his Tattvasandarbha (p. 25).

---

7. The closer connection of *kalpa* with the Vedas may be known from other authoritative works also. The Kalpasūtra-adhikaraṇa of Pūrvamīmāṁsā (1.3.11-14) refers to the Śrauta-sūtras only. Yāska's remark त्रिधा बद्धो मन्त्रब्राह्मणकल्पैः (Nirukta 13.7) undoubtedly shows a closer connection of Kalpa with the Veda. Kalpa is referred to by the word छन्दःकल्प in Āpastamba Dharmasūtra 2.4.10. The use of the word Chandas with Kalpa is significant and deserves to be considered in this connection.

Since both the reading and the meaning are doubtful it is better not to consider the aforesaid verse seriously at the time of discussing what the Purāṇas have to say about the Kalpasūtras.

**Purpose and nature of Kalpa**

From Puranic statements it appears that the purpose of Kalpa is to enable a person to perform Vedic acts easily without any doubt about the order of acts, etc.[8]

The assertion that the five *kalpas* of the Atharvaveda (namely Nakṣatrakalpa etc.) are helpful to the *purohitas*[9] also shows the purpose of Kalpa.

The nature of the Kalpasūtra has been shown in Viṣṇudharmottara-p. 3.17.1 as follows :

मन्त्राः सब्राह्मणाः प्रोक्तास्तदर्थं ब्राह्मणं स्मृतम् ।
कल्पना च तथा कल्पाः कल्पश्च ब्रह्मणस्तथा ॥

Though the reading of the second half seems to be slighly corrupt and as such the meaning of the verse cannot be determined fully, yet we can take it to mean that the purpose of the Kalpasūtra is to describe Vedic acts[10] in such a way that there will arise no doubt at the time of performing the acts so far as the procedure is concerned.

The role of the Kalpasūtra is clearly stated in D. Bhāg. 5.22.4.[11] The expression संलक्षित shows the characteristic of these sūtras.

**Division of Kalpasūtra**

There is no express mention in the Purāṇas that the Kalpasūtras have three branches, namely Śrauta, Gṛhya and Dharma.

---

8. अथातः संप्रवक्ष्यामि कल्पग्रन्थं मुनीश्वराः ।
यस्य विज्ञानमात्रेण स्यात् कर्मकुशलो नरः ॥ (Nāradīya-p. 1.51.1).
9. Viṣṇudharmottara-p. 2.5.3b.
10. Cp. कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्
(Vargadvayavṛtti, p. 3).
11. उपचारपरा नूनं वेदमन्त्राः सहस्रशः ।
वाञ्छितार्थकरा नूनं सूत्रैः संलक्षिताः किल ॥ (D. Bhāg. 5.22.4).

They are however mentioned in many places of Purāṇas.[12]

Gṛhya-sūtras are often referred to in the Purāṇas. The popularity of gṛhya rites seems to be the reason for the frequent mention[13] of Gṛhyasūtras in the Purāṇas. Sometimes the word *sūtra* even refers to a gṛhya-sūtra ; see Śiva-p. 1.20 2 (सूत्रोक्तविधिना स्नात्वा....).

The Purāṇas sometimes use the word *svagṛhya*[14] instead of *gṛhya* only. The adding of *sva* before *gṛhya* is significant. It is used to indicate that one should follow one's own Gṛhyasūtra (i. e. the Gṛhyasūtra which was followed by his ancestors). It is expressly stated in the Purāṇas that since one who rejects his own *sūtra* becomes associated with demerit, one should not disregard one's own *sūtra*.[15]

**The five kalpas of Atharvaveda**

A few Purāṇas speak of five *kalpas*, namely Nakṣatrakalpa, Vedakalpa or Vaitānakalpa, Sāṁhitā-kalpa, Āṅgirasa-kalpa and

---

12. मया श्रौतानि कर्माणि कुर्वता (Padma-p. 4.94.86). Padma-p. 6. 280.54-56 speak of श्रौत, स्मार्त and आगमोक्त अर्चन in the forms of वैखानस, वासिष्ठ and पाञ्चरात्र respectively. Most probably Smārta Vāsiṣṭha is the same as the Vasiṣṭha-dharma-sūtra. The expression dharmaśāstra in the verse मन्वत्रिविष्णुहारीत ........धर्मशास्त्रप्रयोजकाः (Bṛ. Dh. P. 1.29.24-25) refers to the Dharma-sūtras as well as the Smṛtis composed by the sages mentioned here.

13. गृह्यकारेण (Kūrma-p. 1.3.84); स्वगृह्योक्तविधानेन (Padma-p. 4. 104.27; Bhaviṣya-p. 2.2.19.181; Sk. Veṅkaṭācala 6.55; Sk. Mārgaśīrṣa 12.54; स्वस्वगृह्योक्तक्रमेण (Devībhāg. 12.7.15).

14. स्वगृह्यचोदितं कर्म (Bṛ. Nār. 22.10); स्वगृह्योक्तविधानतः (Bṛ. Nār. 26.50).

15. यः स्वसूत्रमतिक्रम्य परसूत्रेण वर्तते ।। अप्रमाणं मृषिं कृत्वा सोऽप्यधर्मेण युज्यते । तस्मात् सर्वप्रयत्नेन स्वसूत्रं न विलङ्घयेत् ।। (V. Dh. U. 2. 127. 48b-49), The word *sūtra* in this and similar verses chiefly refers to Gṛhya *Sūtra*. Sūtra in similar verses may refer to any of the branches of Kalpasūtra according to the nature of context.

Śāntikalpa and connect them with the Atharvaveda[16] or with a *purohita* well-versed in the Atharvaveda. The Nāgarakhaṇḍa of the Skanda-p. reads कल्पोक्तानि चतुर्थे च (278.109). *Caturtha* refers to the Atharvaveda and as such this statement also connects the *kalpas* with the Atharvaveda.

It is curious to note that the Bhāgavata-p. takes the words Nakṣatrakalpa, Śānti, Kaśyapa, Āṅgirasa and others as the names of the authors of the five Kalpas (12.7.4). This process of referring to names is hardly found elsewhere. The commentator Śrīdhara simply remarks that the authors of the Kalpas are called by the names of the Kalpas (नक्षत्रकल्पादीनां कर्तारः तत्तन्नामभिरुच्यन्ते). The respective subjects of these *kalpas* have been stated in Nāradīya-p. 1.52.3-7.[17]

---

16. नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः। (Viṣṇu-p. 3.6.14b-15a). This is found in Nāradīya-p. 1.52.2 also. नक्षत्रकल्पो वैतान स्तृतीयः संहिताविधिः ॥ चतुर्थोऽङ्गिरसः कल्पः शान्तिकल्पश्च पञ्चमः। (Viṣṇudharmottara-p. 2. 5. 3b-4a; Vāyu-p, 61. 53b-54a; Brahmāṇḍa-p. 1. 33. 61b-62a); नक्षत्रकल्पो वैतानश्च संहिताविधिराङ्गिरसः। शान्तिकल्पश्च पञ्चैते अथर्वस्य भवन्ति हि ॥ (Devī-p. 107. 45; Mark the use of the word Atharva ending in *a*. which is used in other Purāṇas also; See Padma-p. 5. 31. 43; Viṣṇu-p. 5. 1. 36; अथर्वशब्दोऽकारान्तो नान्तश्च, Nārāyaṇa's sub-comm. on Muṇḍaka-up, 1. 1. 1. Authorship of the verse नक्षत्रकल्पो........ is attributed to Upavarṣa by Sāyaṇa in the introductory part of his bhāṣya on the Atharvaveda.

17. नक्षत्राधीश्वराख्यातं विस्तरेण यथातथम् ।
नक्षत्रकल्पे निर्दिष्टं ज्ञातव्यं तदिहापि च ॥ ३
वेदकल्पे विधानं च ऋगादीनां मुनीश्वर ।
धर्मार्थकाममोक्षाणां सिद्ध्यै प्रोक्तं सविस्तरम् ॥ ४
मन्त्राणामृषयश्चैव छन्दांस्यथ च देवताः ।
निर्दिष्टाः संहिताकल्पे मुनिभिस्तत्त्वदर्शिभिः ॥ ५
तथैवाङ्गिरसे कल्पे षट् कर्माणि सविस्तरम् ।
अभिचारविधानेन निर्दिष्टानि स्वयंभुवा ॥ ६
शान्तिकल्पे तु दिव्यानां भौमानां मुनिसत्तम ।
तथान्तरिक्षोत्पातानां शान्तयो ह्युदिताः पृथक् ॥ ७

As to why these *kalpas* belong to the Atharvaveda only and not to any other Veda is a matter of grave consideration. These *kalpas* are found to have no connection with Śrauta rites; on the other hand they seem to be connected with secular results. This may be one of the reasons for connecting these *kalpas* with the Atharvaveda only

It is said in the Nāgarakhaṇḍa of the Skanda-p. that in olden times there were 100 Kalpas of the Atharvaveda and that it was Pippalāda who reduced the number of Kalpas into five.[18] This seems to indicate grave changes that occurred in the composition of the Atharvaveda from time to time.

**Authorship of Kalpasūtras**

The word *kalpakāra* used in the Purāṇas (Sk. Puruṣottama 17.54 etc. ) means the auother of a Kalpasūtra. About the authorship of the Kalpasūtra the Purāṇas assert that the *ṛṣiputras* are the *pravaktṛs* i. e. authors of Kalpasūtras : ऋषिपुत्राः प्रवक्तारः कल्पानां

In his bhāṣya on the Atharvaveda (Śaunaka recension) Sāyaṇa has given a precise account of the matters dealt-with in these five Kalpas : तत्र साकल्येन संहितामन्त्राणां शान्तिक-पौष्टिकादिकर्मसु विनियोगविधानात् **संहिताविधि** र्नाम कौशिकं सूत्रम्.... तथा **वैतानसूत्रे** दर्शपूर्णमासादिषु अयनान्तेषु त्रयीविदितकर्मसु ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः पोतेति चतुर्णाम् ऋत्विजां कर्तव्यं प्रतिपाद्यते.... **नक्षत्रकल्पे**ऽपि प्रथमं कृत्तिकादिनक्षत्रपूजाहोमादि । ततोऽद्भुतमहाशान्तिः, नैरृतकर्म,अमृताद्या अभयान्तास्त्रिंशन्महाशान्तयो निमित्तभेदेन प्रतिपादिताः । ........तथाऽङ्गिरसकल्पे अभिचारकर्मादौ कर्तृकारयितृसदस्यानां स्वात्म-रक्षाकरणम्........ । **शान्तिकल्पे**ऽपि प्रथमं वैनायकग्रहगृहीतलक्षणानि । तच्छान्तये संभाराहरणम्....... ।

18. एष [पिप्पलादः] चाथर्वणं वेदं शतकल्पं सविस्तरम् । शतभेदं च नवधा पञ्चकल्पं करिष्यति ॥ पिप्पलादतरोरेष रसं संभक्षयिष्यति । पिप्पलाद इति ख्यातस्ततो लोके भविष्यति ॥ (Sk. Nāgarakhaṇḍa 174. 23-24); अथर्ववेदो यश्चैष शतशाखो विनिर्मितः । शतकल्पश्च गूढार्थो भूपानां कार्यसिद्धये ॥ नवशाखः पञ्चकल्प स्त्वया कार्यः सुखावहः । (Nāgarakhaṇḍa 174. 50-51a); see also Revākhaṇḍa Ch. 42 and Brahma-p. 48.23.

ब्राह्मणस्य तु[19] (Brahmāṇḍa-p. 1.33.22). The word *ṛṣiputrāḥ* is to be taken not in the literal meaning of 'the sons of *ṛṣis*' but in the sense of 'तत्पुत्रपौत्रनप्तारः' (See Āryavidyāsudhākara p. 29-30). The *ṛṣiputras* are said to have composed new Vedic recensions from earlier saṁhitās by making various kinds of changes.[20] All these tend to show that persons belonging to the same tradition composed the Vedic as well as the Sūtra works.

**Authors of Kalpasūtras**

Though the Purāṇas contain names of the authors of Vedic Saṁhitās in their chapters on *Veda-Śākhā-vibhāga*[21] yet they have no chapter showing the names of the authors of Kalpasūtras. Sometimes the Purāṇas refer to the authors of the Kalpasūtras indirectly. As for example in connection with the birth of the Maruts Āpastamba is said to perform the *putreṣṭi* sacrifice (Matsya-p. 7.33-34). This may be taken as referring to the Āpastamba Śrautasūtra known to the author of the Matsya-p.

Kātyāyana is said to be the author of a Śrautasūtra in the Nāgarakhaṇḍa of the Skanda-p (कात्यायनाभिधानं च वेदसूत्रस्य कारकम्, 129.71). Kātyāyana was the son of Yājñavalkya and Kātyāyanī (130.3),[22] It undoubtedly refers to the extant Kātyāyana Śrautasūtra. The Purāṇa further informs us that he was well-versed in sacrificial acts and that he had a son Vararuci by name (कात्यायनाभिधानं च यज्ञविद्याविचक्षणम् । पुत्रो वररुचिर्यस्य, 131.49-49).

---

19. It is to be noted that while Kalpa is used in plural number, Brāhmaṇa is used in singular number—an anomaly which requires to be solved. A similar anomaly is found in the passage ब्राह्मणं कल्पसूत्राणि मन्त्रप्रवचनानि च found in several Purāṇas (see footnote no. 23).

20. ऋषिपुत्रैः पुनर्वेदा भिद्यन्ते दृष्टिविभ्रमैः । मन्त्रब्राह्मणविन्यासैः स्वरवर्णविपर्ययैः ॥ This with other relevant verses are found in Vāyu-p. 58. 10-18; Brahmāṇḍa-p. 1. 31. 10-18; Kūrma-p. 1. 29. 43-44; Liṅga-p. 1. 39. 57-60; Matsya-p. 144. 10-13.

21. Viṣṇu-p. 3. 4-6; Vāya-p. 60-61; Brahmāṇḍa-p. 1. 34-35, Bhāgavata-p. 12. 6-7; Agni-p. 271. 1-10.

22. Cf. अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः, मैत्रेयी च कात्यायनी च........ (Bṛ, Up. 4. 5. 1).

**Time of the composition of the Kalpa-sūtras**

It appears that the authors of the Purāṇas were aware of the fact that the Kalpasūtras were composed long after the composition of the Vedic Saṁhitās. That is why they emphatically declared that the Brāhmaṇas, the Kalpasūtras etc. were composed in the Dvāparayuga[23] (the third *yūga*, Satya and Tretā being the first and second *yugas*).

**Kalpasūtra passages cited or referred to in the Purāṇas**

The Purāṇas hardly cite Kalpasūtra passages properly. The Kumārikākhaṇḍa of the Skandapurāṇa cite two passages from the Kalpasūtras which are given below :

1. तथाहि गृह्यकारेण श्रुतौ प्रोक्तमिदं वचः ।
   नकुलं सकुलं ब्रूयान् न कंचिन्मर्मणि स्पृशेत् ॥[24]
   (13.84b-85a).

2. अनृताः हि स्त्रियः सर्वाः सूत्रकारो यदब्रवीत्[25]
   (6.110).

3. There are Puranic passages which seem to be based on some Gṛhyasūtra though the name of the Gṛhyasūtra has not been mentioned in the Purāṇas. A clear example of such passages is found in Devībhāgavata 11.20.19b-29a.[26] The passage is evident-

---

23. ब्राह्मणं कल्पसूत्राणि मन्त्रप्रवचनानि च (Vāyu-p. 58. 14; Liṅga-p. 1. 39. 60; Brahmāṇḍa-p. 1. 31. 14; Matsya-p. 144.13 (भाष्यविद्यास्तथैव च in the place of मन्त्रप्रवचनानि च); Kūrma-p. 1. 29. 46 (ब्रह्मप्रवचनानि च in the place of मन्त्रप्रवचनानि च).

24 Here *Gṛhyakāra* seems to be the author of the Pāraskara gṛhya-sūtra; cp. सकुलमिति नकुलम् (2. 7. 11). The statement न कंचिन् मर्मणि स्पृशेत् seems to be based on Pār. Gṛ. Sū. 2. 7. 18 (दृढव्रतो....मित्रमिव).

25. It is difficult to identify the Sūtrakāra. It may refer to Baudhāyana-dharma-sūtra 2. 2. 53 (निरिन्द्रिया ह्यदायाश्च स्त्रियोऽनृतमिति श्रुतिः); See also Manu. 9. 18 (निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः).

26. प्राचीनावीतिना तच्च कर्तव्यमथ तर्पणम् ॥ १९
सुमन्तुजैमिनिर्वैशम्पायनः पैलसूत्रयुक् ।
भाष्यभारतपूर्वं च महाभारत इत्यपि ॥ २०

ly based on Āśvalāyanagṛhyasūtra 3.4.3-4. (प्राचीनावीतितीं........ सर्वेतृष्यन्त्विति).

Almost all of the *karmans* of the Gṛhyasūtras and a host of *yajñas* of the Śrautasūtras are found to have been mentioned in the Purāṇas by using the expressions गृह्य, गृह्याग्नि, गृह्योक्त, कल्पसूत्र, कल्पोक्त, सूत्र etc. In many places these *karmans* are described in a general way in the Purāṇas (Cp. एषा सर्वपुराणेषु सामान्या पैतृकी क्रिया, Varāha-p. 14-51). The Puranic way of describing these *karmans* will be elaborately dealt with in a separate article in the future.

————

धर्माचार्या इमे सर्वे तृप्यन्त्विति च कीर्तयेत् ।
जानन्ति-बाहवि-गार्ग्य-गौतमाश्चैव शाकलः ।। २१
ब्राभ्रव्य-माण्डव्ययुतो माण्डूकेयस्ततः परम् ।
गार्गी वाचक्नवी चैव वडवा प्रातिथेयिका ।। २२
सुलभायुक्तमैत्रेयी कहोलश्च ततः परम् ।
कौषीतकं महाकौषीतकं वै तर्पयेत् ततः ।। २३
भारद्वाजं च पैङ्ग्यं च महापैङ्ग्यं सुयज्ञकम् ।
साङ्ख्यायनमैतरेयं महैतरेयमेव च ।। २४
बाष्कलं शाकलं चैव सुजातवक्त्रमेव च ।
औदवाहिं च सौजामिं शौनकं चाश्वलायनम् ।। २५
ये चान्ये सर्व आचार्यास्ते सर्वे तृप्तिमाप्नुयुः ।
Readings in the Purāṇa may be corrected with the help of the Gṛhyasūtra.

## SUMMARY

## ŚAṄKARA'S DISCUSSION OF ŚAKTITATTVA

## आचार्यशंकरस्य शक्तितत्त्वविमर्शः

बलदेव उपाध्यायः

Śaṅkara was an exponent not only of Advaita-vedānta but also of Tantra. Śaṅkara's works on both these Śāstras are regarded as highly authoritative. In fact the blend of Nigama (Veda) and Āgama (Tantra) is the real basis of Indian culture.

Āgamas have their basis in the Veda as may be known from some of the Vedic passages (quoted here with explanation). The goddess Aruṇā of the Tai. Ār. has been eulogized in the Saundarya-laharī of Śaṅkara.

In later times the five āgamas called Śubhāgama-pañcaka by Vasiṣṭha and others were looked as highly authoritative and were quoted in various works of Tāntrika schools.

Gauḍapāda, the teacher of the teacher of Śaṅkara was a great exponent of Tantra. His works Śrīvidyāratnasūtra and Subhagodayastuti are wellknown treatises on Tantra. Śaṅkara commented on the former.

Śaṅkara's Prapañcasāra (based on Prapañcāgama) and Saundaryalaharī are the two standard works on Tantra. The former was commented by Padmapāda, one of the direct disciples of Śaṅkara. Śaṅkara's authorship of Prapañcasāra has been accepted by Sāyaṇa and others. His Saundaryalaharī follows the views of the Subhagodayastuti. Śrīvidyā and Lalitāmba are found to have been described in the Saundaryalaharī. The Devībhāgavata also speaks of Lalitāmbā with Hṛllekhā. In the comm. on Lalitātri-śatī Śaṅkara explains the *mantra* of Hṛllekhā.

In Saundaryalaharī Śaṅkara showed superiority of Śakti—a view found in the Subhagodayastuti. The function of Śakti has been expressly stated in Śaṅkara's bhāṣya on the Brahma-sūtra.

According to Śaṅkara, brahman (ultimate cause) is not absolutely bereft of *śakti*. Śaṅkara asserts that the word *śəkti* may be used to denote *parabrahman*—in fact *śakti* and *brahman* are identical.

The word *samayā* has been used by Śaṅkara for Devī Bhagavatī and *samaya* for Śiva. Functions of both have been described in Saundaryalahari 41. There is *sāmya* between Śiva and Devī, which is said to be of five kinds. The followers of samayācāra perform internal worship while the followers of kaulācāra perform external worship.

The goddess worshipped by Śaṅkara is called by such names as Lalitā, Tripurā, Tripurasundarī, Ṣoḍaśī and others. The *mantra* of the goddess has been given in Prapañcasāra.

There were twelve exponents (or sects) of Śrīvidyā, namely Manu etc. Now-a-days only two sects are extant Lopāmudrā (follower of *Hādividyā*) and Manmatha (follower of *Kādividyā*). The sect founded by Durvāsas has become extinct; two works of Durvāsas however are in existence; namely (i) Śaktimahimanaḥ-stava and (ii) Paraśurāma-mahimnaḥstava. *Śrīvidyā* of the Tāntrikas is the same as *brahmavıdyā* of the vaidikas. The worshippers of Śrīvidyā experience both *bhoga* and *mokṣa*.

———

## ACTIVITIES OF THE ALL-INDIA KASHIRAJ TRUST

( January 1989-June 1989 )

### Garuḍa Purāṇa

During the period the constitution of the Text of the Ācārakāṇḍa is completed. Some complicated readings are yet to be decided and editor Dr. Gangadharan is engaged in finalising those readings. The Critical Apparatus upto chapter 75 is completed. The writing of the Critical Apparatus of further chapters is continuing.

### Critical edition of the Mānasa Khaṇḍa

Text of the further ten chapters has been constituted and thn text up to chapter 90 is printed herewith.

### Śivadharma And Śivadharmottara Purāṇas

Comparision of some manuscripts is done for the collation of the Text.

### Veda-Pārāyaṇa.

The text of Taittiriya Śākhā was recited for five days in the Vyāsa Temple of Fort Ramnagar. The recitation was made by vaidika-pravara Sri Dendukuri Venkat Subrahmanya Somayaji and Śrotā was Pt, Ganeshwara Dravid. The recitation was done from 11th Tithi of bright half of the month Māgha upto Pūrnimā tithi of the same month (Feb. 16-20, 1989). On the conclusion of Pārāyaṇa usual Dākṣiṇā and certificate were given.

### Visitors to Purāṇa Department

During the period the following scholars put their signature in the visitors book.

1. Sri Narendra Kumar, Ranchi, Bihar.
2. Dr. Parolo
   Dept. of Linguisties, Catholic University, Milan, Italy.
3. Sri Avinash Tripathi, Research Scholar B. H. U.

## ACTIVITIES OF THE SISTER TRUSTS

## (1) MAHARAJA BENARAS VIDYA MANDIR TRUST

### Dhrupad Mela

The 1989 Dhrupad Mela was the 15th consecutive annual. This was held on the 4th, 5th and 6th of March. The Festival organized by the Maharaja Benaras Vidya Mandir Trust at Tulsi Ghat, Varanasi was inaugurated by Dr. Raghunath Singh. Also present on the dais in the 1st day were Mahant Prof. Veerbhadra Mishra, Dr. Rajeshwar Acharya & Pt. Batukanth Sharma. They all emphasized the importance of Dhrupad and the role of Kashi in continnuing the propagation of this rich musical tradition on different levels of musical activities.

On the 6th of March, the Shivaratri day, the 4th Dhrupad Annual was released by the Commisioner Rajiv Ratan Shah and the occasion was graced by eminent singers Ustad Rahim Fahimuddln Dagar, Ustad Sayeeduddin Dagar and Swami Pagaldas. Swami Pagaldas was the recipient of the Swati Tirunal Cash prize awarded to him on the very same day. Prof. Veerbhadra Mishra made all the arrangements faultlessly.

Almost all the eminent musicians from all over the country gave their performance all the three evenings.

### Mangalotsava

This Trust organised Mangalotsava this year on 28-30 March 1989. Artists of repute from Varanasi city and the Benaras Hindu University participated in the Programme for three days. A good number of officials and dignitaries attended the function. Both types of music, vocal and instrumental, were performed on three days.

## MAHARAJA UDIT NARAIN SINGH MANASA PRACHARA NIDHI

### Navāha Pārāyaṇa of Rāmacarita Mānasa In Chakia

The Navāha Pārāyaṇa (Recitation for nine days) of the Rāmcarita Mānasa was organised by the Trust in the Kali Temple at Chakia in Vaiśākha Sukla Pakṣa (9th May to 15th May 1989).

The Pārāyaṇa (recitation) was held in the morning and discourses were given in the evening. Sri Shambhu Nath Ji, Sri Vasudevacarya and a Vyasa from Ayodhya gave discourses in the evenings. A large number of devotees daily heard the discourses. On the conclusion of the Pārāyaṇa a *Bhaṇḍārā* (Feast for the Saints) was organised and Prasad was distribited. His Highness Maharaja Dr. Vibhuti Narain Singh was present in all the Pravacanas (discoures) in the evening.

———

# पुराणम्

(भागः-३१; अङ्कः-२)

# PURĀṆA

(Vol. XXXI. 2)

# संस्कृत–खण्डः

संस्कृतविद्वांसोऽभ्यर्थ्यन्ते यत्ते पुराणपत्रिकायां प्रकाशनार्थम् (१) पुराणगत-दर्शनशास्त्र-धर्मशास्त्रादि-विषयपरान् लेखान्, (२) पुराणोक्त-दुरूहार्थकास्पष्टार्थकवचनव्याख्यापरान् लेखांश्च प्रेषयेयुरिति ।

# आचार्यशङ्करस्य शक्तितत्त्वविमर्शः

लेखकः

**पद्मभूषण-आचार्यो बलदेव उपाध्यायः**

[ वर्षेऽस्मिन् भगवत्पादानां शंकराचार्याणां द्वादशजन्मशताब्दीमहोत्सवो महता वैभवेनास्मद्देशेऽनुष्ठीयते। अस्माभिरपि आचार्यपादस्मरणार्थम् प्रख्यातयशसा पण्डितप्रकाण्डेन बलदेवोपाध्यायेन विरचितः आचार्यचरणमतविषयकः कश्चिन् निबन्धोऽत्र प्रकाश्यते। आचार्यपादमतस्य पुराणानुसारिता लेखेऽस्मिन् स्फुटं प्रतिपादिता।

आचार्यपादानामुल्लेखः पुराणेऽपि दृश्यते। शिवरहस्यस्य नवमांशे षोडशेऽध्याये, कूर्मपुराणस्य पूर्वविभागे त्रिंशत्तमाध्याये विस्तरेण समासेन च यथाक्रमम् आचार्यचरितमुपवर्णितम् इति विज्ञेयम्। —सम्पादकः ]

परिव्राजकाचार्यः शङ्कराचार्योऽद्वैतवेदान्तस्य सूक्ष्मविवेचको महनीयालोचकश्च बभूव। तन्त्रशास्त्रेऽपि तथैवाभूत् अन्तरालोडननिष्णातस्तन्त्रविद्याविचक्षणो मनीषिवरेण्यः। यथाऽद्वैतवेदान्तस्येतिहासे तद्रचिता ग्रन्था नितान्तं प्रामाणिकतां प्रख्यातिं च भजन्ते, तथैव शाक्ततन्त्रान्तर्गतत्रिपुरासम्प्रदायेऽपि तन्निबद्धा ग्रन्था गाम्भीर्यं प्रामाण्यं च समश्नुवते। सन्ति केचन पण्डिताः ये निगमात् (वेदात्) आगमस्य (तन्त्रस्य) भृशं पार्थक्यं मन्वाना उद्घोषयन्ति स्वीयं मतम्, परन्तु निगमानाम् आगमानां च मञ्जुलसामरस्यमेव भारतीयसंस्कृतेः धर्मस्य च मूलाधारतामुपेत्य विद्योतते नितरामिति ते अनवधानेन विस्मरन्ति। आगमानां मूलान्वेषणेन निगमानां किमपि सातिशय आश्चर्यकरः संकेतो नैवाश्चर्यं प्रसूते इति तु नितान्तं तथ्यम्।

**श्रीविद्यायाः वैदिकं मूलम्**

शास्त्रीयग्रन्थेषु आगमस्य निगममूलत्वं सर्वथा समुद्घोष्यते। तस्याः प्राक्तनं संकेतं वैदिकग्रन्थाः बहुषु स्थलेषु स्पष्टाक्षरैः स्वीकुर्वन्ति। तथा च ऋग्वेदीयो मन्त्र एष प्रमाणतयात्रोपन्यस्यते—

चत्वारि ईं बिभ्रति क्षेमयन्तो
दश गर्भं चरसे धापयन्ते।
त्रिधातवः परमा अस्य गावो
दिवश्चरन्ति परि सद्यो अन्तान्॥—ऋग्वेदे ५।४७।४

सायणाचार्येण मन्त्रस्यास्य आधिदैविकं तात्पर्यं सूर्यपरतया निर्दिष्टं स्वीये भाष्ये, परन्तु आदौ वर्तमाना पदद्वयी श्रीविद्यामपि स्पष्टतया संकेतयते। सौन्दर्यलहर्याः टीकाकारो लक्ष्मीधरः स्वीयव्याख्यायामित्थं प्रमाणयति—

षोडशकलात्मकस्य श्रीबीजस्य गुरुसम्प्रदायवशाद् विज्ञेयस्य स्थितत्वात् चतुर्णामीकाराणां सिद्धेः मूलविद्याया वेदस्थितत्वं सिद्धम् (पञ्चमपद्यस्य व्याख्यायाम्)

तैत्तिरीयसंहितायां, तैत्तिरीयब्राह्मणे, आरण्यके च विद्यते पूर्वोक्ततथ्यस्य पोषकाणां प्रमाणानां प्रचुरः सद्भावः। तथा च तैत्तिरीये आरण्यके (प्रश्न १-२९) उपलब्धा **अरुणोपनिषद्** 'अरुणा'ऽभिधेयाया भगवत्या माहात्म्यं कार्यकलापं च स्पष्टतो वर्णयति। अस्या उपनिषदः द्रष्टा विद्यते अरुणकेतुनामा वैदिक ऋषि-प्रवरः। एषा अरुणाभिधेया भगवती भगवता शङ्कराचार्येण स्वसौन्दर्यलहरीनाम्नि स्तोत्रे वर्ण्यते रमणीयेण पद्येनामुना[1]—

अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे।
भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये
जगत् त्रातुं शम्भोर्जयति करुणा काचिदरुणा॥
(सौन्दर्यलहरी, ९३ पद्यम्)

आरण्यकवर्णनेन साकं शङ्कराचार्याणां वर्णनं सर्वथा साम्यमुपैति। भगवत्याः चरणयुगलान्तराले प्रवहन्त्या सुधाधाराया विषये तैत्तिरीयब्राह्मणस्य (३।१२।३) मन्त्रेणानेन समता काप्यवश्यं परीक्षणीया :—

लोकस्य द्वारमर्चिमत् पवित्रं ज्योतिष्मत् भ्राजमानं महस्वत्।
अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितान् दधातु॥

दर्शाद्यानां पूर्णिमान्तानां तिथीनां विषये परीक्ष्येतां काठकब्राह्मणस्य 'इयं वाव सुरथा' इत्यनुवाकः, तैत्तिरीयब्राह्मणस्थ (३।१०।१) 'संज्ञानं विज्ञानं चेति मन्त्रश्च। एषा तु सामान्यतो निर्दिष्टा सूचनिकैव, विस्तरस्तु सौन्दर्यलहर्याः व्याख्याकर्तुः लक्ष्मीधरस्य व्याख्यात एवानुसन्धेय इति।

वैदिकग्रन्थेषु विहितोऽयं तान्त्रिकतत्त्वसंकेतो गच्छता कालेन वैविध्यमापेदे। धारा चेयं शनैः शनैः प्रवहमाना कमपि प्रकर्षं समासादितवती। अस्मिन्नेव युगे '**शुभागमपञ्चकनामकं** पञ्चभिर्महर्षिभिः प्रणीतं ग्रन्थपञ्चकं तन्त्रग्रन्थेषु

---

१. अरुणाख्य-भगवतीविषये वामकेश्वर-तन्त्रवचनं निभाल्यताम्। पद्यस्यास्य लक्ष्मीधरी-व्याख्यायां ५३ पृष्ठे ( मैसूर संस्करणम् )

महतीं ख्यातिं समासाद्य विराजते नितराम्। वसिष्ठसंहिता, सनकसंहिता, शुकसंहिता, सनन्दनसंहिता, सनत्कुमारसंहिता चेति संहितापञ्चकं शुभागम-पञ्चकमिति नाम्ना समापेदे कामपि ख्यातिं भूयसीम्। समुपलभ्यन्ते नाना समुद्धरणानि एतेभ्यो ग्रन्थेभ्योऽनेक-तान्त्रिकग्रन्थेषु। सौन्दर्यलहरीटीकायां पूर्वनिर्दिष्टायां समुपलभ्यमानानि उद्धरणानि बहूनि षोडशशतीपूर्वकालिकतामेव एतेषां ग्रन्थानां ध्रुवं प्रमाणयन्ति।

आचार्यशङ्करस्य परमगुरुः गोविन्दाचार्यशिष्यो गौडपादाचार्यः श्रीविद्यासाहित्यसंवर्धने लब्धवर्णः तन्त्राचार्यो बभूव। एतस्य विश्रुते रचने बभूवतुः—श्रीविद्यारत्नसूत्रनाम्नी एका, सुभगोदयस्तुतिनाम्नी अपरा चेति। प्रमेयबहुलस्य श्रीविद्यारत्नसूत्रस्य टीकापि विद्यते आचार्यशङ्करेण प्रणीता[1]। सुभगोदयस्तुतिः द्विप्रकारा समुपलभ्यते—दीर्घवृत्तैः ५२ पद्यैः, केवलम् अनुष्टुप्-छन्दोभिः निबद्धा चापरा।

प्रथमस्योदाहरणं यथा—

भवानि त्वां वन्दे भवमहिषि सच्चित्-सुखवपुः
पराकारां देवीममृतलहरीमैन्दवकलाम्।
महाकालातीतां कलितसरणी कल्पिततनुं
सुधासिन्धोरन्तर्वसतिमनिशं वासरमयीम्॥

अनुष्टुम्मयैः पद्यैर्निमिता चापरा सुभगोदयस्तुतिः लक्ष्मीधरेण पूर्वोक्तायां स्वीय-टीकायां यत्र तत्रोद्धृता विराजते। तस्याः व्याख्या आचार्यशङ्करेणोपनिबद्धा विद्यते प्रथमा। द्वितीया तु लक्ष्मीधरस्यैव कृतिरिति निभालयन्तु विपश्चितः। सौभाग्यभास्करादवगम्यते लल्लकृताऽन्यैवासीत् काचित् प्रख्याता व्याख्या। इत्थं कामपि विस्तृतां प्रख्यातिमापद्यमानेयं सुभगोदयस्तुतिः तन्त्रग्रन्थेषु महिमानमा-धत्ते। गौडपादाचार्यस्य तान्त्रिकरचनायाः प्रभूतप्रभावो लक्ष्यते शङ्कराचार्यस्य तान्त्रिकरचनासु। नेदं विस्मर्तव्यं तन्त्रजिज्ञासुभिर्विद्वद्वरेण्यैर्यद् यथा अद्वैत-वेदान्तस्य माण्डूक्यकारिकासु प्रख्यापको गोडपादाचार्यः त्रिपुरातन्त्रेऽपि वैदुष्यं नूनं प्रकटयति, तथैव शङ्कराचार्यस्य रचनास्वपि अद्वैतवेदान्तस्य त्रिपुरा-तन्त्रस्यापि च मञ्जुलं सामरस्यमुपलभ्यते तज्ज्ञैः। शङ्कराचार्यस्य तन्त्रतत्त्वाभि-मर्शिणी कृतिद्वयी तान्त्रिकसाहित्ये प्रागल्भ्यं भजमाना विराजते। तत्रैका **प्रपञ्चसारः** अपरा **सौन्दर्यलहरी** चेति। **प्रपञ्चागमस्य** सारसंकलनात्मकोऽयं प्रपञ्चसारः सम्पूर्णतन्त्रग्रन्थरूपेण भजति कामपि ख्यातिं विपुलाम्। आचार्य-शङ्करस्य साक्षात् शिष्येण पद्मपादाचार्येण **विवरण**नामकव्याख्यानेन मण्डितोऽयं

१. सरस्वतीभवनग्रन्थमालायां वाराणसीतः प्रकाशिता।

ग्रन्थस्तन्त्रग्रन्थेषु कामपि प्रामाणिकतामाधत्ते निर्भराम्। २२ पटलेषु विभक्तेयं रचना सार्धसहस्रद्वयं प्रायशोऽनुष्टुभां धारयति। अत्र चादौ एकादशपटलेषु विविधानां देवतानां रूपं जपम् अनुष्ठानविधिं फलादिकं च सर्वं व्यवस्थितरूपेण वर्णयति प्रामाणिकोऽयं ग्रन्थः। सूतसंहितायाः पराशरसंहितायाश्च टीकायां **माधवाचार्यः** प्रपञ्चसारनिर्मातृत्वेन स्मरति शङ्कराचार्यम्। शारदातिलकस्य तन्त्रग्रन्थस्य व्याख्याकारो **राघवभट्टो**ऽपि समर्थयतीममेव सिद्धान्तम्। सौन्दर्य-लहरी शङ्कराचार्यस्य प्रामाणिकी रचनेति विषये नो विराजते मतवैविध्यं समालोचनापरायणेषु पण्डितप्रवरेषु। प्रायशः त्रिंशद्व्याख्यानानि मण्डयन्ति ग्रन्थमिमम्। गौडपादाचार्यस्य सुभगोदयस्तुतिपरम्परामनुसृत्य प्रणीतेयं स्तुतिरिति च बहुशः स्वाभिप्रायं प्रकटयन्ति। आसु टीकासु सर्वप्राचीना व्याख्या विराजते सुरेश्वराचार्यप्रणीता, प्राकाश्यमप्राप्यापि या हस्तलिखितरूपेण साम्प्रतं शृंगेरीमठे नूनं विराजते। अवान्तरटीकासु लक्ष्मीधरप्रणीता व्याख्या नितान्तं प्रख्यातिमासाद्य साम्प्रतं विद्योतते। टीकेयं तन्त्ररहस्यप्रतिपादकत्वेन सविशेषं प्रामाण्यं भजमाना टीकासु अग्रेसरतां समश्नुते कामपि। आसीत् लक्ष्मीधरोऽयम् उत्कलदेशस्य मध्ययुगीनशासकस्य राज्ञः प्रतापरुद्रदेवस्य सभामलंकर्मीणो विद्वद्वरेण्यः। तेनास्याविर्भावकालः षोडशशताब्दीति नूनं मन्यामहे। प्रतापरुद्र-देवोऽयम् आन्ध्रप्रदेशाधिपस्य राज्ञः कृष्णदेवस्य समकालिकत्वं जामातृत्वं च भजमानो बभूव नितान्तं प्रख्यातनामा विद्यारसिकः स्वयं च काव्यकलामर्मज्ञो भूपालशिरोमणिरिति नूनं समामनन्ति ऐतिहासिकाः। सौन्दर्यलहर्याः आदिमेषु ४१ पद्येषु श्रीविद्यायाः तत्त्वविवेचनं गम्भीररहस्यानां प्रकाशनं च विराजते। अन्तिमेषु ५९ पद्येषु भगवत्या ललिताम्बिकायाः रूपसौन्दर्यमाधुरी सुभगैः सालंकारैः पदविन्यासैर्विभूषिता कामपि आनन्दराशिं वितरति साहित्य-रसिकेभ्यः। भगवत्या अलौकिकसौन्दर्यस्य संकेतो **देवीभागवतस्य** सप्तमस्कन्धे ३९ तमे अध्याये इत्थं सूच्यते—

सगुणां करुणापूर्णां तरुणीमरुणारुणाम्
सौन्दर्यसारसीमां तां सर्वावयवसुन्दराम्॥ ४०॥

शृङ्गाररससम्पूर्णां सदा भक्तार्तिकातराम्
प्रसादसुमुखीमम्बां चन्द्रखण्डशिखण्डिनीम्॥ ४१॥

पाशाङ्कुशवराभीतिधरामानन्दरूपिणीम्।
पूजयेदुपचारैश्च यथावित्तानुसारतः॥ ४२॥

अस्या भगवत्याः पूजावसरे हृल्लेखामातृकान्यासस्य विधिरपि पुराणेऽस्मिन् निर्दिष्टो वर्तते। तथा च पुराणवचनम्—

ह्ल्लेखा मातृकान्यासं नित्यमेव समाचरेत् ।
मूलाधारे हकारं च हृदये च रकारकम् ।
भ्रूमध्ये तद्वदीकारं ह्रीकारं मस्तके न्यसेत् ॥
( देवीभागवतस्य सप्तमस्कन्धे ४० तमाध्याये )

पुराणमिदं हृल्लेखायाः सातिशयं माहात्म्यमभिव्यनक्ति—

हृल्लेखा सर्वमन्त्राणां नायिका परमा स्मृता
हृल्लेखादर्पणे नित्यमहं तत् प्रतिविम्बिता
तस्माद् हृल्लेखया दत्तं सर्वमन्त्रैः समर्पितम् ।
( तत्रैव ७।४०।२८-२९ )

पञ्चदशाक्षरमन्त्रे हृल्लेखा वारत्रयं प्रयुक्ता विद्यते । ललितात्रिशतीभाष्ये शङ्कराचार्यपादा अस्यास्तात्पर्यं वैशद्येन प्रतिपादयन्ति—

हकारः शिवः आकाशबीजत्वात् आकाशवन्निर्लेपः । रेफः वह्निबीजं कायोत्पादसंनिहितशक्तिमदीश्वरवाचकम् । तथा च हकारयुक्तरेफः शुद्धचैतन्यमेव कारणावच्छिन्नमिति वदति । ईकारः मन्मथबीजं तत्कारणरक्षकतया स्थितिहेतुं विष्णुरूपं चैतन्यमभिदधाति । अनुस्वारः तस्मिन्नेव पदार्थे अभिन्ननिमित्तोपादकं लयं वक्ति । तथा च ह्रीमित्युक्ते जगदुत्पत्तिस्थितिलयकारणं चैतन्यं शक्त्या वाच्यार्थः प्रतीयते । अयमेव ह्रींकारः तटस्थलक्षणं यस्याः सा भगवती ह्रींकारलक्षणेति निगद्यते । इत्थं ब्रह्मरूपेयं भगवतीति ह्रींकारशब्दस्य तात्पर्यं परिस्फुरति । ( द्र० ललितात्रिशतीभाष्ये पृ० ४६)

**शक्तेः प्रामुख्यम्**

जगति कार्यजातं निभालयतां पुरुषाणां न परोक्षमेतत् यत् सर्वत्र विराजते प्रमुखता शक्तितत्त्वस्य । शक्तिमान् कोऽपि जीवो विना शक्तिं स्वीयकार्यं सर्वात्मना निष्पादयितुं नैव शक्नोति । आचार्यशङ्करः सौन्दर्यलहर्या आदिमे पद्ये शक्त्या एव विश्वस्य सृष्टिपालनसंहारादिषु सर्वेषु कार्यकलापेषु महनीयेषु सातिशयं माहात्म्यं प्रतिपादयति । तथा च विद्योतमानमेतत् तथ्यं पद्यमेतत् विद्यते—

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।

शक्त्या युक्त एव शिवः प्रभवितुं समर्थो भवति । तस्या अभावे तु स स्पन्दनं कर्तुमपि नैव प्रभवति । स्वीयानि अङ्गानि चालयितुमपि नैव धत्ते सामर्थ्यं किमपि । शक्त्याः तान्त्रिकं बीजं भवति इकारेति वर्णः । तद्युक्त एव शिवः शिवतां धत्ते । तस्याभावे तु स 'शव'-रूपमेव भवति । तन्त्रग्रन्था सर्वमान्यां कल्पना-

मेतां बहुश अभिव्यञ्जन्ति। तथा च गौडपादाचार्यः स्वीये 'सुभगोदयस्तुति'-ग्रन्थे स्वाभिप्रायं स्पष्टाक्षरैः वर्णयति पद्येनैतेन—

परोऽपि शक्तिरहितः शक्तः कर्तुं न किञ्चन।
शक्तः स्यात्तु परेशानि शक्त्या युक्तो भवेद् यदि॥

—लक्ष्मीधरव्याख्या पृ० २९

न केवलं ग्रन्थेऽस्मिन्नेव, किन्तु अन्येष्वपि ग्रन्थेषु शक्तिवादस्य प्रख्याततमं तथ्यं नूनं प्रतिपादयति वैशद्येन शङ्करः। तथा च ब्रह्मसूत्रभाष्ये तस्य ध्यातव्यं कथनमेतत्—

नहि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति। शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः॥ (ब्रह्मसूत्रभाष्ये १।४।३) विविधरूपिण्याः शक्तेः कारणादेव सृष्टिकर्मणि वैभिन्यं साक्षात् क्रियते। तथा च शङ्कराचार्यवचनम्—एकस्यापि ब्रह्मणो विचित्रशक्तियोगाद् क्षीरादिवत् विचित्रः परिणाम उपपद्यते। (ब्रह्मसूत्रभाष्ये २।२।२४)।

शिवः शक्तिमतानुसारेण स्वशक्तिद्वारैव विश्वरूपेण परिणमते। शिवः स्वीया-परिच्छिन्नां सत्तां परित्यज्य परिच्छिन्नो जीवो भवति तद्रूपेण च संसारस्य सुखं दुःखं चानुभवति। वस्तुतः शिवस्य जीवरूपतामादधानस्य यान्युपकरणानि, आवश्यकानि प्रतीयन्ते शरीरेन्द्रियमनोबुद्ध्यहंकारादीनि, तद्रूपेण भगवती एव ध्रुवेणात्मानमाविष्करोतीति शङ्कराचार्यः सौन्दर्यलहर्यां पद्येनामुना तत्त्वमिदं प्रतिपादयति नितरां वैशद्येनेत्थम्—

मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापः त्वं भूमिस्त्वयि परिणतायां नहि परम्।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवतिभावेन विभषे॥

(सौन्दर्यलहरी ३५ पद्यम्)

आचार्यशङ्करस्य दृष्टौ विश्वस्य कारणभूतं ब्रह्म निःसन्देहं शक्त्या नैव भिन्नम्, शक्तिरपि कारणभूतब्रह्मणा सकाशात् नैव भिन्नतामश्नुते, कारणशक्तेः कार्यस्य च ऐक्यात्। शङ्करः कथयति–कारणस्यात्मभूता शक्तिः। शक्तेश्च आत्मभूतं कार्यम्। श्वेताश्वतर-उपनिषद् ईश्वरस्य लिङ्गभेदं जातिभेदं च तिरस्करोति–'नैव स्त्री न पुमानेषः' (५।१०) इति वचनेन। परन्तु अन्यत्र सैव प्रतिपादयति यद् ईश्वरः स्त्री भवति, पुमान् भवति, कुमारो भवति कुमारी च भवति—

त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी।

—श्वेताश्वतर उप० ४।३

श्वेताश्वतरीय-वचनानां प्रभावः शङ्कराचार्यपादानां तन्त्रतत्त्वमीमांसाविषये ध्रुवं परिलक्ष्यते। आचार्यपादाः **ललितात्रिशतीभाष्ये** परब्रह्मणः स्वरूपमनुरुध्य इत्थमामनन्ति—

चकारः निर्गुणब्रह्मणोऽपि सगुणब्रह्मविशेषणसद्भावसमुच्चयपरः सर्वत्रापि द्रष्टव्यः।

'सच्चिन्मयः शिवः साक्षात्तस्यानन्दमयी शिवा'

इति वचनेन

'स्त्रीरूपां चिन्तयेद् देवीं पुंरूपामथवेश्वरीम्
अथवा निष्कलं ध्यायेत् सच्चिदानन्दविग्रहाम्'

इति स्मृत्या च, 'त्वं स्त्री त्वं पुमान्' इति श्वेताश्वतरोपनिषदि उपाधिकृत-नाना-रूपसंभवोक्तेश्च। अतएव 'सेयं देवतैक्षत' इत्यादौ (छान्दोग्य उप० ६।३।२) 'तत् सत्यं स आत्मा' इत्यन्ते च श्रुतौ (छान्दोग्य उप० ६।१६।३) नपुंसकान्तस्य, 'स आत्मा' इति पुंल्लिङ्गात्मशब्दस्य एकार्थत्वम् अविवक्षितोपाधिमत्तया तत्त्वं पदलक्ष्यार्थस्यैकत्वात्। तस्मात् तत्त्वं-पदलक्ष्यार्थे सर्वेऽपि गुणा वर्णयितुं संभवन्तीति हयग्रीवेण अस्यां त्रिशत्यां बहवः चकारा उपात्ताः। तेन वयं सर्वेषां सर्वत्र न पार्थक्येन प्रयोजनान्तरं पश्यामः। (ललितात्रिशतीभाष्यम् श्रीरंगम सं० पृ० १६)।

सन्दर्भस्यास्य अयमाशयः संक्षेपेण। छान्दोग्योपनिषदि परब्रह्मणः कृते त्रिलिङ्गशब्दानां प्रयोगः समुपलभ्यते। 'सेयं देवतैक्षत' इति स्त्रीलिङ्गान्तो देवता-शब्दः, तत् सत्यमिति नपुंसकपदप्रयोगः, स आत्मेति पुंल्लिङ्गशब्दप्रयोगः। शब्दत्रयमेकमेव परब्रह्म निर्दिशति। अतएव परब्रह्मणः स्वरूपं शक्तिशब्देनापि निर्देष्टुं शक्यते। अतएव शक्तिब्रह्मणोरैक्यं सर्वथा समुचितं प्रतीयते। यद् ब्रह्म, सैव शक्तिः। या शक्तिः तदेव ब्रह्म—इति शङ्कराचार्यपादीयः सिद्धान्तः उप-निषत्सरणिमेव दृढमनुसरति। अत एव अद्वैतवेदान्तानुकूलमेव शाक्ततान्त्रिकं तत्त्व-मिति नूनं प्रतिपादयितुं शक्यते इति विशदं निभालयन्तु तान्त्रिकतत्त्वरहस्यविदो विपश्चितः।

**'समया' शब्दस्यार्थः**

आचार्यशङ्करो भगवत्याः कृते 'समया' नाम्नः, भगवतः शङ्करस्य च कृते 'समय' शब्दस्य विधत्ते प्रयोगम्। सौन्दर्यलहर्याः ४१ पद्ये उभयोः कार्यकलाप-मित्थं ब्रूते आचार्यपादः—

तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नवरसमहाताण्डवभटम्।
उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदम्॥

मूलाधारे स्वीयं कमनीयं लास्यं समया विधत्ते। समयश्च शङ्करो नवात्मा आनन्द-भैरवो नवभिः श्रृङ्गारादिभिः रसैः महद् अद्भुतं ताण्डवं विधत्ते। मिलिताभ्यामेताभ्यां मातापितृमत् जगदिदं प्रादुर्भवतीति पद्यस्याशयः। 'समया' शब्दस्य शिवेन सह साम्यं यातीति व्युत्पत्त्या भगवतीत्यर्थः स्फुटं स्फुरति। शिवेन साकं शक्त्याः शक्त्या च सह शिवस्य साम्यं परिस्फुरति। लक्ष्मीधरस्य व्याख्यानुसारेण साम्यमेतत् पञ्चविधं भवति—(१) अधिष्ठानसाम्यम् (एकाधारे उभयोः स्थित्या साम्यमेतत् विद्योतते) (२) अनुष्ठानसाम्यम् (सृष्टिकर्मणि उभयोः संलग्नत्वात् साम्यमेतत् भवति); (३) अवस्थानसाम्यम् (नृत्यकर्मणि उभयोः स्थित्या एतत् साम्यमुभयोः विद्यते), (४) रूपसाम्यम् ( जपाकुसुमवदरुणवर्णात् रूपसाम्यम् )। तथा च तन्त्रवचनम्—

जपाकुसुमसङ्काशौ मदघूर्णितलोचनौ।
जगतः पितरौ वन्दे भैरवी-भैरवात्मकौ॥

(५) नामसाम्यम्—समयः समयेति नामसाम्यात् इति हेतोः पञ्चविधं समप्रधानयोः शिवयोः स्थित्या समयाशब्देन भगवत्या भैरव्याः समयशब्देन च आनन्दभैरवस्य च सम्यक् बोधः संपद्यते।

**समयाचारः**

शाक्ततन्त्रे आचारस्य द्वैविध्यं प्रतिपाद्यते—एकः समयाचारः, अपरस्तु कौलाचारः। प्रथमाचारस्य उपासकाः समयिन इति कथ्यन्ते। द्वितीयाचारस्य उपासकाः कौलशब्देन व्यवह्रियन्ते। उभयोः आचारयोरस्ति महत् वैशिष्ट्यम्। लक्ष्मीधरस्य व्याख्यानुसारेण कौलानां पूजा बहिः पूजा भवति। समयिभिस्तु अन्तःपूजा संपाद्यते। लक्ष्मीधरमतानुसारेण हृदयकमले भगवत्या आराधनया अन्तःपूजासम्पादनेन ऐहिकानां आमुष्मिकाणां च फलानां समेषां प्राप्तिर्भवति। कौलमतानुयायिनां तु बाह्यपूजायामेव विराजतेऽनुरक्तिः। कौलमतं तु चतुष्षष्ट्या तन्त्रैः प्रतिपादितं वेदविरोधि शूद्रादीनामेकतन्त्राधिकारात् वेदविहितात्, समयाचारात् नितान्तं न्यूनतां भजते। ( चतुष्षष्ट्या तन्त्रैः सकलमतिसन्धाय भुवनमिति सौन्दर्यलहर्याः ३१ तमे पद्ये लक्ष्मीधरव्याख्याऽभिसन्धेया )।

**त्रिपुरा**

श्रीशङ्कराचार्यपादैराराध्या ललिता, त्रिपुरसुन्दरी, षोडशीत्यादिभिरभिधानैः संकेतिता भगवती विद्योततेतराम्। सैव त्रिपुरेति नाम्नापि प्रख्यातिं लभते। दश महाविद्याः शाक्ततन्त्रेषु प्रसिद्धा वर्तन्ते। तासां नामानि यथा—

(१) काली, (२) तारा, (३) षोडशी, (४) भुवनेश्वरी, (५) भैरवी, (६) छिन्नमस्ता (७) मातङ्गी, (८) कमला, (९) धूमावती, (१०) बगलामुखी चेति। तत्राद्याः

तिस्रः विशेषेण साधकैः उपास्यतां भजन्ते। तत्रापि च षोडश्याः प्राधान्यं वरीवर्ति। सैव त्रिपुरेति नाम्नापि ख्यातिं भजते सिद्धसम्प्रदाये। त्रिपुराशब्दस्य नैकं तात्पर्यमभिव्यज्यते तत्र ग्रन्थेषु—तिसृभ्यः मूर्तिभ्यः परा प्राचीना पुरातनीति-हेतोः नामरहस्यम्। सा गुणमयातीता त्रिगुणनियन्त्री शक्तिरिति तात्पर्यम्। मनोबुद्धिचित्तेषु त्रिपुरेषु निवासमादधाना शक्तिः; त्रिमूर्तीनां ब्रह्म-विष्णुमहेशानां जननीत्वेन वेदत्रयीरूपत्वात्, महाप्रलये स्वस्मिन् त्रिलोकस्य लीनभावसम्पादनात्, भगवती त्रिपुरेति आख्यया तन्त्रशास्त्रेषु प्रख्याता वर्तते। वामकेश्वरतन्त्रानुरोधेन ब्रह्म-विष्णु-महेशरूपिणी श्रीविद्यैव ज्ञानशक्तिक्रियाशक्ति इच्छाशक्तिरिति स्वरूपत्रयं भजते। तत्र इच्छाशक्तिः तस्याः शिरोभागः, ज्ञानशक्तिः मध्यभागः, क्रियाशक्तिश्च अधोभागरूपेण विराजते। इत्थं शक्तित्रयात्मकत्वादेव भगवती जगदम्बा त्रिपुरेति समाख्यां समश्नुते। अत एव शङ्कराचार्येण प्रपञ्चसारे संक्षेपेण पद्येऽस्मिन् सर्वासां व्युत्पत्तीनां सार इत्थं प्रतिपादितः—

त्रिमूर्तिसत्त्वाच्च पुराभवत्वात्
त्रयीमयत्वाध्वपुरैव देव्याः।
लये त्रिलोक्या अपि पूरणत्वात्
प्रायोऽम्बिकायास्त्रिपुरेति नाम॥

स्तुतिमये पद्येऽस्मिन् अस्यैव तत्त्वस्य पुनरावृत्तिर्वर्ण्यते—

त्रिमुखि त्रयीस्वरूपे त्रिपुरे त्रिदशाभिवन्दिताङ्घ्रियुगे।
त्रीक्षण-विलसित-वक्त्रे त्रिमूर्तिमूलात्मिके प्रसीद मम॥
—प्रपञ्चसारे ८।७२

त्रिपुरेयं त्रिपुरसुन्दरी-ललिता-षोडशीति नानानामभिः तन्त्रेषु व्यवह्रियते। तद्विद्यायाः विषये संक्षेपेण किञ्चिदुच्यते—

**त्रिपुरसुन्दरीविद्या**

इयमेव **पञ्चदशाक्षरी** विद्येति समाख्यया शास्त्रेषु प्रसिद्धिमभ्युपेता दृश्यते। अस्या विद्याया उद्धारः श्री शङ्कराचार्यपादैरनेन पद्येन सौन्दर्य-लहर्यामित्थं व्यधायि—

शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामार-हरयः।
अमी हृल्लेखाभिस्त्रिसृभिरवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम्॥
(सौन्दर्यलहरी ३२ पद्यम्)

विद्येयं नितान्तं रहस्यात्मिकेति मन्यन्ते तान्त्रिकाः। सोम-सूर्य-वह्निरूपेण त्रिखण्डात्मकोऽयं मातृकामन्त्र इति वर्ण्यते तज्ज्ञैः। खण्डानि वर्णाश्चेत्थं विराजन्ते—

प्रथमं खण्डम्—क, ए, ई, ल, ह्रीं
द्वितीयं खण्डम्—ह, स, क, ह, ल, ह्रीं
तृतीयं खण्डम्—स, क, ल, ह्रीं
चतुर्थं खण्डम्—श्रीं

अस्य पद्यस्य टीकायां लक्ष्मीधरेणेत्थं व्याख्यायि—प्रथमे खण्डे आद्यं वर्णचतुष्टय-माग्नेयखण्डात्मकं विद्यते, द्वितीयं वर्णपञ्चकात्मकं सौरखण्डम्। उभयोः खण्डयोर्मध्ये ह्रीं रूपात्मकं रुद्रग्रन्थिरूपात्मकं विद्योतते। तृतीयखण्डस्य निरूपणं वर्णत्रयी विधत्ते यः सौम्यखण्डात्मना मन्यते। सौरसौम्यखण्डयोर्मध्ये विष्णु-ग्रन्थिस्थानीया भुवनेश्वरीबीजं 'ह्रीं' स्थापितं विद्यते। एकाक्षरात्मकं चतुर्थखण्डं चन्द्रकलारूपेण विराजते। सौम्य-चन्द्रकलाखण्डयोर्मध्ये ब्रह्मग्रन्थिस्थानीयं हृल्लेखबीजं स्वीक्रियते। 'श्रीं'—इयमेव षोडशी कलेति व्यवह्रियते। इदमेव बीजं श्रीविद्येति निगद्यते यस्य ज्ञानं गुरुमुखादेवावगन्तव्यमिति लक्ष्मीधरः प्रकटयति (द्रष्टव्यम्—श्रीरङ्गम् संस्करणम् सौन्दर्यलहर्याः पृ० ११९)।

**श्रीविद्यायाः प्रवर्तकाः**

श्रीविद्यायाः प्रख्याता उपासका विद्यन्ते द्वादशैव तु। तेषां नामानि—

मनुश्चन्द्रः कुबेरश्च लोपामुद्रा च मन्मथः।
अगस्तिरग्निः सूर्यश्च इन्द्रः स्कन्दः शिवस्तथा।
क्रोधभट्टारको देव्या द्वादशामी उपासकाः॥

कस्मिन्नपि प्राचीने काले एतेषां द्वादशानां उपासकानां सम्प्रदाया अविद्यन्त पृथक् पृथक्। साम्प्रतं सम्प्रदायद्वयमेव विद्यते—एको लोपामुद्रासम्प्रदायः, अपरश्च मन्मथ (काम) सम्प्रदायो यस्मिन् कादिविद्यायाः प्रचारः प्रायशः समुपलभ्यते साम्प्रतम्। कामदेवः भगवत्याः त्रिपुरायाः प्रभावसम्पन्नो बभूव साधक इति प्रमाणयति आचार्यः शङ्करः। अनङ्गोऽपि समरसाधनादिभिः विरहितोऽपि कामदेवो बभूव नितान्तं शक्तिहीनः, परन्तु भगवत्या नयनकोणस्य कृपयैव न केवलं मुनीनाम्, अपितु समग्रस्यैव जगतो विजयकर्मणि श्लाघनीयं साफल्यमलभत इति जागर्ति भगवत्याः कोऽपि प्रभावातिरेकसमन्वितोऽनुग्रहो मन्मथोपरि—

धनुः पौष्पं, मौर्वी मधुकरमयी, पञ्च विशिखाः
वसन्तः सामन्तो, मलयमरुदायोधनरथः।
तथाप्येकः सर्वं हिमगिरिसुते! कामपि कृपाम्
अपाङ्गात् ते लब्ध्वा जगदिदमनङ्गो विजयते॥

—सौन्दर्यलहरी, पद्य ५।

लोपामुद्रायाः सम्प्रदायः साम्प्रतमंशतो विद्यते प्रचलितः। आसीत् लोपामुद्रा राजकन्या। तस्या जनको भारतेऽस्मिन् वर्ष कस्यचिद् देशस्य शासको भूमिपालः। स च त्रिपुरायाः मुख्यशक्त्या भगमालिनीदेव्या बभूव नैष्ठिक आराधकः। लोपामुद्रा बाल्यकालादेव स्वपितुश्चकार परिचर्याम्। तस्याः सेवया प्रसन्ना भगवती तस्यै वरं ददौ येन सा जगन्मातुः सेवाया अधिकारिणी दृढं बभूव। तया त्रिपुराविद्याया उद्धारः समजनि येन सा श्रीविद्याविषये ऋषित्वमुपलब्धवती (द्रष्टव्यः त्रिपुरारहस्यस्य माहात्म्यखण्डस्य ५३ अध्यायः)। वैदिक ऋषिरासीत् अयमगस्त्यः। मूलतः स नासीत् तान्त्रिकः, येन भगवत्या ध्याने पदार्पणमपि कर्तु न शशाक स महानुभावः। अनन्तरं स स्वपत्न्याः लोपामुद्राया एव सकाशात् समुपपेदे शिष्यत्वम्। लोपामुद्रायाः सम्प्रदायो **हादिविद्या**मुपास्ते, यथा कामराज-सम्प्रदायः कादिविद्यायाः समुपासको वरीवर्ति। हादिविद्याया पञ्चदशाक्षरी विद्येति निगद्यते तान्त्रिकैः। कादिविद्यायाः प्रचारवत् हादिविद्याया प्रचारो नैवालोक्यते साम्प्रतम्। हादिविद्यायामपि पञ्चदशाक्षरीत्वं विद्यते समुपास्यमानस्य मन्त्रस्य, परन्तु उभयोः विद्ययोः मन्त्रयोः पार्थक्यमेव वरीवर्तते।

देशिकेन्द्रस्य महर्षेः दुर्वाससः संप्रदायोऽपि प्रायो विलुप्ततामेवाधत्ते, परन्तु तद्विरचितस्तोत्रयोर्गरिमा तान्त्रिकगूढता च नितरां विराजेते। दुर्वासा बभूव त्रिपुरसुन्दर्याः कोऽपि प्रख्याततम आचार्यः। स्तोत्रद्वयी तस्य वैशद्येनाभिरामतां समुपेत्य तान्त्रिकान् विदुषः सर्वथा रञ्जयति। रचनयोरभिधानमित्थम्—

(क) **शक्तिमहिम्नः स्तवः।** अयमेव श्रीत्रिपुरसुन्दरीमहिम्नस्तोत्रनाम्नापि प्रख्यातो वर्तते (५८ पद्यानि)

(ख) **परशम्भुमहिम्नःस्तवः**—स्तवोऽयं त्रयोदशप्रकरणेषु इत्थं विभक्तो दृश्यते—(१) उपोद्घात-प्रकरणम् (पद्यानि १८), (२) पराशक्तिस्कन्धरश्मिप्रकरणम् (७), (३) इच्छाशक्तिस्कन्धरश्मिप्रकरणम् (८), (४) ज्ञानशक्तिस्कन्धरश्मिप्रकरणम् (६); (५) क्रियाशक्तिस्कन्धरश्मिप्रकरणम् (१२); (६) कुण्डलिनीशक्तिस्कन्धरश्मिप्र० (६); (७) मातृकाशक्तिस्कन्धरश्मिप्र० (१०); (८) षडन्वयरश्मिविवेकस्कन्धप्र० (५); (९) श्रीपावकध्यानयोगप्र० (११); (१०) महाविभूतिप्र० (१७); (११) अन्तर्यागोपचारपरामर्शप्र० (८); (१२) विशेषोपचार परामर्शे शान्तिप्रकरणम् (१२); (१३) उपसंहारप्रकरणम् (२१)। त्रयोदशप्रकरणस्थितानां पद्यानां सम्मिलितसंख्या १४१ वर्तते। ग्रन्थस्यान्ते दुर्वाससो नाम स्तुतिश्चेति द्वयमित्थं विद्यते—

---

१-२. द्रष्टव्य डा० शिवशंकर अवस्थी—मन्त्र और मातृकाओं का रहस्य, पृ० २१२–२४०।

श्रीक्रोधभट्टारक दिव्यनाम्ना दुर्वाससा सूक्तमहामहिम्नः ।
स्तोत्रं पठेद्यो भुवनाधिपत्यं नित्यं गुरुत्वं शिवतामुपैति ॥ १६ ॥

सदसदनुग्रह-विग्रह-गृहीत—मुनिविग्रहो भगवान् ।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः ॥ १८ ॥

दुर्वाससो महातन्त्राचार्यस्य कविता नितान्तं प्रौढिमादधाना चेतः चमत्करोति विपश्चितामनायासेनैव । तदत्र पद्यद्वयमुद्ध्रियते विदुषां मनोरञ्जनाय—

**शिवास्तुतिः—**

गेहं नाकति गर्वितः प्रणतति स्त्रीसङ्गमो मोक्षति
द्वेषी मित्रति पातकं सुकृतति क्ष्मावल्लभो दासति ।
मृत्युर्वैद्यति दूषणं सुगुणति त्वत्पादसंसेवनात्
त्वां वन्दे भवभीतिभञ्जनकरीं गौरीं गिरीशप्रियाम् ॥

**शिवस्तुतिः—**

त्वं मायाकामदेव प्रथममसि ततः स्वस्य सृष्टौ विधाता
रक्षायां विष्णुरन्ते प्रबलतरमहारुद्रमूर्तिः स्वमूर्तौः ।
सत्योऽनन्तः प्रमाता शिवगुरुरिति च स्वात्ममूर्तिप्रभावैः
स्वेच्छावस्था गुणाढयाऽप्यगुण इति विभो वस्तुतः स्तूयसे त्वम् ॥

इत्थं श्रीविद्या तान्त्रिकदृष्टया नितान्तमभ्यर्हिता वैदिकदृष्टया च माननीयतमा वर्तते इति हेतोः सैव ब्रह्मविद्येति नूनं मन्तव्या । तस्या उपासकानां भोगश्च मोक्षश्च करस्थ एव वर्तते । तथेयं तान्त्रिकी दृष्टिः प्रवर्तते—

यत्रास्ति भोगो न च तत्र मोक्षः
यत्रास्ति मोक्षो न च तत्र भोगः ।
श्रीसुन्दरी — सेवनतत्पराणां
भोगश्च मोक्षश्च करस्थ एव ॥

पद्यस्यास्य दृष्टान्तरूपेण दुर्गासप्तशत्यां साधकद्वयस्य चरित्रं साधु विवेचनीयम् । एको वर्तते चैत्रवंशोद्भवः सुरथो नाम राजा । अपरश्च धनिककुले समुत्पन्नः समाधिनामा वैश्यः । वर्षत्रयं यावत् सावधानेन मनसा एतौ भगवत्याः समाराधनं चक्रतुः । प्रसन्नया भगवत्या वरयाञ्चायै प्रार्थितौ स्वाभीष्टं वरमयाचेताम्—राज्ञा भ्रष्टराज्यस्थ पुनः प्राप्तिः, वैश्येन सङ्गविच्युतिकारकं च ज्ञानम् इति । वरद्वयस्य प्रार्थनाऽवनतेन शिरसा ताभ्यां सद्यो विहिता ।

ततो वव्रे नृपो राज्यभविभ्रंश्यन्यजन्मनि
अत्रैव च निजं राज्यं हतशत्रुबलं बलात्

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥
(सप्तशती १३।१७-१८)

शान्तनवीटीकयाऽन्तिमपङ्क्त्यास्तात्पर्यमित्थं वैशद्येन निर्णीतम्—ममता च अहंता च सङ्गः संसर्गोऽप्येषा बुद्धिः द्वैतज्ञानं च भेदनिबन्धनम्, तस्य विच्युतिकारकं विच्छेदजनकं मोक्षोपयोगि ज्ञानम्। ममायं पुत्रोऽहं पिता। ममेदं कुलम्, अहं भर्ता; ममेदं धनम् अहं स्वामी तस्येति अध्यासजनितः सङ्गः, तस्य विच्युतिः विलयः, तस्याः कारकं करणमिति।

भगवत्या अनुग्रहेण राज्ञो भोगस्य वैश्यस्य च मोक्षस्य प्राप्तिरभूदिति। इदमेव भोगमोक्षयोः सद्यः करस्थितिरिति कथनम्। फलतः भगवत्याः शक्तेरुपासनया साधको न केवलं भौतिकमनुभवति सौख्यम्, यावद् अभेदप्रतिपादकं मोक्षमपि स्वायत्तीकरोति ध्रुवमिति दिक्।

शङ्कराचार्यपादानां शक्तितत्त्वविमर्शनम्।
पुराण-तन्त्रानुगतं प्रेयसे श्रेयसेऽस्तु नः ॥

# आङ्गलभाषानिबद्धानां लेखानां संक्षेपाः

## केषुचित् पुराणगतेषु दुर्ज्ञेयार्थकेषु श्लोकेषु समस्याः

## PROBLEMS RELATING TO A FEW ENIGMATIC VERSES IN THE PURĀṆAS

N. GANGADHARAN

पुराणश्लोकगताः समस्यास्त्रिभिः क्षेत्रैः संबद्धा दृश्यन्ते—(१) श्लोकानां प्रामाणिकता, या कस्यचिद् वचनस्य पुराणान्तःपातित्वं ज्ञापयति; (२) समस्या-मूलकानां पुराणवचनानां व्याख्यानम्; (३) अप्रसिद्धानां पुराणमतानाम् उल्लेखः।

उदाहरणानि यथा—गरुडपुराणस्य १।६९।४२ श्लोको यतो हस्तलेख-दृष्ट्या प्रामाणिकः, अत एतादृशस्य श्लोकान्तरस्य पुराणेऽदर्शनादपि तस्य पाठः पुराणेऽभ्युपगन्तव्य एवेति दर्शितम्। गरुडपुराणस्य १।५९।३९ श्लोकस्य पाठ एवंभ्रष्टः, यदस्यार्थो न विज्ञातुं शक्यते। लिङ्गपुराणे १।९५।६०-६२ श्लोकगतस्य 'अपहृत्य प्राणान्' इत्यंशस्य य आङ्गलानुवादः कृतः, सोऽशुद्ध इति मन्तव्यम्। अग्निपुराणस्य १६७।३९ श्लोकस्यार्थोऽपि न सुष्ठु विज्ञातुं शक्यते। अग्निपुराणस्य १६८।१८ श्लोके यः 'पेलुगव्ये'ति शब्दः पठितः, स अज्ञातार्थक एव। एवम् ३२०।४० श्लोकस्यार्थोऽपि न सम्यग् अवगम्यते।

अग्निपुराणीयौ छन्दोविषयकौ द्वौ श्लोकौ (३३५।३-४) यद्यपि पिङ्गलछन्दः-शास्त्रप्रतिष्ठौ (८।१, ८।२४-३४), तथापि अतिसंक्षेपत्वाद् अनयोरर्थो न स्फुटं विज्ञायते। तथैव श्लोकबन्धपरकाः ३४३।५५-६१ श्लोका अपि न सर्वत्र स्फुटार्थकाः।

अप्रसिद्धमत-प्रदर्शकानां श्लोकानामुदाहरणं गारुडे (१।६०।१-२), आग्नेये (१२१।७८-७९) च दृश्यते। उदाहरणान्तरमपि—यद्यपि प्रायेण निधयो नवेत्येवोच्यते, तथापि पुराणे 'अष्टौ निधयः' इति मतमप्युक्तम्।

# नन्दातीर्थयात्रा

## THE PILGRIMAGE OF NANDĀ

PRATAPADITYA PAL

नन्दिपुराणं नन्दापुराणं वाधिकृत्य हाजरामहोदयेन बहु विचारितम्। उपपुराणमिदं पुराणान्तरेष्वपि उल्लिखितम। नन्दिपुराणस्य वचनानि निबन्ध-ग्रन्थेषूद्धृतानि। अलवीरुणिनापि स्मृतमिदम्, राजतरङ्गिणीकारेणापि। ख्रीष्टीया षष्ठी, सप्तमी, अष्टमी, नवमी वा शताब्दी रचनाकालोऽस्येति गवेषकाणां मतम्। शाक्तं पुराणमिदं नन्दादेव्या माहात्म्यं प्रख्यापयति। अत्र नन्दातीर्थविषयकं विवरणं स्यादिति अनुमीयते।

महाभारतीयतीर्थयात्रासूचीषु नन्दातीर्थस्य नाम गृहीतम्। श्राद्धयोग्यतीर्थ-रूपेण नन्दादेवीप्रियरूपेण चास्य तीर्थस्य निर्देश उपलभ्यते। हिमवत्-पृष्ठस्थमिदम् इति पुराणेषूक्तम्। देवीपुराणे एतत्तीर्थविषयकं विवरणमुपलभ्यते विस्तरेण।

देवीपुराणस्य ३८ तमेऽध्याये ब्रह्मशक्रसंवादे देव्या माहात्म्यमुपवर्णितम्। देवी शिवा-मङ्गला-नन्दारूपेण त्रिधा वर्तते। कुरुक्षेत्रहिमवतोर्मध्ये देवी नन्दारूपेण तिष्ठति। ३९ तमेऽध्याय उक्तम्—हिमवद्गिरौ देवी नन्दारूपेण पूजितेति। ९२ तमेऽध्यायेऽपि देवीयं निर्दिष्टा। ९३ तमेऽध्याये नन्दादेवी-नन्दातीर्थे एव विशेषेण वर्णिते। अत्र महादेवः पृष्टो देव्या नन्दाविषये; उत्तरितं च शिवेन यद् हिमवति यानि भैरव-केदार-रुद्रालय-नन्दातीर्थानि सन्ति तेषु नन्दातीर्थं श्रेष्ठम्; आषाढ-श्रावण-भाद्रमासेषु नन्दातीर्थं गन्तव्यम्। नन्दाक्षेत्रेण सह स्त्रीणां विशिष्टः संबन्धोऽपि दर्शितः।

नन्दादेवी शिवलिङ्ग-स्थण्डिल-पुस्तक-प्रतिमा-चित्रादिषु उपासनीया। कीदृशानि लिङ्गादीनि भवेयुरित्यपि विस्तरेण वर्णितम्। नन्दादेव्याः पूजा-प्रतिमा-चित्रादीन् विषयान् अधिकृत्य विशदं विवरणं प्रदत्तमत्र। उक्तं च— एतद्देव्या उपासका स्त्रीः प्रति श्रद्धालवो भवेयुः, पाशुपत-कापालिक-कुमारीश्च पूजयेयुरिति।

नन्दातीर्थयात्रिकर्तव्यविषये देवीपूजाफलादिविषये च बहूक्तमत्र। देवीयं चतुर्हस्ता जयादिभि र्देवीभिरन्विता च। नन्दातीर्थसंबद्धानि सुनन्दादितीर्थानि अधिकृत्य ९४-९५ तमयोरध्याययो र्विशदं विवरणं प्रदत्तम्, नन्दाव्रतस्य विवरणमपि।

नन्दादेवीसंबद्धानि त्रीणि तीर्थानि हिमवति विद्यन्ते। त्रित्वसंख्या विशेषेण दर्शनीया। आ-काश्मीर-कुमायूँ-गढ़वालं नन्दादेव्याः प्रसिद्धिरस्ति। कुमायूँ-जनपदस्योत्तरस्यां दिशि नन्दाश्रृङ्गं वर्तते। नन्दा-चूडिका-संगमे नन्दातीर्थ-

मित्युक्तं देवीपुराणे। पिण्डगङ्गा-कुशगङ्गे च नामान्तरे अनयोर्नद्योः। अलकानन्दा-संगमस्थितो यो नन्दाप्रयागः स नन्दातीर्थं भवितुमर्हति। अलकानन्दैव गङ्गा; चूडिकेति नन्दानद्या प्राचीनतरं नामेति संभाव्यते।

महाभारते तीर्थयात्राविवरणं दृश्यते! एतद् देवीपुराणतीर्थविवरणमिव न शुद्धं प्रतिभाति। हिमालयगतानि बहूनि तीर्थानि नन्दादेवीसंबद्धानि। नन्दा-अपरानन्दा-वर्णनं यदत्रोपलभ्यते, तदतीव चारु। अपरानन्दाऽलकनन्दैवेति गम्यते। नन्दातीर्थेन सह भैरव-केदार-रुद्रालयतीर्थानि देवीपुराणे उक्तानि। मत्स्यपुराणे भैरवक्षेत्रस्योल्लेखो विद्यते; अत्रोक्तो रुद्रप्रयागो रुद्रालय इति गम्यते। देवीपुराणोक्तानां कनकावत्यादीनामुल्लेखः पुराणेषु नामान्तरैर्दृश्यते-इत्यभ्युपेयम्।

देवीपुराणे नन्दादेव्या विषये चित्ताकर्षकं विवरणं प्रदत्तम्। नन्दासंबद्धमन्दिरसमीपेवाप्यः, तासु देवीकुण्डानि, वापीषु स्नानम्, नन्दामन्दिरगतानि हर्म्याणि, तत्रत्या ध्वजाः, हस्त्यादीनां मूर्तयः, मन्दिरे शालभञ्जिकाचित्रम्—इत्यादीनां बहूनां वस्तूनां वर्णनमुपलभ्यतेऽस्मिन् पुराणे। देवी सिंहेन व्याघ्रेण वा वाहितेत्युक्तमत्र। अत्र नन्दाया रथयात्रा वर्णिता। देव्याश्चत्वारो हस्ताः, हस्तद्वये वराभयमुद्रे, सौम्यरूपा च देवी। सुनन्दादेवीमन्दिरं महाकाल-गणपतिभ्यां रक्षितम्। कनकेश्वरी रथवाहिता, पञ्चमुद्राधारिणी, महाव्रतधरा च। अनेन विवरणेन वामाचारस्य सत्ता ज्ञाप्यते।

कनकेश्वरीतीर्थाददूरे स्फटिकनिर्मिता मूर्तिरस्ति। ततश्च मातृकाणां मूर्तयः। ततश्च काञ्चन सुवर्णमय्यः प्रतिमाः। नन्दादेवीप्रतिमा महिषासुरमर्दिनी। नेपालेऽपीयं देवी शिलामूर्तिमयी चकास्ति। मातृमण्डलस्य विवरणमपि पुराणेऽस्मिन् दृश्यते। मण्डलपूजाविद एव मातृकापूजका भवितुमर्हन्ति इति पूर्वाचार्याः केचन। यज्ञकर्मसंबद्धाः पत्नीशालादयोऽपि मण्डलाकारा इत्यतः मण्डलाकारस्य महत्त्वं गम्यते।

देवीसंबद्धमन्दिरेषु स्त्रिय एव पूजा-परिचर्या-कारिण्यः। इमाः परिचारिकाः कन्या उच्यन्ते। तदिदं स्त्रीराज्यस्य स्त्रीप्रधानसमाजस्य वा स्मारकम्। इदं हिमालयप्रान्तस्थम्। इमाः कन्या न विवाहिता भवन्ति। दीक्षितैः यात्रिभिः सहासां यौनः संबन्धो भवति। पूजादिषु स्त्रीणां प्राधान्यं कदा कस्मिन् देशे किंविधमासीदिति विषयमधिकृत्य बहु विचारितमत्र। एतत्प्रसंगे कचदेवयानीकथादीनाम् ऐतिहासिकं रहस्यमपि विवृतम्।

नन्दादेवी-तत्संबद्धतीर्थानि च आ-काश्मीर-नेपाल-पश्चिमभागं स्थितानि प्राचीनकाले—इति देवीपुराणतः सिद्धं भवति। पुराणकाले देवीस्थानरूपेण प्रसिद्धमिदं स्थानं कालान्तरे शैव-वैष्णवैरध्युषितं जातमिति विज्ञायते। स्वतन्त्रा नन्दादेवी कालान्तरे शिवसंबद्धा जातेति ऐतिहासिकदृश्य प्रतीयते।

इदं संभाव्यते यत् नन्दापुराणे नन्दिपुराणे वा स्वतन्त्राया नन्दादेव्या यच् चरितं वर्णितमासीत्, तदेव देवीपुराणकारेण स्वग्रन्थे उपनिबद्धं स्वदृष्टय-नुसारेण। देवीपुराणस्य सत्ता ख्रीष्टीयसप्तमाष्टमशताब्दीकाले सिद्धैव; अतः नन्दापुराणम् इतोऽपि प्राचीनमिति सिद्धयति। पुराणमिदं मुख्यतो नन्दादेवी-माहात्म्यपरं काश्मीरदेशसंबद्धमिति कथनमुपपन्नं भवति।

## भारतीयाः सूर्यपूजकाः

### INDIAN SUN-PRIESTS

V. C. SRIVASTAVA

सूर्यपूजकसंप्रदायस्य महत्त्वं विद्यते भारतीयेषु धर्मसंप्रदायेषु। वैदेशिक-पुरोहितविशेषैः सहास्य संबन्धो जातः प्राचीने काले—इत्यस्य वैशिष्ट्यम्। भारतीयाः सूर्यपूजका मग-भोजक-वाचक-याजक-पूजक-सेवक-शाकद्वीपीयब्राह्मण-सूर्यद्विजशब्दैरभिलप्यन्ते साम्ब-भविष्य-ब्रह्मपुराणेषु बृहत्संहितादिग्रन्थेषु, केषुचिच् शिलालेखेषु च। उत्तरे भारते शाकद्वीपीया ब्राह्मणा अद्यापि विद्यन्ते।

भारतीयसूर्यपूजकानां स्वरूप-प्राचीनता-मूलनिवासस्थानादिविषये विलसन्-प्रभृतिभिर्विद्वद्भिर्विचारः कृतः। अत्र विदुषामैकमत्यं नास्ति, अतो विषयोऽयं पुनर्विचार्यते।

कृष्णजाम्बवतीपुत्र-साम्बचरितप्रसङ्गे साम्बभविष्यपुराणयोर्मगानां कथोप-निबद्धा। उक्तमत्र—चन्द्रभागानदीतीरे मूलस्थाने सूर्यमन्दिरं स्थापितं साम्बेन। सूर्यपूजार्थं शाकद्वीपाद् मगजातीया अष्टादशपुरोहिता आनीतास्तेन। कथेयमिति-हासानुमोदिता, यतः शिलालेखवैदेशिकयात्रिविवरण-संस्कृतसाहित्यादिभिः सिद्धा भवति। सूर्यपूजा मगपुरोहितैः करणीयेति मतं बृहत्संहितायामुक्तम्।

ईरानदेशीया मैजाई (Magi)—नामानः पुरोहिता एव पुराणोक्ता मगा इति निःसंशयं प्रतीयते। मूलत इमे मीडियादेशनिवासिनः। मेजाई-संस्कृतेर्वैशिष्टयं सूर्याग्निदेवपूजा। ये खलु मगा भारते समागताः, तेऽनार्या इन्द्रजालादि-विद्याप्रवीणा मीडियादेशीयाः सूर्याग्निपूजकाः। भारतागमनकाल इमे ईरानसंस्कृतवन्तो जाताः। मगशब्दो न जातिविशेषवाचक इति ज्ञेयम्।

भारतीयसूर्यपूजकानाम् अभिजनभूतो यः शाकद्वीपः, तस्य स्थितिः दुर्निर्धारणीया। नास्ति चास्मिन् विषये विदुषामैकमत्यम्। अफगानिस्तानदेशस्य

दक्षिणपश्चिमभागः (यः पुरा ईरानदेशस्य पूर्वो भाग आसीत्) एव शाकद्वीप इति युक्तं प्रतिभाति।

कदा इमे सूर्यपूजका भारते समागता इत्यस्मिन् विषयेऽनेकं मतं दृश्यते। ख्रीष्टपूर्व—पञ्चम-चतुर्थ-शतके आरभ्य ख्रीष्टीय—नवम-दशम-शतके च यावत् कस्मिन्नपि काले इमे समागता इति विद्वांसः प्रतिपादयन्ति। कुषाणकाले एव इमे समागता इति बहूनां मतम्। सूक्ष्मे विचारे कृते सति प्रतिभाति यदिमे नैकस्मिन् काले समागताः; मतमिदं पुराणतोऽपि सिद्ध्यति। इमे मगधजनपदपर्यन्तं गताः। शककुषाणकाल एवेमे समागता इति मतम् अनुपपन्नमित्यत्र युक्तिभिर्दशितम्। कुषाणकाले मगानुसृता सूर्यपूजापद्धतिः लोके प्रतिष्ठिता जातेति विज्ञायते। भारते मगानां प्रथमः प्रवेशः अकामेनिद्-आक्रमणकाले (ख्रीष्टपूर्व ६-५ शतके) बभूवेति संभाव्यते। मतमिदं पुराणादिभ्योऽपि सिद्धं भवति येषु मगविषये विशिष्टाः सूचनाः प्रदत्ताः। उत्तर-पश्चिमे भारते मगानां प्रथमः प्रवेशो जातः; एषां द्वितीयोऽनुप्रवेशः शककुषाणकाले (ख्रीष्टपूर्वप्रथमशतकाद् ख्रीष्टीय—द्वितीय शतककालं यावत्); एषां तृतीयोऽनुप्रवेशः ख्रीष्टीय—पञ्चम-षष्ठ-शतककाले जातः।

परम्परागता भारतीया सूर्यपूजापद्धतिः मगप्रभावेण परिवर्तिता जातेति बहवो मन्यन्ते। वस्तुतः परम्परागता पद्धतिर्न कृत्स्नतः परिवर्तिता—मगप्रभावोऽस्मिन् क्षेत्रेऽल्पीयानित्येव मतं युक्तं प्रतिभाति। सूर्यस्य मूर्तिर्मन्दिरं च मगैः प्रवर्तितमिति कथयितुं शक्यते। कुषाणादिकाले निर्मितासु सूर्यमूर्तिषु मगप्रभावः प्रत्यक्षं दृश्यते। मगैरेव मूलस्थाने (मुलतानगरे) आदौ सूर्यमन्दिरं स्थापितमिति विज्ञायते। मगानामाचारा अपि केचन भारते अभ्युपगताः।

भारतप्रवेशान्तरम् इमे मगा आदौ अनादृता बभूवुः; क्रमेणैवैषां प्रभावो वृद्धिं गतः। ख्रीष्टीय—चतुर्थ-पञ्चम-शतककाले इमे हिन्दुसमाजे स्वीकृताः, षष्ठे शतके च हिन्दुसमाजान्तर्गता जाताः। राज्याश्रयः, सूर्यपूजालाभप्रचारः, सूर्यमन्दिरनिमाणक्रिया, स्त्रीशूद्रौ प्रति महनीया दृष्टिश्चेते एव मगप्रभाववृद्धेः मगानां समाजानुप्रवेशे च हेतवः।

मग-भोजक (याजक)—भेदेन मगानां द्वौ भेदौ साम्बपुराण उक्तौ। उपासनाप्रक्रियायामपि अनयोर्भेदो वर्तते। मग—भोजकौ मूलतो द्वौ भिन्नौ वर्गौ—इति मतं न संगतम्। वैदेशिक-सूर्योपासनापरायणा ये मगा भारते समागताः तेषां नामान्तराणि भोजकयाजकादीनि हेतुभेदतो जातानि। इमे मगाः शाकद्वीपतो भारते यथाकालं समागताः; अधुना इमे भारतीयब्राह्मणान्तर्गता राजन्ते इति।

# पुराणवर्णितानि कल्पसूत्राणि

## KALPASŪTRAS IN THE PURĀṆAS

RAM SHANKAR BHATTACHARYA

वेदाङ्गनामगणनापरकेषु पुराणश्लोकेषु कल्पस्य नाम नियमतो गृह्यते; वेदाङ्गनामसु द्वितीयं स्थानं कल्पो भजते—इति दृश्यते। क्वचित् पुराणे नपुंसकलिङ्गकः कल्पशब्दः पठ्यते। वेदसूत्रमिति कल्पसूत्रस्य नामान्तरं दृश्यते पुराणेषु। अनुवाकशब्दोऽपि कल्पार्थक इति टीकाकारः श्रीधर आह; मतमिदमयुक्तं प्रतिभाति।

प्रत्येकं वेदशाखासु कल्पसूत्रमस्ति—इति पुराणवचनतो विज्ञायते। इतरेषामङ्गानामपेक्षया कल्पस्य नेदीयान् संबन्धो वेदेन सह दर्शितः पुराणेषु। स च युक्तः, वैदिकसंप्रदायसंमतश्च।

'आख्यानैश्चाप्युपाख्यानै गाथाभिः कल्पशुद्धिभि' रित्यादिके श्लोके यः कल्पशब्दः स न कल्पसूत्रं लक्षयति—इति युक्तिभिरुपपादितम्। कल्पः खलु वेदविहितानां कर्मणाम् आनुपूर्व्येण कल्पनाशास्त्रम्, कल्पग्रन्थस्य विज्ञानमात्रेण नरः वैदिककर्मकुशलो भवति—इति पौराणिकी दृष्टिः।

विष्णुधर्मोत्तरे कल्पसूत्रस्य स्वरूपं दर्शितम्। कल्पसूत्राणां रचनाकालविषये रचयितृविषये यत् पुराणमतं तद् व्याख्यातमत्र संक्षेपेण।

# सर्वभारतीयकाशिराजन्यासस्य कार्यविवरणम्

## (१) गरुडपुराणकार्यम्

अस्मिन् अवधौ गरुडपुराणस्य आचारकाण्डस्य श्लोकानां पाठनिर्धारण-कार्यं संपूर्णम् । केषाञ्चिज्जटिलपाठानां निर्धारणमवशिष्टं वर्तते येषां निर्णय-कर्मणि संपादको डा० गङ्गाधरन् महोदयः संलग्नोऽस्ति । अद्यावधि आरम्भतः ७५ अध्यायानां पाठसमीक्षोपकरणं निर्मितम् । अग्रिमाध्यायानां पाठसमीक्षोप-करणलेखनं प्रारब्धं जातम् ।

## (२) मानसखण्डस्य पाठसमीक्षितसंस्करणम्

अग्रिमदशाध्यायानां पाठनिर्धारणं पूर्णतामगमदस्मिन् अवधौ । नवतितमा-ध्यायपर्यन्तः पाठो मुद्रितो जातः ।

## (३) शिवधर्म-शिवधर्मोत्तरपुराणकार्यम्

केषांचिद् हस्तलेखानां परीक्षणं कृतम् ।

## (४) वेदपारायणम्

रामनगरदुर्गस्थिते व्यासेश्वरमन्दिरे माघमासे शुक्लपक्षे एकादशीं तिथिमा-रभ्य पूर्णिमापर्यन्तं (१६-२० फरवरी १९८९) तैत्तिरीयशाखायाः पारायणं वैदिकप्रवरेण श्रीदेन्दकूरिवेङ्कटसुब्रह्मण्यमहोदयेन कृतम् । श्रीगणेश्वर द्राविड-महोदयः पारायणस्य श्रोता आसीत् । पारायणसमाप्तौ दक्षिणा, मार्गव्ययादिकं प्रमाणपत्रं च प्रदत्तम् ।

## पुराणविभागे आगता विद्वांसः

अस्मिन्नवधौ आगतेषु विद्वत्सु अधोनिर्दिष्टा विद्वांसः दर्शकपुस्तिकायां स्वहस्ता-क्षराणि कृतवन्तः—

१. श्रीनरेन्द्रकुमारः, रांची (विहार)

२. डा० पाओलो फियानों, भाषाशास्त्रविभागः
कैथोलिक विश्वविद्यालय मिलान, इटली

३. श्री अविनाशत्रिपाठी, शोधछात्रः काशी हिन्दु विश्वविद्यालयः

# सहयोगिन्यासानां कार्यविवरणम्

## (१) महाराजबनारस विद्यामन्दिरन्यासः

### मङ्गलोत्सवः

अस्मिन् वर्षे अनेन न्यासेन मार्च मासस्य २८-३० दिनाङ्केषु त्रिदिवसात्मको मङ्गलोत्सवः समायोजितः। त्रिष्वेव दिनेषु काशिकहिन्दूविश्वविद्यालयस्य वाराणस्याश्च वाद्यकण्ठसंगीतविशेषस्ववैज्ञाः शिष्टद्यस्य प्रदर्शनं कृतवन्तः। त्रिष्वेव दिनेषु सामान्या जनाः विशिष्टा नागरिका अधिकारिणश्च कण्ठसंगीतस्य वाद्य-संगीतस्य च श्रवणस्यानन्दमनुभूतवन्तः।

### ध्रुपदमेला

१९८९ वर्षे षोडशध्रुपदमेलापकस्यायोजनं संपन्नम्। इदमायोजनं मार्च मासस्य ४-६ दिनाङ्केषु आसीत्। यथा सुविदितमिदयायोजनं महाराजबनारस-विद्यामन्दिरन्यासेन प्रतिवर्षं वाराणस्यां तुलसीघट्टे क्रियते। अस्योद्घाटनं वाराणस्याः वयोविद्यावृद्धेन डा० रघुनाथसिंहमहाभागेन कृतम्। उद्घाटनावसरे मञ्चे डा० रघुनाथसिंहमहाभागः, प्राध्यापकवीरभद्रमिश्रमहोदयः डा० राजेश्वर आचार्यः बटुकनाथ शर्मा च उपस्थिता आसन्। सर्वे ध्रुपदगायनस्य अस्य प्रचारे च काश्या महत्त्वस्य च प्रशंसनं कृतवन्तः।

६ मार्चदिनाङ्के शिवरात्रिदिने ध्रुपदवार्षिकी पत्रिकायाश्चतुर्थाङ्कस्य प्रकाशनोदघाटनं वाराणसीमण्डलस्यायुक्तेन श्रीराजीवरत्नशाहमहोदयेन कृतम्। अस्मिन् अवसरे विश्रुता संगीतज्ञा उस्ताद रहीमफहीमुद्दीन डागर, उस्ताद सईदुद्दीन डागर, स्वामी पागलदास इत्यादय उपस्थिता आसन्। अस्मिन् वर्षे स्वामिपागलदासमहोदयाय स्वातितिरुनालपुरस्कारोऽपि प्रदत्तो यस्य वितरणम-स्मिन्नेवावसरे जातम्।

ध्रुपदमेलाया साफल्याय श्रीवीरभद्रमिश्रः यथोचितां व्यवस्थामकरोत्। देशस्य सर्वेभ्यो भागेभ्यः कलाकाराः सम्मिलिता आसन्।

## (२) महाराज उदितनारायणसिंहमानसप्रचारनिधिः

### रामचरितमानसस्य नवाहपारायणम्

अनेन न्यासेन चकियानगरस्थिते कालीमन्दिरे वैशाखमासस्य शुक्ले पक्षे (७-१५ मई १९८९) रामचरितमानसस्य नवाहपारायणं समायोजितम्। पूर्वाह्णसमयेषु पारायणं सायंकालेषु च एतद्विषये प्रवचनं जातम्। प्रवचनकारेषु श्रीशम्भुनाथजी, श्रीवासुदेवाचार्यः, अयोध्यायाः एकः व्यासश्च प्रमुखा आसन्। प्रवचनकालेषु तत्रभवन्तः काशिनरेशा श्री डा० विभूतिनारायणसिंहशर्माणः उपस्थिता आसन्। प्रवचनसमयेषु समागतश्रोतॄणां संख्या महती आसीत्। समाप्तिदिने साधुभ्यो भोजनं प्रसादवितरणं च जातम्।

भद्रतन्त्र उवाच ।

के यूयमिह संप्राप्ताः पतिताः केन हेतुना ।
केन दीर्घतरं श्वासं कुर्वन्त इह संस्थिताः ॥ ११ ॥

राक्षस उवाच ।

वयं हि राक्षसा घोरा हिमालयनिवासिनः ।
प्राक्तनेनैव पापेन घाताः स्म प्राणिहिंसकाः ॥ १२ ॥
सर्वदा मानवानां च व्याधभूताश्चरामहे ।
सांप्रतं वायुना स्पृष्टाः सरिदुत्थेन भूरिशः ॥ १३ ॥
साम्प्रतं महितानां हि विविक्य गतिमुत्तमाम् ।
याहि स्वभवनं पान्थ अस्माकं यदि मन्यसे ॥ १४ ॥

व्यास उवाच ।

राक्षसानां गिरं श्रुत्वा स मुनिः करुणार्द्रधीः ।
उपायं कथयामास तेषां मुक्त्यै तपोधनाः ॥ १५ ॥

भद्रतन्त्र उवाच ।

अप्राप्य शरयूं पुण्यां न निमज्य च तत्तथा ।
नास्ति नास्ति महाभागा मुक्तिर्भूतलवासिनाम् ॥ १६ ॥

व्यास उवाच ।

भद्रतन्त्रवचः श्रुत्वा राक्षसाश्च तपोधनाः ।
शरयूस्नानजं पुण्यं पप्रच्छुः प्रणिपत्य तम् ॥ १७ ॥

राक्षसा ऊचुः ।

शरयूस्नानमाहात्म्यं कथयस्व समाहितः ।
येन वै राक्षसं देहं हित्वा स्वर्गं व्रजामहे ॥ १८ ॥

---

१३. –c) ने4 स्पृष्ट्वा (→स्पृष्टाः). –d) ने1.2.3 सरितोत्थेन (→सरिदुत्थेन). –e) ने3 पाप (→पान्थ). –f) ने 1.2 योगिनः (ने3 ०नाः) (→पापिनः).
१४. –c) ने1 पाथ (?) (→पान्थ).
१५. –b) ने2.3 करुणार्द्रधिः (→करुणार्द्रधीः). १६. –a) ने3 शरयुं (→शरयूं).
१७. –d) ने1 प्रपच्छुः (→पप्रच्छुः).
❀ ने2 राक्षस उवाच.

भद्रतन्त्र उवाच ।

अपि वर्षशतैः साग्रयैः शरयूस्नानजं फलम् ।
न शक्नोति महाभागाः कथितुं कमलासनः ॥ १९ ॥

संक्षेपात् कथयिष्यामि शृण्वन्तु सुसमाहिताः ।
गङ्गायमुनयोः सङ्गे माघस्नानेन यत्फलम् ॥
तत्फलं शरयूमध्ये दिनेनैकेन जायते ॥ २० ॥

तावत्स्नानप्रशंसां वै तीर्थेष्वन्येषु वर्तते ।
यावन्न शरयूतोये न स्नातं भुविवासिभिः ॥ २१ ॥

यस्यां स्नात्वा महाभागा मानवा भूतले स्थिताः ।
यान्ति ब्रह्मपदं पुण्यं ब्रह्मर्षिगणसेवितम् ॥ २२ ॥

अणुमात्रं जलं ये च शरयूसम्भवं शुभम् ।
संस्पृशन्ति महापुण्यं ते यान्ति परमां गतिम् ॥ २३ ॥

शरयूसम्भवैः पुण्यैः यैः स्पृष्टा वायुभिः शुभैः ।
तेऽपि ब्रह्मभुवं पुण्यं प्राप्नुवन्ति न संशयः ॥ २४ ॥

अथान्यदपि वक्ष्यामि क्षेत्रं देवर्षिदुर्लभम् ।
यत्र स्नात्वा नरो याति महेन्द्रभवनं शुभम् ॥ २५ ॥

सङ्गमो भद्रतुङ्गाया यत्र संजायते शुभम् ।
तत्क्षेत्रं देवगन्धर्वैः पूज्यते नात्र संशयः ॥ २६ ॥

ये निमज्जन्ति मनुजाः शरयूभद्रतुङ्गयोः ।
सङ्गमे देवगन्धर्वैः पूजिते सुमनोहरे ॥ २७ ॥

व्यास उवाच ।

इत्युक्त्वा मुनिशार्दूला भद्रतन्त्रो महामतिः ।
ददौ तेभ्यो सुपुण्यं हि जलकुम्भं सुशोभनम् ॥
शरयूभद्रतुङ्गायाः सङ्गमात्परिपूरितम् ॥ २८ ॥

प्राप्य ते शरयूतोयं निमज्य मुनिसत्तमाः ।
जगृहुर्विधिवच्छुद्धं भद्रतन्त्रेण बोधिताः ॥ २९ ॥

---

१९. –a) ने2 अधि– (→अपि); ने1 साग्नैः, ने3 साग्रैः (→साग्रयैः). २०. –a) ने1 संक्षेप– (→संक्षेपात्). २१. –b) ने2.3 विद्यते (→वर्तते). २४. –b) ने3 ये (→यैः). २६. –b) क्षेत्र– (→क्षेत्रं). २८. –d) ने1 जलं (जल–).

ततस्ते शरयूतोयं पीत्वा तां राक्षसीतनुम् ।
तत्यजुर्भद्रतन्त्रस्य प्रसादान्मुनिसत्तमाः ॥ ३० ॥
प्राप्य ते देवसदृशं देहं मानुषदुर्लभम् ।
विमानमधिरुह्याशु ययुर्ब्रह्मपुरं प्रति ॥ ३१ ॥
धद्रतन्त्रोऽपि तान् सर्वान् मोचयित्वाऽतिपातकात् ।
शिवमाराध्य योगेन निमज्य शरयूजले ॥
ययौ शिवपुरं पुण्यं पुत्रदारान्वितो द्विजाः ॥ ३२ ॥
इत्येतत्कथितं विप्रा माहात्म्यमतिशोभनम् ।
शरय्वाख्यानसंयुक्तमघकोटिविनाशनम् ॥ ३३ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे शरयूमाहात्म्ये राक्षसाख्यानं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥**

३०. –b) ने1 रक्षसी-, ने3 राक्षसीं (→राक्षसी–). –c) ने1 हित्या तु (→तत्यजुर्). ३३. –c) ने1 शरज्वा० (→शरय्वा°).

व्यास उवाच ।

या [:] पुण्याः शरयूसङ्गे सङ्गता [:] सरितां वराः ।
ता धन्याः सर्वतीर्थेभ्यो विद्यते नान्यथा क्वचित् ॥ १ ॥

सङ्गमे च महाभागाः यः स्नाति शरयूं शुभाम् ।
स याति विष्णुभवनं पुनरावृत्तिदुर्लभम् ॥ २ ॥

हित्वा यः शरयूं पुण्यां तीर्थान्तरमुपासते ।
स याति नरके घोरे पीडितो यमकिङ्करैः ॥ ३ ॥

तीर्थानि शरयूमध्ये भाषितुं कश्मलं गता [:] ।
समग्राणि महाभागा ब्रह्माद्या देवतागणाः ॥ ४ ॥

सङ्क्षेपात् कथयिष्यामि तीर्थानि शरयूजले ।
सामान्येन महाभागाः शृण्वन्तु सुसमाहिताः ॥ ५ ॥

स्रोतं हि भद्रतुङ्गाया उत्तीर्य मुनिसत्तमाः ।
भद्रतीर्थमिति ख्यातं भद्रतन्त्रेण सेवितम् ॥ ६ ॥

निमज्य मानवस्तत्र पितृकृत्यं विधाय च ।
त्रिसप्तकुलमुद्धृत्य ब्रह्मलोके महीयते ॥ ७ ॥

ततस्तु शरयूसङ्गे रेवानामा सरिद्वरा ।
सङ्गता मुनिशार्दूलाः सर्वपापप्रणाशिनी ॥ ८ ॥

निमज्य मानवस्तत्र पितृकृत्यं समाप्य च ।
प्रयाति देवभुवनं देवगन्धर्वसेवितम् ॥ ९ ॥

---

१. -a) ने$_{1.3}$ या (→या [:]). -b) ने$_{1}$ संगता, ने$_{2}$ संगतां (→सङ्गता [:]); ने$_{1.3}$ वरा (→वराः). -c) ने$_{3}$ धन्या (→धन्याः). २. -b) ने$_{2}$ * (→यः); ने$_{2.3}$ शरयुं (→शरयूं); ने$_{1}$ शुभम् (→शुभाम्). -c) ने$_{1\ 2}$ °भुवनं (→°भवनं). ३ -a) ने$_{3}$ शरयुं (→शरयूं). -d) ने$_{2}$ पीडिता (→पीडितो). ४. -a) ने$_{3}$ शरयु° (→शरयू°). -b) ने$_{1}$ कस्मलं, ने$_{3}$ कस्मलां (→कश्मलं); ने$_{1}$ गतः, ने$_{2}$ गता, ने$_{3}$ गतिः (→गता[:]). ६. -a) ने$_{2}$ श्रोतुं, ने$_{3}$ श्रोतो (→स्रोतं). ७. -d) ने$_{1}$ मह° (→ब्रह्म°).

ततः स्रोतं समुत्तीर्य कनपर्वतसम्भवा ।
सकोका सरितां श्रेष्ठा शरयूसङ्गमं गता ॥ १० ॥

सङ्गमे तत्र संस्नात्वा पितृश्राद्धं समाप्य वै ।
मानवो देवभवनं प्रयाति मुनिसत्तमाः ॥ ११ ॥

तदूर्ध्वं मुनिशार्दूला नागपर्वतसम्भवा ।
नागनारायणी पुण्या शरयूसङ्गमे गता ॥ १२ ॥

तत्र नागेश्वरं देवं संपूज्य मुनिसत्तमाः ।
निमज्य पितृकृत्यं वै समाप्य मुनिसत्तमाः ॥ १३ ॥

त्रिसप्तकुलमुद्धृत्य नरो याति परां गतिम् ।
दक्षिणे नागगङ्गाया धात्रीशो नाम शङ्करः ॥ १४ ॥

पूज्यते देवगन्धर्वैस्तथैव शिवकिङ्करैः ।
तं सुपूज्य जनो याति शिवलोकं सुदुर्लभम् ॥ १५ ॥

वामे दुर्गा महाभागा सर्वदुर्गविनाशिनी ।
वासुकीप्रमुखैर्नागैः पूज्यते परमेश्वरी ॥ १६ ॥

मानवः सर्वदुर्गेषु तां सुपूज्य द्विजोत्तमाः ।
न विन्दति महाभीतिं रोगभीतिं तथैव च ॥ १७ ॥

ततः स्रोतः समुत्तीर्य कोकायाः सङ्गमे शुभे ।
निमज्य मानवो याति शिवलोकं सुदुर्ल्लभम् ॥ १८ ॥

ततो रिष्टावतीसङ्गे निमज्य मुनिसत्तमाः ।
संपूज्य रिष्टकं देवं रिष्टामूले महेश्वरीम् ॥ १९ ॥

संपूज्य मानवो याति महेन्द्रभवनं शुभम् ।
ततः स्रोतः समुत्तीर्य दुर्गायाः सङ्गमे शुभे ॥ २० ॥

निमज्य विधिवत् तत्र पितृकृत्यं विधाय च ।
स त्रिंशत्कुलमुद्धृत्य मानवो मुनिसत्तमाः ॥ २१ ॥

शिवलोकमवाप्नोति शिवेन सह मोदते ।
गोमतीशरयूमध्ये ततो नीलगिरिः स्मृतः ॥ २२ ॥

---

१०. –a) ने$_1$ श्रोत्रं, ने$_2$ श्रोतुः + श्रोतुं, ने$_3$ श्रोतः (→स्रोतं). –b) ने$_1$ कनं° (→कन°). –d) ने$_1$ गताः (→गता). १४. –b) ने$_1$ परा (→परां). –d) ने$_1$ शंकरम् (→शङ्करः). १६. –c) ने$_{2.3}$ वासुकि° (→वासुकी°). १७. –c) ने$_1$ °भीति (→°भीतिं). १८. –a) ने$_1$ श्रोतं (→स्रोतः).

सेवितो देवगन्धर्वैर्वाणाद्यैर्दितिजैरपि ।
तथैव सिद्धगन्धर्वैर्विद्याधरमहोरगैः ॥ २३ ॥

उर्वशीप्रमुखाभिश्च नायिकाभिस्तथैव च ।
निवसन्ति त्रयस्त्रिंशत् कोट्यो देवतागणाः ॥ २४ ॥

यत्र पर्वतराजानं प्राप्य देवर्षिसेवितम् ।
यमाहुर्नीलसंज्ञं वै विन्ध्याद्द्विगुणवर्णितम् ॥ २५ ॥

महर्षयो महाभागाः शरयूजलसेवितम् ।
यं प्राप्य देवताः सर्वास्तथैव च महर्षयः ॥ २६ ॥

तथा सिद्धगणाश्चान्ये न काशीं बहुमेनिरे ।
सूर्याग्नितीर्थयोर्मध्ये मरणं प्रार्थयन्ति ये ॥ २७ ॥

ते धन्या मानुषे लोके देवपूज्या भवन्ति ते ।
यत्र देवादयः सर्वे निवसन्ति महर्षयः ॥ २८ ॥

मृतास्तत्र नराः सर्वे सायुज्यं यान्ति शङ्करे ।
सूर्याग्नितीर्थयोर्मध्ये क्षेत्रराडिति विश्रुतः ॥ २९ ॥

तत्र कीटपतङ्गाद्या मशका मर्कटादयः ।
श्वानाश्च शशकाद्याश्च तथैव च शिवादयः ॥ ३० ॥

प्रविष्टा शिवसंज्ञेया मानवाः मुनिसत्तमाः ।
तत्र ये पदमेकं वै संस्पृशन्ति महीतले ॥ ३१ ॥

प्रविशन्ति च ये विप्रास्ते यान्ति शिवमन्दिरम् ।
प्रविश्य तत्र वै विप्रा मा जानन्तु जना गिरिम् ॥ ३२ ॥

धर्मसेतुकरं शुद्धं जानन्तु मेरुसंज्ञकम् ।
महामरकतप्रख्यं सेवितं सिद्धनायकैः ॥ ३३ ॥

पर्वतं तं महापुण्यमज्ञाः पश्यन्ति मृण्मयम् ।
तत्त्वज्ञास्तु स्वरूपेण मेरुरूपं वदन्ति हि ॥ ३४ ॥

---

२४. –c) ने$_{2}$ निवसंत (→निवसन्ति). २७. –b) ने$_{1}$ काशि (→काशीं). –c) ने$_{1}$ °तीर्थमध्ये (→°तीर्थयोर्मध्ये).

३०. –c) ने$_{1}$ श्वानाद्या[:] (→श्वानाश्च). ३१. –a) ने$_{1.2}$ °वद्ज्ञेया (→°संज्ञेया). –b) ने$_{1.2}$ मानवैर् (→मानवाः). ३२. –a) ने$_{1}$ विप्रस् (→विप्रास्). –d) ने$_{2}$ गिरम् (→गिरिम्). ३३. –b) ने$_{2}$ ज्ञानं तु (→जानन्तु); ने$_{1}$ मरु° (→मेरु°). ३४. –a) ते$_{2.3}$ ते (→तं). –b) ने$_{1}$—मज्ञाः पश्यंत्ययोमयम्.

योनीलपर्वतं दृष्ट्वा प्रणामं नोपसर्पति ।
स याति नरके घोरे ताडितो यमकिङ्करैः ॥ ३५ ॥

सूर्याग्नितीर्थयोर्मध्ये यस्य प्रान्ते तपोधनाः ।
वाराणसीति विख्याता विद्यते वाणसेविता ॥ ३६ ॥

यत्र वाराणसी क्षेत्रे प्रेषितो गणनायकैः ।
निवासकल्पनार्थाय चण्डीशः शङ्करेण हि ॥ ३७ ॥

ऋषय उवाच ।

शङ्करेण स चण्डीशः प्रेषितः केन हेतुना ।
निवासं च कथं चक्रे शङ्करस्य महात्मनः ॥ ३८ ॥

व्यास उवाच ।

पुरा कृतयुगस्यादौ चण्डीशं पुरतः स्थितम् ।
उवाच देवदेवेशो भवान्या सह संस्थितः ॥ ३९ ॥

शिव उवाच ।

चण्डीश शृणु मे वाक्यं लोकानां हितकारकम् ।
येन सर्वे नरा धन्याः प्राप्नुवन्ति पदं मम ॥ ४० ॥

पश्य वाराणसीं चान्यां पुण्यतोयनिषेविताम् ।
सेवितां देवदैतेयैस्तथैव च महोरगैः ॥ ४१ ॥

व्यास उवाच ।

इत्युक्त्वा देवदेवेशो ध्यात्वा च सुचिरं ततः ।
पुनश्चण्डीशसंज्ञं वै गणं वव्रे तपोधनाः ॥ ४२ ॥

शिव उवाच ।

हिमालयतटं रम्यं पाहि चण्डीश मा चिरम् ।
सेवितं देवगन्धर्वैर्ब्रह्माद्यैर्देवतैरपि ॥ ४३ ॥

---

३६. –b) ने$_{2}$ प्रांतो (→प्रान्ते). –c) ने$_{2}$ विख्यातां (→विख्याता).
३७. –a) ने$_{2}$ क्षेत्रं (→क्षेत्रे). –b) ने$_{2.3}$ ०नायकः (→०नायकैः). ३८. –b) ने$_{3}$ प्रेषितं (→प्रेषितः). ४०. –c) ने$_{2.3}$ धन्यं (→धन्याः). –d) ने$_{1}$ पदे (→पदं).
४१. –a) ने$_{2}$ वाराणसी (→वाराणसीं). –c) ने$_{1}$ सेविता (→सेवितां). ४३. –b) ने$_{2.3}$ याहि (→पाहि). –d) ने$_{1}$ दैवतैर् (→देवतैर्).

तत्र त्वं शरयूतीरे प्रकल्पय पुरीं मम ।
पुण्यां वाराणसीं नाम असीवरुणमध्यगाम् ॥ ४४ ॥

शरयूगोमतीमध्ये विद्यते नीलपर्वतः ।
तस्याधस्तात् स्थलं पुण्यं प्रापयिष्यसि नान्यथा ॥ ४५ ॥

असीं च वरुणां चैव संस्थाप्य गणनायकम् ।
प्रकल्पस्य पुरीं रम्यां सेवितां गणनायकैः ॥ ४६ ॥

त्वया सङ्कल्पितां ज्ञात्वा पुरीं वाराणसीं शुभाम् ।
अहमप्यागमिष्यामि भवान्या सह नान्यथा ॥ ४७ ॥

यथा पुण्यतमा काशी ख्यायते भूतले शुभा ।
तथा सापि महापुण्या भविष्यति न संशयः ॥ ४८ ॥

व्यास उवाच ।

शिवस्य वचनं मूर्द्ध्ना प्रतिगृह्य तपोधनाः ।
हिमालयतटं रम्यं स ययौ गणनायकः ॥ ४९ ॥

शरयूगोमतीमध्ये ददर्श नीलपर्वतम् ।
सेवितं देवगन्धर्वैः सिद्धविद्याधरैरपि ॥ ५० ॥

तत्र गत्वा स शरयूं दृष्ट्वा पुण्यतमां द्विजाः ।
पुण्यतोयवहां शुद्धां गोमतीसङ्गमे गताम् ॥ ५१ ॥

तयोर्मध्ये स्थलं पुण्यं ददर्श मुनिसत्तमाः ।
देवगन्धर्वसिद्धैश्च सेवितं गिरिवासिभिः ॥ ५२ ॥
तत्र पुण्यतमं स्थानं तथैव शरयूं शुभाम् ।
दृष्ट्वा चण्डीश्वरो विप्राः कल्पयामास तां पुरीम् ॥ ५३ ॥
सेवितां रुद्रकन्याभिः रुद्रैश्चैकादशैस्तथा ।
वसुभिश्चाष्टभिर्विप्रास्तथैव च महर्षिभिः ॥ ५४ ॥
तथैव द्वादशादित्यैर्बाणाद्यैर्दितिजैरपि ।
वासुकीप्रमुखैर्नागैस्तथैवाप्सरसां गणैः ॥ ५५ ॥

---

४४. –a) ने3 तं (→त्वं); ने3 तत्र (→तीरे). –c) ने1 पुण्यां (→पुण्या). –d) ने1·3 ०मध्यगात् (ने3 ०गा) (→०मध्यगाम्). ४५. –b) ने3 ०पर्वते (→०पर्वतः). –c) ने2·3 तत्रा० (→तस्या०). –d) ने3 प्रापयिष्यामि(→प्रापयिष्यसि). ४६. –a) ने2 वरुणा (→वरुणां). –b) ने2 ०नायकम् (→०नायकः). ४८. –b) ने1 शुभाः (→शुभा). ५१. –c) ने1 ०वहा (→०वहां). ५३. –b) ने2 शरणं, ने3 शरयुं (→शरयूं). ५४. –a) ने2 ०कन्याभा (→ ०कन्याभिः).

पुण्यां वाराणसी नाम नियोगाच्छूलपाणिनः ।
व्यरचन्मुनिशार्दूलाश्चण्डीशो गणनायकः ॥ ५६ ॥

विरच्य स पुरीं रम्यां शङ्करस्य महात्मनः ।
वरुणां स्थापयामास सूर्योपरि तपोधनाः ॥ ५७ ॥

तथैवासीं महापुण्यामग्नितीर्थेषु शोभनाम् ।
तयोर्मध्ये महाक्षेत्रं व्यरचन्मुनिसत्तमाः ।
नन्दिस्कन्दिरिटिनिश्च(रिटीनाञ्च)परिवारैर्निषेवितम् ॥ ५८ ॥

ततः स रचयामास तयोर्मध्ये तपोधनाः ।
देवानां दानवानां च स्थानानि विविधानि च ॥ ५९ ॥

आहूतास्तेन वै विप्रा महेन्द्राद्या दिवौकसः ।
वसवोऽष्टौ द्वादशादित्या रुद्राश्चैकादशस्त(त?)था ॥ ६० ॥

महर्षयो महाभागास्तथा देवर्षयोऽपरे ।
वरुणः पवनश्चैव तथैव यक्षराट् स्वयम् ॥ ६१ ॥

प्रेतराट् पितृभिः सार्द्धं तथा गन्धर्वकिन्नराः ।
विद्याधराप्सरोभिश्च तथा गुह्यगणा द्विजाः ॥ ६२ ॥

तथा नागगणाः सर्वे वासुकिप्रमुखाः शुभाः ।
तस्मिन् क्षेत्रे महाभागाः प्रीतये शङ्करस्य च ॥ ६३ ॥

चक्रुर्निवासं ते सर्वे चण्डीशेनोपदर्शिताः ।
ज्ञात्वा विरचितां देवपुरीं वाराणसीं शुभाम् ॥ ६४ ॥

समाजगाम पार्वत्या सह देवर्षिसेवितः ।
ज्ञात्वा तं शरयूमध्ये वागुवाचाशरीरिणो ।
तुष्टाव प्रणता देवं दुर्दृश्या मानवैर्द्विजाः ॥ ६५ ॥

---

५६. –a) ने$_1$ वाराणसीं (→वाराणसी). –c) ने$_{1.2}$ ०शार्दूला (→०शार्दूलाश्). ५७. –a) ने$_1$ पुरी रम्या (→पुरीं रम्यां). –c) ने$_3$ वरुणं (→वरुणां). ५८. –b) ने$_1$ शोभनान् (→शोभनाम्). –c) ने$_1$ महत् (→महा–). –d) ने$_{2.3}$ व्यचरन् (→व्यरचन्); ने$_{2.3}$ ०सेवितम् (→०सत्तमाः). ६०. –d) ने$_1$ ०दशस् (→०दशास्).

६३. –a) ने$_1$ भाग० (→नाग०). –b) ने$_2$ ०प्रमुखां (→०प्रमुखाः). ६४. –b) ने$_1$ ०देशिताः (०दर्शिताः). –cd) ने$_1$ देवः पुरीं (→देवपुरीं). ६५. –a) ने$_3$ पर्वत्या (→पार्वत्या). –b) ने$_3$ ०सेवितम् (→०सेवितः).

वागुवाच ।

नमो नमो वासुकि यज्ञकारिणे
नमो नमश्चर्म्मवसानधारिणे ।
नमो नमः सत्यसमाधिकारिणे
नमो नमो मानवमौलिधारिणे ॥ ६६ ॥

हराय दक्षस्य मखप्रणाशिने
शिवाय श्रीवत्ससमाधिगामिने ।
रुद्राय रौद्रान्तकनाशिने प्रभो
नमामि सत्याय कलापधारिणे ॥ ६७ ॥

व्यास उवाच ।

संस्तुतं देवदेवेशं वाचा खे जातया तदा ।
ददृशुर्मुनिशार्दूलाः सर्वे ते शिवकिङ्कराः ॥ ६८ ॥

शरयूगोमती मध्ये लिङ्गं ब्रह्मादिसेवितम् ।
संस्तुतं सिद्धगन्धर्वैर्महेन्द्राद्यैर्दिवौकसैः ॥ ६९ ॥

प्रथमं वागुवाचान्या संस्तुतं मुनिसत्तमाः ।
वागीश्वरीति ते सर्वे तुष्टुवुर्गणनायकाः ।
सिद्धगन्धर्वमनुजा देवदानववानराः ॥ ७० ॥

महर्षयो महाभागास्तथा देवर्षयोऽपरे ।
तुष्टुवुर्देवदेवेशं वागीशेति तपोधनाः ॥ ७१ ॥

इत्येतत्कथितं विप्रा मया वाराणसी शुभाः ।
द्वितीया रचिता पुण्या चण्डीशेन महात्मनाः ॥ ७२ ॥

सूर्याग्नितीर्थयोर्मध्ये मृता यत्र तपोधनाः ।
सूर्यमण्डलमभ्येत्य यान्ति शिवपुरं प्रति ॥ ७३ ॥

काशीशतगुणं पुण्यं विद्यते यत्र वै द्विजा ।
तत्र ये मर्तुमिच्छन्ति तेऽपि यान्ति शिवालयम् ॥ ७४ ॥

---

६६. –a) ने1 नमे (→नमो). ६७. –b) ने2 °गामिनैः (→°गामिने). –c) ने1 °नाशिनं (→°नाशिने). –d) ने1.2 नमामि सत्यासकलांकधारिणे.

६८ –b) ने2.3 वागुवाचा शरीरिणी. –d) ने1 यम° (→शिव°). ६९. –a) ने2 *ध्ये (→मध्ये). ७०. –c) नें2 °बोधान्या (→°वाचान्या); ने1 वाचां देव्याः प्रथमतः. ७४. –c) ने1 नर्तुम् (→मर्तुम्).

ऋषय ऊचुः

सर्वक्षेत्रोत्तमं क्षेत्रं समस्ताघप्रणाशनम् ।
अपि पापविलिप्तानां मुक्तिदं वद वै द्विजाः ॥ ७५ ॥

संन्यासेन विना यत्र प्राप्यते मुक्तिरुत्तमाः ।
क्षेत्राधिराजराजानं प्रब्रूहि मुनिसत्तमः (म?) ॥ ७६ ॥

व्यास उवाच ।

शृण्वन्तु मनिशार्दूला गालवेन महात्मना ।
क्षेत्राधिराजराजानं भूतले समुदाहृतम् ॥ ७७ ॥

[पुनर्जनपदा सर्वे ऋषय क्ष(सं ?)यतव्रताः ।
सर्वशास्त्रार्थतत्वज्ञा वेदवेदाङ्गपारगः(गाः ?) ॥ ७८ ॥֍

सूपविष्टं सुखासीनं गालवं वेदवित्तमम् ।
सर्वशास्त्रार्थतत्वज्ञं ध्यायतं पुरुषोत्तमम् ॥ ७९ ॥

श्रुत्वा धर्माण्यशेषाणि सर्वशास्त्राणि वै तथा ।
पप्रच्छुः सर्वधर्म्मज्ञा भीताः पातकराशिभिः ॥ ८० ॥

जानपदा ऊचुः ।

नमस्ते वेदतत्त्वज्ञ ऋषीणां सम्मतः प्रभो ।
मनोवाक्कर्मभिर्ब्रह्मन् कृतानामघकोटिनाः (नाम् ?) ॥
केनोपायेन शान्तिः स्याद् दुःकर्मफलभागिनाम् ॥ ८१ ॥

श्रीगालव उवाच ।

एतदर्थं सुरः सर्वे ऋषयः शंसितव्रताः ।
वशिष्ठाद्या महात्मानो वैकुण्ठभवनं ययुः ॥ ८२ ॥

तत्र गत्वा जगन्नाथं देवदेवं जनार्दनम् ।
तुष्टुवुः सर्वधर्मज्ञाः सर्वलोकहिते रताः ॥ ८३ ॥

---

७५. -d) ने1 द्विजः (→द्विजाः). ७६. -d) ने1.2 °सत्तमः; ने3 °सत्तमाः (→°सत्तमः(°म ?) ). ७७. -b) ने2.3 महात्मनाः (→महात्मना).

֍ ने2.3 हस्तलेखयोः ७७ श्लोकात्परं ३५२ श्लोकं यावत् पाठो नास्ति. ने3 हस्तलेखे ७७ श्लोकात्परमध्यायसमाप्तिर्वर्तते—इति श्रीस्कन्द० ।

ऋषय ऊचुः ।

नमस्ते देवदेवेश शङ्खचक्रगदाधरः ( र ? ) ।
शार्ङ्गपाणे नमस्तेऽस्तु पद्मनाभ नमोस्तु ते ॥ ८४ ॥

वासुदेव जगन्नाथ ऋ(हृ?)षीकेश जनार्दन ।
कमलाकान्त देवेश वासुदेव नमोस्तु ते ॥ ८५ ॥

त्वमिन्द्रस्त्वं च सोमस्त्वं वायुस्त्वं च हुताशनः ।
त्वं रविस्त्वं धनाध्यक्षो यमस्त्वं वरुणोऽपि च ॥ ८६ ॥

त्वमाधारश्च धाता च विधाता त्वं जनार्दन ।
त्वमापस्त्वं च वै विप्रो बीजकर्त्तास्त्वमेव च ॥ ८७ ॥

विजयी विष्टनाथस्त्वं वीरनाथस्त्वमेव च ।
लोकाध्यक्ष सुराध्यक्ष त्राहि पापान्नमोऽस्तु ते ॥ ८८ ॥

भवसागरमग्नानां भग्नानां शोकसागरे ।
महापातकभीतानां ऋषीणां त्वं गतिर्भवः ( व ? ) ॥ ८९ ॥

पाहि विष्णो जगन्नाथ पाहि पाहि जनार्दनः (न ?) ।
यथा पूता महात्मानो ऋषयः शंसितव्रताः ।
सर्वे स्युः कर्मणा येन तथा त्वं ब्रूहि केशव ॥ ९० ॥

मुक्त्यर्थमेषां सर्वेषां क्षेत्रं तीर्थं जनार्दनः (न ?) ।
कृपया देवदेवेश त्रयाणामपि पावनम् ॥ ९१ ॥

गालव उवाच ।

एतच्छ्रुत्वा तु भगवान् मुनीनां भवितात्मनाम् ।
दर्शयामास शरयू(यूं ?)दिव्यां वामाचि(क्षि?)संस्थिताम् ॥ ९२ ॥

सर्वेषां पापविच्छित्यै अवतीर्णां हिमालये ।
मानसोत्थां महापुण्यां दिव्यमुक्ताफलोपमाम् ॥ ९३ ॥

हिमालयतटे रम्ये संभूतामिन्दुसन्निभाम् ।
प्रकाशितां वसिष्ठेन मोक्षमार्गकरीं पराम् ॥ ९४ ॥

ब्रह्मणा च शिवेनापि प्रार्थितां पुण्यवाहिनीम् ।
महेन्द्राद्यैर्देवगणैः सेवितामृषिभिः सह ॥ ९५ ॥

प्रक्रीडद्भिर्मृगद्वन्द्वैः सर्वतः सुविनादिताम् ।
हंसकारण्डवाकीर्णां चक्रवाकैर्निषेविताम् ॥ ९६ ॥

स्वर्णवर्णाभि[र्]दिव्याभिः वि(सि ?)कताभिश्च पूरिताः (ताम्) ।
नानाविधैर्वृक्षगणैः विशोभितमहातटाम् ॥ ९७ ॥

महर्षीणां महापुण्यैमा(रा ?)श्रमैश्च विशोभिताम् ।
देवाङ्गनाङ्गरागेण मज्जनक्षालितेन च ॥ ९८ ॥

पङ्कीभूतह्लदां दिव्यां परितो जलजैरपि ।
मकरैः कमठैश्चापि तथान्यैर्जलजन्तुभिः ॥ ९९ ॥

इलावर्ना(र्णा ?)दिभिर्नागैः संपूरितजलशयाम् ।
कल्लोललोलां विस्तीर्णां चलन्तीं हिमपर्वते ॥ १०० ॥

निजतीरे मृतानां च जन्तूनां वै महद्गतिम् ।
वदन्तीं त्रिविधं पुण्यं यममार्गविरोधिनी(नीम् ?) ॥ १०१ ॥

सङ्गमैर्बहुभिर्पूर्णां मुक्त्यै पूर्णार्थदायिनी(नीम् ?) ।
गोमतीसङ्गमे दिव्ये सङ्गतां कौमुदीसभाम् ॥ १०२ ॥

तत्र मध्ये महत्पुण्यं सुमेरुसदृशं शुभम् ।
पर्वतं नीलसंज्ञं वै पुण्यं तेभ्यः प्रदर्शयत् ॥ १०३ ॥

तस्योद्देशे महत्पुण्यां चण्डीशेन प्रकल्पिता(ताम् ?) ।
पुरीं वाराणसीं नाम पुण्यां काश्या दशोत्तराम्(रा?) ॥ १०४ ॥

तत्र मध्ये महालिङ्गं देय(व ?)वागीश्वराह्वयम् ।
पूजितं देवगन्धर्वैः शिवं तेभ्यः प्रदर्शयत् ॥ १०५ ॥

वशिष्ठानुग्रहार्थाय यत्र देवो महेश्वरः ।
सम्मोहयत् ऋषिश्रेष्ठं मार्कण्डेयं हरिप्रियम् ॥ १०६ ॥

चक्रे सैहं वपुः शम्भु[र्] भीषयन्निव भूसुरम् ।

जानपदा ऊचुः ।

चक्रे स भगवान्देवः कथं तस्य महात्मनः ।
अनुग्रहं च सम्मोहं मार्कण्डेयो हरिप्रियम्(यः?) ॥ १०७ ॥

आजगाम कथं तत्र भगवान्किं चकार सः ।
किं तत्र विप्रियं चक्रे शङ्करस्य तपोधनः ॥ १०८ ॥

गालव उवाच ।

पुरैव भगवांस्तत्र मार्कण्डेयो महातपाः ।
गीतां सनत्कुमारेण गाथां श्रुत्वा हिमालये ।
समाजगाम धर्मज्ञो नीतिशास्त्रविशारदः ॥ १०९ ॥

जना ऊचुः ।

सनत्कुमाराद्भगवान् गाथां श्रुत्वा हिमालये ।
समाजगाम च कथं तयोः सम्मतयोः शुभः ॥ ११० ॥

गालव उवाच ।

पुरा कृतयुगस्यादौ ऋषयः संशितव्रताः ।
सत्यलोके सुखासीनं ज्वलन्तमिव तेजसा ॥ १११ ॥

सनत्कुमारं च विभुं प्रणम्याशु यतव्रताः ।
वशिष्ठो भगवानत्रिः पुलस्त्यः पुलहश्च वै ॥ ११२ ॥

मरीचिरङ्गिराश्चैव क्रतुश्चैव महाजपाः ।
मार्कण्डेयो महातेजाः सह तैर्ब्रह्मणः सुतैः ॥ ११३ ॥

सनत्कुमारस्य सभां विविशुर्महतीं शुभाम् ।
सूपविष्टेषु सर्वेषु प्रजापतिसु तेषु वै ॥ ११४ ॥

उवाच स मुनिः पुण्यां गाथां ब्रह्मर्षिसेविताम् ।
असारे खलु संसारे सारं वैकुण्ठकीर्तनम् ।
ध्यानं प्रणामपूर्वं वै सारात्सारतरं शुभम् ॥ ११५ ॥

दुर्लभं मानुषं लोके मानुषं मुनिसत्तमाः ।
सुदुर्ल्लभतरं तत्र ध्यानं शिवमुकुन्दयोः ॥ ११६ ॥

तत्रापि दुर्ल्लभं मन्ये वासं काश्यां सुदुर्ल्लभम् ।
यत्प्रार्थयन्ति मुनयो वेदवेदाङ्गपारगाः ॥ ११७ ॥

तस्मादपि महत्पुण्यं वासस्तत्र हिमालये ।
गत्वा यत्र हरेर्लोकं पापिस्वा(ष्ठा ?) अपि यान्ति वै ॥ ११८ ॥

हिमसीकरसंस्पृष्टाः शशका मशकादयः ।
अपि सूकरमार्जारा यत्र यान्ति हरेः पदम् ॥ ११९ ॥

हिमाचलतटस्थेन कः शुना साम्यमिच्छति ।
तपसा विद्यया वापि ध्यानेन नियमेन च ॥ १२० ॥

मृतः स्वर्गं विहायाशु तृणप(व ?)द्देवसेवितम् ।
दुःप्राप्यं देवगन्धर्वैर्यो याति हरिमन्दिरम् ॥ १२१ ॥

ध्यानं तपः क्षेमकरी च विद्या
तीर्थानि काशिप्रमुखानि शम्भोः ।
तावद्धि सर्वाणि च कीर्तितानि
यावन्न चाद्रेर्हिमसीकराणि ॥ १२२ ॥

गालव उवाच ।

इमां गाथां सकृच्छ्रुत्वा मार्कण्डेयो महातपाः ।
परिक्रम्य प्रणम्याशु श्रुतमृषिं(श्रुतर्षि?)विष्णुसम्मितम् ।
आजगाम महाभागो भूलोकं लोकवन्दितः ॥ १२३ ॥

तत्रापश्यत्स तीर्थानि क्षेत्राणि विविधानि च ।
हिमवन्तं महापुण्यं जगाम दिशमुत्तराम् ॥ १२४ ॥

अथ नीलगिरिं पुण्यं हिमाद्रेर्देवसेवितम् ।
प्राप्य तत्र तपस्तेपे गोमतीतोयसेविते ॥ १२५ ॥

शीर्णपर्णानिलाहारो निराहारो जितेन्द्रियः ।
दिव्यं वर्षशतं तत्र तपस्तेपे[सु]दुष्करम् ॥ १२६ ॥

ततः कालेन महता मानवानां हिताय वै ।
प्राप्यानुज्ञां विधेस्तत्र वशिष्ठो मुनिसत्तमः ॥ १२७ ॥

शरयूं मनसोत्पन्नां देवर्षिगणसेविताम् ।
समानयत् पदोत्पन्नां हरेरमिततेजसः ॥ १२८ ॥

पुण्यां हिमालयस्यान्ते लुण्ठमानां सरिद्वराम् ।
मार्कण्डेयाश्रमं प्राप्य संलग्ना नीलपर्वते ।
ह्रदीभूता महापुण्या तस्थौ तत्र महानदी ॥ १२९ ॥

तत्र गङ्गां ह्रदवतीं वशिष्ठो मुनिपुंगवः ।
दृष्ट्वा चुकोप भगवान्किमेतदिति कारणम् ॥ १३० ॥

संध्यात्वा सुचिरं कालं ततस्तु मुनिसत्तमः ।
ज्ञातवांस्तत्र मार्कण्डेयं तपस्यन्तं तपोनिधिम् ॥ १३१ ॥

किं करोमीति संचिन्त्य पुनर्ज्ञात्वा महेश्वरम् ।
तत्रस्थं पार्वतीकान्तं पार्वत्या सह पूजितम् ।
तुष्टाव प्रणतस्तत्र देवं वागीश्वरं हरम् ॥ १३२ ॥

वशिष्ठ उवाच ।

महाप्रभो शङ्कर पार्वतीश
शम्भो शिवं त्र्यम्बक विश्वमूर्ते ।
हराव्यय त्र्यक्ष महानुभाव
देवीपते विश्वपते गणेश ॥ १३३ ॥

वृषध्वज शूलपिनाकपाणे
रथाङ्गपाणिप्रिय देवदेव ।
देवेशदेव प्रमथाधिनाथ
शम्भो भवस्त्वां शरणं प्रपद्ये ॥ १३४ ॥

वीणामृदङ्गपणवध्वनिगीतयोव(ग्य ?),
वेदैः पुराणरचितस्तवगीतकीर्ते ।
विश्वम्भर त्रिपुरदैत्यशतान्तकेश
लोकेश मन्मथरिपो शरणं प्रपद्ये ॥ १३५ ॥

श्रीमन्महाकालकलाविलास
प्रजापतेर्यज्ञविनाश भर्गः ।
भक्तप्रियप्राणभृतामधीश
काशीश कैलासनिवास शम्भो ॥ १३६ ॥

हरान्धकानङ्गरिपो सुरेश
मृत्युञ्जयस्त्वं शरणं प्रपद्ये ॥ १३७ ॥

व्यास उवाच ।

एवं स्तुतः स्तुतस्तेन भगवान् शङ्करः स्वयम् ।
आविर्भूय वरं देवः प्रगृहाणेत्युवाच ह ॥ १३८ ॥
ततो वव्रे मुनिस्तत्र शिवात्स मुनिसत्तमाः ।
शर(ण्वा: ?) आश्रमाद्दिव्यात् गतिं वेदविदांवरः ॥ १३९ ॥

गालव उवाच ।

तथेत्युक्ता(क्त्वा ?) स भगवान् विचिन्त्य च मुनेस्तपः ।
उवाच स प्रियां देवीं पार्वतीं प्राणसम्मिताम् ॥ १४० ॥

श्रीशिव उवाच ।

कथमत्र विधातव्यं अनयोः श्रेयमुत्तमम् ।
वशिष्ठस्य प्रतिज्ञा वै कथं पूर्णा भवेदिह ॥ १४१ ॥
कथमत्र मुनेस्तस्य नस्याद्धि तपसः क्षयः ।
एवं विचिन्त्य भगवान् प्रार्वतीं प्राह सत्वरम् ॥ १४२ ॥
गोस्वरूपं विधायाशु यत्रास्ते तपसोनिधिः ।
तत्र याहि महाभागे सुरगन्धर्वपूजिते ॥ १४३ ॥
अहमप्यागमिष्यामि सिंहरूपेण त्व(त्वां ?) प्रति ।
अत्यन्तमहिमां दृष्ट्वा ध्वनिस्तत्र विधीयताम् ॥ १४४ ॥

गालव उवाच ।

सुरभीरूपमास्थाय तथेत्युक्ता(क्त्वा ?) महेश्वरी ।
तमाजगाम यत्रास्ते मार्कण्डेयो महातपाः ॥ १४५ ॥

तस्यानु प्रययौ देवः सिंहरूपेण सत्वरः।
नखदंष्ट्रामयूखैः रवैः(स्वैः) पूरयन्नि भूतले ॥ १४६ ॥

जृंम्भितेन मनुष्याणामसून् संप्रहरन्निव।
तमापतन्तं संप्रेक्ष्य सा गौस्तत्र महाध्वनिम्।
विवर्णवदनातीता चक्रे हि नयनक्रमात् ॥ १४७ ॥

किमेतदिति संचित्य ध्यानादुद्‌वृत्य चक्षुषी।
इतस्ततः पश्यमानो गांस्तत्र स्वमुखे स्थिताम् ॥ १४८ ॥

ददर्श मृगराजेन समाक्रान्तामधोमुखीम्।
विवर्णवदनां दीनां प्रपश्यन्तीं स्वमेव हि ॥ १४९ ॥

सत्वरं समुपस्थाय त्रातुं हाहेत्यपि ब्रुवन्।
महर्षिः प्रययौ यावत्तावत्सा सरितां वरा ॥ १५० ॥

पयः कृत्वा ह्रदं भिन्नं पूरयन्ती स्वनैर्दिशः।
नदीं प्रवाहिता दृष्ट्वा मुनेस्तस्याश्रमाद्वरात् ॥ १५१ ॥

स्वरूपं भगवान्दध्रे भवान्या सह शङ्करः।
पञ्चवक्त्रं दशभुजं त्रिनेत्रं शूलपाणिनम्।
कपालखट्वाङ्गधरं महादेव्या समन्वितम् ॥ १५२ ॥

तमेव देवं व्याघ्रेशं मत्वा व्याघ्रस्वरूपिणम्।
प्रणम्याभीप्सितान् कामान् प्राप्य सत्यं ययौ पुनः ॥ १५३ ॥

वशिष्ठोऽपि महातेजा संस्तुवन् शङ्करं प्रभुम्।
प्रवाहे वाहयित्वा तां शरयूं प्रययौ गृहम् ॥ १५४ ॥

एवप्रा(मा ?)सीन्मुनेस्तस्य समागमनकारणम्।
तत्र वागीश्वराख्ये वै क्षेत्रे देवनिषेविते ॥ १५५ ॥

यथा व्याघ्रस्वरूपेण भगवान् शङ्करः स्वयम्।
मुनिं सम्मोहयामास तथा समुदितं मया ॥ १५६ ॥

तत्रैव पद्मनाभं च पुरीं चण्डीशकल्पिताम्।
वाराणसीं शिलां चापि मार्कण्डेयाख्यपूजिताम् ॥ १५७ ॥

तां दृष्ट्वा तादृशीं भव्यां प्रणेमुस्ते द्विजातयः।
शरयूं च महापुण्यां तथा शिवपुरीं शुभाम् ॥ १५८ ॥

तत्रोचुस्ते जगन्नाथं त्राहि पापाज्जनार्दन।
महिमां चास्य तीर्थस्य प्रब्रूहि कृपया प्रभो।
सर्वेषामेव लोकानां हिताय जगदीश्वर ॥ १५९ ॥

गालव उवाच ।

एतच्छ्रुत्वा स भगवान् मुनीनां भावितात्मनाम् ।
कृपया देवदेवेशः प्रोवाच जगताम्वरः ॥ १६० ॥

श्रीभगवानुवाच ।

हिमाचलतटे रम्या पुण्या मे चरणोद्भवा ।
शरयूलोकपापघ्नी विद्यते सरितां वरा ॥ १६१ ॥

सोमपानफलं तस्याः पिबतां कुरुते जलम् ।
मज्जनाच्चाश्वमेधस्य तर्पणे द्विगुणं फलम् ।
गोमतीसङ्गमे दिव्या सङ्गता सा महानदी ॥ १६२ ॥

तत्र मध्ये महत्क्षेत्रं सर्वपापप्रणाशनम् ।
तदेव सारं सर्वेषां भूलोके शिरमण्डलम् ॥ १६३ ॥

शरयूगोमतीमध्ये पुण्या वाराणसी स्मृता ।
तत्रास्ते पार्वतीनाथो देवो विश्वेश्वरो हरः ॥ १६४ ॥

तन्मध्ये सुमहत्क्षेत्रं प्रख्यातं भूतले स्थितम् ।
वागीश्वरस्य वै विप्राः सर्वपापप्रणाशनम् ॥ १६५ ॥

धर्मार्थकाममोक्षाणां साधनं सर्वकामदम् ।
भुक्ति-मुक्तिप्रदं पुण्यं श्रृण्वतां पापनाशनम् ॥ १६६ ॥

यो मो हिमालयप्रोक्त(?) तस्य कुक्षौ महेश्वरः ।
वागोशेति च विख्यातः शिवनाभिः सुपूजितः ॥ १६७ ॥

तुहिन गिरेः पञ्च शिखराणि विभोः परमेश्वरस्य शिरांसि वरदारुकाननं चरणौ। करमपि विद्धि भुवनेश्वरवामकम् । कमलजविभोश्च दक्षिणकरो विभाण्डेश्वरः ॥ १६८ ॥

सन्निधौ देवदेवस्य सन्ति तीर्थानि यानि च ।
तेषां मयी (पी ?)ह सर्वेषां प्रकाशः क्रियते मया ॥ १६९ ॥

यानि सन्तीह तीर्थानि देवदेवस्य सन्निधौ ।
तानि सर्वाणि वक्ष्यामि अन्तर्गृहगतानि च ।
सर्वेषां तु समासेन तीर्थयात्रा(त्रां?) प्रवच्य(च्म्य?)हम् ॥ १७० ॥

गोमतोशरयूमध्ये पुण्यौ नीलगिरिः स्मृतः ।
तस्याधोरचिता चास्ति दिव्या वाराणसी पुरी ॥ १७१ ॥

तस्या मध्ये स वागीश(ः) तीर्थराजेति गीयते ।
शिवनाभि[ः] स विख्यातो देवो वागीश्वरो हरः ॥ १७२ ॥

तत्र गत्वा नरः सम्यक् भुंक्तिं मुक्तिं च विन्दति ।
चिन्तयन्संस्मरन्वापि देवं वागीश्वरं हरः (रम्?) ॥ १७३ ॥

जायते मुक्तिरव्यग्रा महापातकी(कि?)नामपि ।
दर्शनात् पूजनाद्ध्यानात् तथा संस्पर्शनादपि ॥ १७४ ॥

वागीशस्य महाभागा मुक्तो भवति तत्क्षणात् ।
पितृहा मातृहा चैव गुरुघ्नो ब्रह्महा तथा ॥ १७५ ॥

गोस्त्रीपशुघ्नबालघ्नो गरदो विषदस्तथा ।
स्वामिहा पतिहा रौद्रो अग्निदो वृषलीपतिः ॥ १७६ ॥

अनेकपापराशिस्थः शिवद्वेषकरस्तथा ।
शिवनाभिमयं सोथ गत्वा निःकल्मषो भवेत् ॥ १७७ ॥

तत्र ये प्राणिनो जातु संत्यजन्ति कलेवरम् ।
भक्तिहीनापि सायुज्यं यान्ति सर्वे न संशयः ॥ १७८ ॥

काश्यादिषु च तीर्थेषु तावन्मृत्युर्विशिष्यते ।
यावद्वागीशदेवस्य सन्निधौ न मृतः पुमान् ॥ १७९ ॥

या सन्ती(ती ?) तत्र देवस्य सन्निधौ सह गच्छति ।
स कोटिकुलमुद्धृत्य शिवलोकं प्रयाति वै ॥ १८० ॥

येन दृष्टं महापुण्यं तीर्थं वागीश्वराह्वयम् ।
तेन दृष्टा मही सर्वा सप्तद्वीपा ससागरा ॥ १८१ ॥

तेनोद्धृतानि सर्वाणि कुलानि मुनिसत्तमाः ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ १८२ ॥

पुरा कृतयुगस्यादौ श्वेताश्वो नाम भूपतिः ।
बभूव नगरे रम्ये प्रद्योताख्ये सुशोभने ॥ १८३ ॥

वार्द्धकेऽभूत्सुतस्तस्य अग्निधो(अग्नीध्रो ?) न(ग्नि?)शिखोपमः ।
जघान पितरं पापो राज्यलोभेन मोहितः ॥ १८४ ॥

स पोषितोऽपि तेनाथ विषं दत्वा च दुर्मतिः ।
मृते पितरि दुःखार्तो लोकान्विश्वासयन्निव ॥ १८५ ॥

वह्निसंयोगमन्विच्छन्नमात्यैर्विनिवारितः ।
तस्योर्ध्वदैहिकं कृत्वा राजा राज्यमपालयत् ॥ १८६ ॥

ततः कुष्ठं शरीर(रे ?)स्य बभूवातीवदुःसहम् ।
कुष्ठं दृष्ट्वा शरीरेसौ चिन्तयामास भूपतिः ॥ १८७ ॥

कथमेतत् कृतं पूर्वं मूढात्मा स विचिन्तयत् ।
ततः सर्वैः पुरीत्यक्तो बान्धवैः सेवकैः क्षणात् ॥ १८८ ॥
भ्रष्टश्रीकः स पापात्मा ययौ दुर्वाससाश्रमम् ।
स पृष्टस्तेन धर्मात्मा प्रोवाच कृपया मुनिः ॥ १८९ ॥

दुर्वासा उवाच ।

दुःकर्म भवतां राजन् कृतं पितृनिपातनात् ।
काश्यादिषु च तीर्थेषु पुण्यक्षेत्रेषु वै तथा ॥ १९० ॥
दुःखित्वापि(?) महत्पापं न विनश्यति वै नृप ।
जन्मकोटिसु भोज्यन्ते दुःकृतं येन नश्यति ॥ १९१ ॥
तदहं कथयिष्यामि याहि त्वं हिमपर्वते ।
शरयू गोमतीसङ्गे सङ्गमे यत्र सङ्गमे(ता ?) ॥ १९२ ॥
तत्र वाराराणसी चास्ति काश्यात्कोटिगुणा स्मृता ।
राजते तत्र मध्ये वै देवो वागीश्वरो हरः ॥ १९३ ॥
तत्र गत्वा महेशस्य दर्शनात् पूजनादपि ।
पापच्युतित्वमाप्नोति शिवनाभ्यभिलोकनात् ॥ १९४ ॥

श्रीभगवानुवाच ।

इति श्रुत्वा मुनेस्तस्य वाक्यमग्नि(ग्नी ?)ध्रभूपतिः ।
यात्रां तस्य कथं जाने प्रवेशो निर्गमस्तथा ॥ १९५ ॥
कीदृशी महिमा तस्य तीर्थराजस्य शाश्वती ।
यानि तीर्थानि देवस्य सन्निधौ सन्ति तानि वै ॥ १९६ ॥
प्रब्रूहि तानि सर्वाणि तथा पूजाविधिं द्विज ।
वागीश्वरस्य चाख्यानं समासेन वदस्व मे ॥ १९७ ॥

दुर्वासा उवाच ।

धन्योऽसि नृपशार्दूल गतास्ते पापकोटयः ।
वागीश्वरकथायां वै संजाता मतिरीदृशी ॥ १९८ ॥
जाह्नवी यैस्तु संस्नाता पूर्वं जन्मशतत्रये ।
शरयूगोमतीमध्ये यान्ति वागीश्वरं हि ते ॥ १९९ ॥
काशीभुवं च संत्यज्य तथा कैलाशपर्वतम् ।
शरयूं न हि तत्याज्य शङ्करः प्रेयसी यतः ॥ २०० ॥

शरयूं जाह्नवीं विद्धि यमुनां विद्धि गोमतीम् ।
विन्ध्यं नीलाचलं राजन्साक्षात्काञ्चनसन्निभम् ॥ २०१ ॥

अश्वत्थमक्षयवटं माधवं विन्ध्य(बिन्दु)माधवम् ।
प्रयागं तीर्थराजं च विद्धि सङ्गमध्यगः(गम्?) ॥ २०२ ॥

विश्वेश्वरं च वागीशं पुरीं चण्डीशकल्पिताम् ।
विद्धि वाराणसीं दिव्याम् उत्तरस्यां शिवप्रिया ॥ २०३ ॥

पिपीलिकाद्याः कृमिमक्षिकादयः शिवाः पिशाचाः जलजाश्च भूचराः ।
मृता विमानं त्रिदशैर्निषेवितामवाप्य यां यान्ति शिवार्चकाः किमु ।२०४।

तीर्थेऽस्मिन्वै महाभागाः प्रकुर्वन्ति शिवार्चनम् ।
पूजितोस्त्वीह विश्वेशस्तैरेवाद(ब्द ?)शतत्रये ॥ २०५ ॥

गुञ्जामात्रेण स्वर्णेन पुमान्वागीश्वरं हरम् ।
धनं स विपुलं प्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥ २०६ ॥

परत्र च शिवं याति कुलकोटिसमन्वितः ।
वागीश्वरसमं तीर्थं शरयूसम्मिता नदी ॥ २०७ ॥

नास्ति नास्ति महाभागाः पुण्ये लोकत्रयेष्वपि ।
काशीकोटिगुणं पुण्यं वक्तुं येषां न शक्यते ।
प्राप्यते नृपशार्दूल तस्मात्कोन्यतमो वरः ॥ २०८ ॥

गोभूतिलहिरण्यानां नानारत्नदिवाससाम् ।
दानं चरन्ति ये राजन् ते मुक्ताः सन्ति भूतले ॥ २०९ ॥

पापात्मानोऽपि राजेन्द्र यत्र शम्भोः परं पदम् ।
यान्ति संस्मरता(णा?)देव वागीशस्य शिवस्य च ॥ २१० ॥

निःकामोऽपि महेशस्य पदं यः स्मृ(स्पृ ?)शति प्रभोः ।
स याति मन्दिरं शम्भोः प्रार्थितं देवदानवैः ।
पापात्मानोपि देवस्य मन्दिरे यान्ति वै शृणु ॥ २११ ॥

सुबलो नाम धर्मिष्ठो वैश्योऽभून्नृपसत्तम ।
स धनी सर्वधर्मज्ञो धर्मशास्त्रार्थकोविदः ॥ २१२ ॥

दशांशं प्रददौ सै(वै ?)श्यो द्विजेभ्यो धर्मशास्त्रवित् ।
अनपत्यः स धर्मात्मा पुत्रार्थं प्रार्थवा(य ?)न्नृपः ॥ २१३ ॥

वृद्धे वयसि धर्मात्मा प्राप पुत्रद्वयं शुभम् ।
नानाविधेन पुण्येन भक्त्या शिवमुकुन्दयोः ॥ २१४ ॥

तयोर्नामाकरोत्तातः स चानन्दान्निधीति वै ।
पुण्डरीकेति चान्यस्य सुबलो धर्मवल्लभः ॥ २१५ ॥

बाल्ये वयसि विक्रान्तौ दृष्ट्वा लोके सुखं हि तौ ।
सन्तौ(सुतौ ?) स(सु ?)पोषितौ तेन पुत्रिणा प्राप्तयौवनौ ॥ २१६ ॥

तत्यजुः पितरं वृद्धं कामार्तौ रतिलालसौ ।
वीतरागस्ततो वैश्यो गृहं त्यक्त्वा वनं ययौ ॥ २१७ ॥

गते पितरि धर्मात्मा निधिः पुण्यं चकार ह ।
पितृवद्यज्ञकर्माणि तथा ब्राह्मणपूजनम् ॥ २१८ ॥

कनिष्ठः पुण्डरीकस्तु पापः स्वामातरं नयत् ।
गते पितरि संरन्तुं तया सह स दुर्म्मतिः ॥ २१९ ॥

तस्य तादृक् मतं बुद्ध्वा तत्यजुर्भ्रां(ज्ञा ?)ति बान्धवाः ।
भ्रात्रा चापि परित्यक्तो स पापो विपिनं ययौ ॥ २२० ॥

ततो बहुतिथं कालं रेमे दुष्टस्तया सह ।
पर्वतेषु च रम्येषु नदीषु च महासु च ॥ २२१ ॥

ततः कालेन महता मृतां हित्वा शुभव्रताः (तां ?) ।
ययौ स भोजनृपतेः सभायां दुष्टमानसः ॥ २२२ ॥

तत्र भोजसभायां च नृत्यन्तं स्त्रीकदम्बकम् ।
तासां मध्ये प्रनृत्यन्तीं प्रददर्शाब्जलोचना (नाम्) ॥ २२३ ॥

पूर्णचन्द्रमुखीं रामां उर्वशीसदृशां वराम् ।
दृष्टिपातेन लोकानां तेजोबलविनाशिनीम् ॥ २२४ ॥

गतासूनिव कुर्वन्ती कामबाणेन मानवान् ।
तां दृष्ट्वा तादृशीं रम्यां नृत्यान्ते स विटाधमः ॥ २२५ ॥

म(त ?)या सार्द्धं ययौ तस्या गृहं वैदूर्यशोभितम् ।
वतः प्राप्य गृहं रम्यं रेमे पापस्तया सह ॥ २२६ ॥

गृहे तस्यातिशोभाढ्ये वैदूर्य्यमणिशोभिते ।
पिबंस्तस्याधरं दुष्टो रेमे वर्षशतं नृप ॥ २२७ ॥

ततः काले व्यतीते तु वैश्यः पञ्चत्वमागतः ।
नीतो याम्यैर्यमपुरं हाहेति च वदन् मुहुः ॥ २२८ ॥

पपात नरकं घोरं प्राक्तनेनैव कर्मणा ।
तामिस्रादिषु पुण्येषु नरकेषु पुनः पुनः ॥ २२९ ॥

पच्यमानः स पापात्मा कुम्भीपाकं जगाम ह।
तत्रापि नरकान्घोरान् भुक्त्वान्येषु नरेश्वरः ॥ २३० ॥

जगाम नरकेष्वेव नानादुःखप्रदेषु च।
तै(कि ?)लासपूयःपूर्णेषु क्षिप्तोऽसौ यमकिङ्करैः ॥ २३१ ॥

तत्र तत्र स्वमांसं हि खादन्नदा(ब्दा)युतं नयत्।
स रुदन्नरकान्घोरान्बुभुजे स्वेन कर्मणा ॥ २३२ ॥

निधिस्तु नृपशार्दूल स्वेन पुण्येन धर्मवित्।
जगाम देवगन्धर्वैः सेवितं शिवमन्दिरम् ॥ २३३ ॥

बुभुजे विषयान्भोगान्स निधिः शङ्करप्रियः।
किञ्चित्पापावलिप्ताङ्गं किञ्चित्कालेन शङ्करः ॥ २३४ ॥

किङ्करान्नरकं ह्येनं दर्शयन्नित्युवाच ह।
प्रत्यागच्छत मे लोके दृष्ट्वाथ यमयातनाम् ॥ २३५ ॥

अथ ते किङ्कराः सर्वे तथेत्युक्त्वा महेश्वरम्।
प्रक्रम्य ते यमपुरं ययुर्वै निधिना सह ॥ २३६ ॥

भ्रात्रोः समागमश्चाभूत् तयोस्तत्र नरेश्वर।
पापेभ्यो स विमुक्तोभून्निधिस्तु क्षणमात्रतः ॥ २३७ ॥

पातकेभ्यो विमुक्तं तमथोचुः शिवकिङ्कराः।
व्रजास्माभिश्च सहितो लोकनाथस्य मन्दिरम् ॥ २३८ ॥

त्वमस्मान्निरयावासात्सेवितोप्सरसां गणैः।
न ह्येते नारकाः सर्वे पापिष्ठाः पापयोनयः।
यान्ति शिवपुरं रम्यं देवर्षिगणसेवितम् ॥ २३९ ॥

पश्येदं कृतिनां लोकं पिब त्वमृतं स्मृतम्।
उत्तिष्ठोत्तिष्ठ भद्रं ते पश्यस्व शिवमन्दिरम् ॥ २४० ॥

दुर्वासा उवाच।

इत्युक्तस्तैः शिवगणैर्भ्रातरं पुरतः स्थितम्।
दृष्ट्वोवाच स धर्मात्मा निधिस्तद्वाक्यसारवित् ॥ २४१ ॥

निधिरुवाच।

यातनापीडितं दृष्ट्वा भ्रातरं प्राणसम्मितम्।
न मे शिवगृहे प्रीतिर्न मेऽस्ति त्रिदशालये।
भ्रात्रा सहैव स्थास्यामि नरके पापभाजनः ॥ २४२ ॥

शिवगणा ऊचुः ।

न तेनाराधितः शम्भुर्न च सन्तर्पिता द्विजाः ।
तिष्ठत्वत्रैव पापात्मा शम्भोस्त्वया हि मन्दिरम् ॥ २४३ ॥

निधिरुवाच ।

दृष्ट्वा(इष्टा ?) पूर्तादिकं पुण्यं किं मया चरितं विभो ।
साम्प्रतं केन पुण्येन दृष्टं शम्भोः पुरं मया ॥ २४४ ॥

दुर्वासा उवाच ।

तस्य तद्वचनं श्रुत्वा प्रोचुस्ते पूर्वजन्मनः ।
स्मारयंस्तस्य तत्पुण्यं केवलं श्रीपदं शुभम् ॥ २४५ ॥

गणा ऊचुः ।

त्वयातिसुकृतं पूर्वे जन्मन्यस्मा(स्याच् ?) चतुर्दशे ।
वागीश्वरमये क्षेत्रे शिवार्चनमुपोषणम् ॥ २४६ ॥

चन्द्रशेषाख्यनृपतेः शिवपूजामहोदयम् ।
दृष्ट्वा त्वमिह धर्मज्ञ प्राप्तोऽसि शिवमन्दिरम् ॥ २४७ ॥

राजासीत्कारवीराख्ये चन्द्रशेषः प्रजेश्वरः ।
नयेनपालयंल्लोकान् शशास सकलां महीम् ॥ २४८ ॥

एकदा स च धर्मात्मा पुत्रदारसमन्वितः ।
महत्या सेनया मु(यु?)क्तो ययौ वागीश्वरं नृपः ॥ २४९ ॥

स तत्र सपरीवारो समारेभे शिवार्चनम् ।
दीपमालाशतैर्युक्तां पुष्पाभरणशोभिताम् ॥ २५० ॥

दृष्टवानसि धर्मज्ञ पूजां तेन विकल्पिताम् ।
प्रयुक्तां रत्नकलशै(शैस्) तृष्णया त्वमुपागतः ॥ २५१ ॥

पूजां समाप्य राजर्षिः परिवारसमन्वितः ।
कृत्वा जागरणं रात्रौ समुपोष्य गृहं ययौ ॥ २५२ ॥

ससैन्यामात्यसुहृदः कालेन स महीपतिः ।
मृतः शिवपुरं रम्यं पूज्य वागीश्वरं ययौ ॥ २५३ ॥

त्वयापि तत्र धर्मज्ञ दृष्ट्वा तच्छिवपूजनम् ।
कृतस्नातस्ति(स्नानोसि ?)शरयू तथा प्रक्रमणं विभोः ॥ २५४ ॥

तेन पुण्येन त्वं भोगान् भुक्त्वा सप्तसु जन्मसु ।
द्विगुणेष्विहि प्राप्तोसि जन्मन्यस्मिन्शिवालये ॥ २५५ ॥

यत् त्वया दुःकृतं पूर्वं कृतं दृष्ट्वेह यातनाम् ।
गतं ते नारकीं शम्भोः पदं पश्यस्व माचिरम् ॥ २५६ ॥

यद्यस्ति नारकी चिन्ता भ्रातुर्मनसि ते शुभा ।
तर्हि वागीश्वराख्यानं श्रावयस्व समाहितः ॥ २५७ ॥

दुर्वासा उवाच ।

इत्युक्तः स निधिः पुण्यां कथां तस्मै प्रकीर्त्तयत् ।
वागीश्वरगुणोपेतामितिहाससमन्विताम् ।
मोक्षमार्गकरीं रम्यां विचित्रार्थपदानुगाम् ॥ २५८ ॥

श्रुत्वाथ नारकाः सर्वे विमुक्ताः पापराशिभिः ।
अधिरुह्य विमानाग्रे सर्वे शम्भोः पदं ययुः ॥ २५९ ॥

पुण्डरीकोपि संश्रुत्य कथां वागीश्वरस्य हि ।
मात्रा सार्द्धं शिवगृहं ययौ देवर्षिसेवितम् ॥ २६० ॥

नारकापि विचित्रार्थां कथां श्रुत्वा शुभार्थदाम् ।
निधेः कृतस्य पुण्यस्य तथा संप्राप्य शाङ्करः(रं?)।
पदं प्राप्तं निधेस्तस्य प्रसादान्नृपसत्तम ॥ २६१ ॥

तस्मात्त्वमपि राजर्षे दृष्ट्वा वागीश्वरं हरम् ।
सुकृतस्य परां वृद्धिं प्राप्स्यसीह विशांपते ॥ २६२ ॥

गलत्कुष्ठं शरीरं ते दर्शनाद्भास्करोपमम् ।
भविष्यति महाबाहो नास्त्यत्र संशयो ध्रुवम् ॥ २६३ ॥

प्रवेशं निर्गमं वापि शृणुष्व नृपसत्तम ।
तच्छ्रुत्वापि महापापान्मुच्यते नात्र संशयः ॥ २६४ ॥

वह्नितीर्थे च संस्नात्वा वरुणायाश्च मध्यगे ।
प्रजापतिं च संपूज्य अश्वमेधफलं लभेत् ॥ २६५ ॥

तत्र तीर्थे स्वयं ब्रह्मा वाजिमेधं महाक्रतुम् ।
चक्रे तत्रापि संस्नात्वा लभेत्पुण्यं सुदुष्करम् ॥ २६६ ॥

बाणह्रदं ततो गत्वा कृत्वा स्नानं सचैलकम् ।
मुण्डनं पितृश्राद्धं च विधायाशु परं व्रजेत् ॥ २६७ ॥

शमदं च महातीर्थं स्नात्वा सम्पूज्य शङ्करम् ।
कृत्वा श्राद्धं पितॄणां तु कुलानां तारयेच्छतम् ॥ २६८ ॥

तत्रोत्तीर्य महाबाहो ईशानं लोकपूजितम् ।
स्नात्वा सम्पूज्य संतर्प्य मन्त्रं जप्त्वा शिवात्मकम् ॥ २६९ ॥

तारयित्वा कुलांस्तत्र दश पूर्वान्दशोत्तरान् ।
पितृकृत्यं विधायाशु ततो गोदावरीं व्रजेत् ॥ २७० ॥

स्नात्वा कुलान् समुत्तीर्य कालिन्दीसङ्गमे स्थितम् ।
तीर्थे स्नात्वा ततः सम्यक् शिवसायुज्यमश्नुते ॥ २७१ ॥

तदूर्ध्वं च महातीर्थं स्नात्वा पापप्रणाशनम् ।
पूज्य चन्द्रोदरीं देवी तीर्थं वागीश्वराह्वयम् ॥ २७२ ॥

असंस्कृतप्रमि(मी ?)तानां तर्पयित्वा परां गतिम् ।
कृत्वोद्ध्वं रुद्रकुण्डाख्ये कुण्डे स्नानं विधाय च ॥ २७३ ॥

विधाय शतरुद्रीयं तस्मिन् तीर्थे नरेश्वरः ।
तस्मादधः पुराणाख्ये तीर्थे स्नात्वा कृतक्रियः ॥ २७४ ॥

शरयूगोमतीमध्ये गत्वोर्ध्वं ऋणमोचनम् ।
तत्र स्नानं विधायाशु कृत्वा सर्वां पितृक्रियाः(याम्?) ।
ऋणत्रयविनिर्मुक्तो जायते नात्र संशयः ॥ २७५ ॥

तदूर्ध्वं गोमतीतीरे भूकुण्डं(ण्डस्थं ?)व्रजेच्छिवम् ।
तर्पयित्वा तिलजलैः पितॄणां तारयेच्छशतम् ॥ २७६ ॥

चक्रतीर्थं ततो गत्वा तदूर्ध्वं स्नानमाचरेत् ।
देवं संपूजयेत् तत्र नन्दिना स्कन्दिना तथा ।
सेवितं पूज्य देवेशं पितॄनुत्तारयेच्छतम् ॥ २७७ ॥

तदूर्ध्वं देवदेवेशं गत्वा स्नात्वा जगद्गुरुः(रुम्?) ।
अर्चयित्वा पितॄणां वै अयुतं तारयेन्नरः ॥ २७८ ॥

तदूर्ध्वं चन्द्रभागायां सङ्गमे विधिपूर्वकम् ।
स्नात्वा चन्द्रेश्वरं देवं पूजयेद् ह्लदमध्यगम् ॥ २७९ ॥

तदूर्ध्व शेषभागायाः सङ्गमे शेखरेश्वरम् ।
अर्चयित्वा शिवपुरं प्राप्नुयात्तत्र मानवम्(वः ?) ॥ २८० ॥

तदूर्ध्वं गोमतीमध्ये गृञ्जनाख्यं महाह्लदम् ।
गत्वा स्नात्वा पितृन्सर्वांनुत्तार्य शिवमश्नुते ॥ २८१ ॥

सम्पूज्य गोमतीं गत्वा शरयूं पुनरेव हि ।
समागत्य च संस्नात्वा पूजयेद्बिन्दुमाधवम् ॥ २८२ ॥

तर्पयित्वा पितॄगणान् श्राद्धं कृत्वा तु मानवः ।
शिवलोकमवाप्नोति कुलकोटिसमन्वितः ॥ २८३ ॥

भागीरथी महापुण्या सरयूसङ्गमे गता।
स्नात्वा सम्पूजयेद्देवं सेतुबन्धं महेश्वरम्।
गवां कोटिप्रदानस्य फलमाप्नोति मानवः॥ २८४॥

तदूर्ध्वं च मानक्षेत्रं ध्रुवाख्यं सर्वकामदम्।
तत्र गत्वा समभ्यर्च्य महादेवं ध्रुवेश्वरम्।
पितृकृत्यं विधायाशु प्राप्नुयात्परमं पदम्॥ २८५॥

कार्णटकमहादेव(वस् ?) तस्मादूद्ध्र्वं महेश्वरः।
स्नात्वा श्राद्धं प्रकृत्याशु कुलानां तारयेच्छतम्॥ २८६॥

ततः परं हि रामाख्यं तीर्थमस्ति सुशोभनम्।
स्नात्वा पितॄंश्च संतर्प्य सर्वयज्ञफलं लभेत्॥ २८७॥

तस्मादूर्द्ध्वप्रदेशे तु पुष्करक्षेत्रमुत्तमम्।
तत्र स्नात्वा शिवपुरं प्राप्नोति मनुजो नृपम्(प?)॥ २८८॥

तदूर्द्ध्वं सुरभीसङ्गं तीर्थमस्ति सुशोभनम्।
वामेऽथ सुरभीं देवीं पूज्य संतर्पयेत्पितॄन्।
श्राद्धं सम्यक् विधायाशु ब्रह्मलोके महीयते॥ २८९॥

सुरभीसङ्गमे स्नात्वा नन्दायाः सङ्गमे व्रजेत्।
स्नात्वा पितॄन्समुत्तार्य शिवलोकं व्रजेन्नरः॥ २९०॥

गत्वा तस्मादूर्ध्वभागे कणमाटीश्वरं हरम्।
शरय्वा ह्रदमध्यस्थं समय(र्च्य ?) शिवमश्नुते॥ २९१॥

तदूद्ध्र्वस्थं महाभाग ह्रदान्तःस्थं महेश्वरम्।
चन्द्रेश्वरं समभ्यर्च्य सर्वकामार्थदं शुभम्॥ २९२॥

देवं त्रिविक्रमं राजन् तदूद्ध्र्वं पूज्य मानवः।
शिवलोकमवाप्नोति शिवेन सह मोदते॥ २९३॥

अत्रितीर्थं ततो गत्वा स्नात्वा संन्तर्प्य वै पितॄन्।
अर्चयित्वा च कपिलं शिवलोके महीयते॥ २९४॥

तस्मादूद्ध्र्वं कुबेराख्ये तीर्थे स्नात्वा यथाविधि।
धनदं पूज्य मनुजो धनहीनो न जायते॥ २९५॥

तस्मादधः कपालाख्यं सूर्यकुण्डं ततः स्मृतम्।
शरयूमध्यगं स्नात्वा सूर्यकोटिसमो भवेत्॥ २९६॥

तस्मादधःप्रदेशे तु चाणक्यं नाम तीर्थकम्।
चाणक्याख्यं महादेवं पूज्य सन्तर्प्य वै पितॄन्॥
अश्वमेधादियज्ञानां फलमाप्नोति मानवः॥ २९७॥

ततोधः काश्यपे तीर्थे स्नात्वा सन्तर्प्य वै पितॄन् ।
काश्यपं काश्यपीं देवीं पूज्य याति परां गतिम् ।। २९८ ।।

तस्मादधो विमुक्ताख्ये तीर्थे स्नात्वा यथाविधि ।
अविमुक्तेश्वरं देवं समभ्यर्च्य नरेश्वर ।। २९९ ।।

पितृमातामहानां च तारयित्वा शतं शतम् ।।
रुद्रसायुज्यतां याति मानवो मुनिसत्तमाः ।। ३०० ।।

तस्माद्दक्षिणभागे वै हंसतीर्थमिति स्मृतम् ।
यत्राराध्य शिवं हंसो लेभे शिवपुरीं शुभाम् ।। ३०१ ।।

तस्मिन् क्षेत्रे नरः स्नात्वा [श्राद्धं कृत्वाः ?] यतव्रतः ।
कुलानां शतमुत्तीर्य नरः सायुज्यमश्नुते ।। ३०२ ।।

ततः परं महातीर्थं रुद्रद्वारमिति स्मृतम् ।
तत्र स्नानं विधायाशु पूर्ववत्पितृतर्पणम् ।। ३०३ ।।

नन्दिरुद्रं प्रपूज्याशु महाकालं प्रपूजयेत् ।
क्षेत्रपालं नमस्कृत्य शम्भोरन्तःपुरं व्रजेत् ।। ३०४ ।।

तत्र कालीं कपालीं च देवीं वै जद्‍ग(ह्नु?)जां तथा ।
सावित्रीं शारदां चापि समर्च्याशु शिवं व्रजेत् ।। ३०५ ।।

ततो ब्रह्मशिलायां तु पितृश्राद्धं विधाय वै ।
शिवलोकमवाप्नोति पितृभिः सह मानवः ।। ३०६ ।।

शेषतीर्थे ततः स्नात्वा प्रभासाख्ये ततः परम् ।
तत्र स्नात्वा च मनुजो पितृकृत्यं विधाय च ।
कुलायुतं समुत्तीर्य शिवलोके महीयते ।। ३०७ ।।

ततः कनखलाख्ये वै तीर्थे स्नात्वा च मानवः ।
कणमात्रं द्विजातिभ्यः स्वर्णं दत्त्वा महेश्वरः ।
मेरुदानं समं लब्ध्वा नरो यति परां गतिम् ।। ३०८ ।।

ततः परं महातीर्थं सर्वपापप्रमोचनम् ।
तत्र ब्रह्मा विमुक्तोभूद् दुहितृगमनाद्भयात् ।
तत्र स्नात्वा च पापेभ्यो मुच्यते नात्र संशयः ।। ३०९ ।।

कामदेवेपि संस्नात्वा तथा विमलसंज्ञके ।
वेणुजामध्यगे नित्यं समर्च्य सबलं हरिम् ।
पितृकृत्यं विधायाशु मानवो निर्मलो भवेत् ।। ३१० ।।

परं हि विश्वनाथाख्यं तीर्थमस्ति सुशोभनम् ।
स्नात्वा तत्र विधानेन स्नानं कृत्वा च मानवः ॥ ३११ ॥

विश्वनाथं समभ्यर्च्य काश्याः कोटिगुणं फलम् ।
गयाश्राद्धं तथैवात्र प्राप्नुयान्नात्र संशयः ॥ ३१२ ॥

स्नात्वा विद्याधरे तीर्थे मुक्तिदेये ततः परम् ।
सङ्गमाख्ये महातीर्थे सङ्गमध्ये ततः परम् ॥ ३१३ ॥

मार्कण्डेयशिलां दिव्यां समर्च्य विधिपूजनम् ।
वेणीमध्ये महाक्षेत्रं स्नात्वा श्राद्धं विधाय च ।
अश्वमेधस्य यज्ञस्य फलं सम्प्राप्नुयान्नरः ॥ ३१४ ॥

वेणिमध्ये महादण्डं स्नात्वा कृत्वा पितृक्रियाम् ।
आब्रह्मभुवनाँल्लोकान् देवर्षिपितृमानवा(वान् ?) ॥ ३१५ ॥

तर्पयित्वा महाभाग गच्छेद्वागीश्वरं हरम् ।
समर्च्याशु महाकालं गच्छेद्वागीशसन्निधौ ॥ ३१६ ॥

यस्य दर्शनमात्रेण शिवदेहो भवेन्नरः ।
योऽयं वागीशसंज्ञो वै शिवनाभिरिति स्मृतः ॥ ३१७ ॥

दृष्टमात्रे हरेत्पापं मानवानां दुरात्मनाम् ।
यमर्चंति महेन्द्राद्याः सर्वे वै त्रिदिवौकसः ॥ ३१८ ॥

तं समर्च्याथ मनुजो शिवदेहो भवेत्सदा ।
तस्य पूजाविधिं चापि शृणुष्व सुसमाहितः ॥ ३१९ ॥

अर्चयित्वा दिनकरं गणेशं नन्दिनं तथा ।
ब्रह्माणं क्षेत्रपालं च तथा नारायणं हरिम् ॥ ३२० ॥

वृषभं चापि सम्पूज्य देवं वागीश्वरं पसेत(व्रजेत् ?) ।
जप्त्वा शिवात्मकं मन्त्रं कृत्वाङ्गन्यासमादरात् ॥ ३२१ ॥

षडङ्गानि ततो न्यस्य अभिषिच्य च शङ्करम् ।
आधाराधीश(शं ?)सम्पूज्य मूलेन स्नापयेच्छिवम् ॥ ३२२ ॥

ततः पञ्चामृतेनैव स्नापयित्वा महेश्वरम् ।
शुद्धतोयेन संस्नात्वा अर्धं संस्थाप्य मानवः ॥ ३२३ ॥

देवमावाहयेद्राजन् पार्वत्या सह शङ्करम् ।
इह संतिष्ठ संतिष्ठ पार्वत्या सह शङ्कर ॥ ३२४ ॥

गृहाण मत्कृतां पूजां यथाविधि समन्विताम् ।
द्वादशाक्षरमन्त्रेण ततो ध्यायेन्महेश्वरम् ॥ ३२५ ॥

षट्त्रिंशत्वर्णमात्रेण पाद्यं दत्वा ततः परम्।
अर्घं तेनैव मन्त्रेण स्नानादिकरणं तथा॥ ३२६॥

पञ्चाक्षरेण मन्त्रेण पूजयेत्परमेश्वरम्।
वषट् स्वाहेति वै धूपं दीपे हुंफट् प्रकीर्त्तयेत्॥ ३२७॥

नैवेद्यं चापि सम्पूज्य विसर्जनविधिं तथा।
षडक्षरेण मन्त्रेण विधातव्यं नरेश्वर॥ ३२८॥

ततः प्रदक्षिणीकृत्य प्रणम्य च पुनः पुनः।
बद्धाञ्जलिपुटो राजन् पठेत्स्तोत्रं समाहितः॥ ३२९॥

नमस्ते देवदेवाय महाकालाय शूलिने।
वृषध्वजाय देवाय वृषवाहाय ते नमः॥ ३३०॥

पशूनां पतये तुभ्यं नमोन्धकविनाशिने।
कालाय कालरुद्राय शम्भवे भीमबाहवे॥ ३३१॥

नमो वाक्पतये तुभ्यं नमस्तुभ्यं कर्पर्दिने॥ ३३२॥

नमस्त्र्यक्षाय देवाय वागीशाय नमो नमः।
नमोत्त(स्तु ?)त्रिपुरघ्नाय भवानीपतये नमः।
नीलकण्ठाय देवाय नमो वागीश्वराय ते॥ ३३३॥

इदं स्तोत्रं पठित्वा तु प्रणम्य वृषभध्वजम्।
भवानीं चापि सम्पूज्य ततो निःक्रमणं चरेत्॥ ३३४॥

निःक्रम्य नृपशार्दूल ततो वाणेशसन्निधौ।
तत्र गत्वा विलिख्याशु श्लोकमेकं शुभार्थदम्॥ ३३५॥

वाणेश्वर महादेव त्वत्प्रसादात्कृता मया।
यात्रा साङ्गफला मेऽस्तु साक्षी भव महेश्वरः॥ ३३६॥

विलिख्य च विनिःक्रम्य गच्छेन्नीलाचले नृप।
नीलकण्ठं महादेवं तत्रस्थं पूज्य मानवः॥ ३३७॥

काश्यादीनां च क्षेत्राणां स यात्राफलमश्नुते।
दिव्यदेहश्च मनुजो जायते नात्र संशयः॥ ३३८॥

प्रवेशो निर्गमश्चापि मया सम्यक् प्रकीर्तितः।
तत्र पापसहस्राणां निःकृतिस्ते भविष्यति।
तत्र गच्छ महाभाग दिव्यं देहो भविष्यति॥ ३३९॥

श्रीभगवानुवाच ।

तथेत्युक्त्वा समर्च्याशु तं मुनिं नृपसत्तमः ।
ययौ तस्मिन्महाक्षेत्रे यत्र जागर्ति शङ्करः ॥ ३४० ॥
शतोदितेन विधिना प्रविश्य स नरेश्वरः ।
स्नानदानादिकं सर्वं तथा श्राद्धं विधाय च ॥ ३४१ ॥
वागीश्वरं समर्च्याथ दिव्यदेहो बभूव ह ।
देहं देवोपमं प्राप्य निःक्रम्य च यथाविधि ॥ ३४२ ॥
शासयित्वा च वसुधां ययौ शिवपुरं नृपः ।
क्रीडतेद्यापि तेनैव सुपुण्येनाप्सरोगणैः ॥ ३४३ ॥
शिवलोके महाभाग सेव्यते किन्नरोरगैः ।
तस्माद्यूयं महाभागाः सर्वशास्त्रविशारदाः ।
क्षेत्रं तमेव जानन्तु मुक्तिमार्गप्रदं शुभम्ः । ३४४ ॥
मा काशीं मा च विश्वेशं मा प्रयागं तपोधना ।
जानन्त्वेकं हि वागीशो(शम्) शरयूतोयसेवितम् ॥ ३४५ ॥

गालव उवाच ।

इति स्तुत्वा महात्मानः कपिलाद्यास्तपोधनाः ।
प्रणम्य विष्णुं गोपीशं बभूवुर्निश्चला हि ते ॥ ३४६ ॥
एवं वागीश्वरं सर्व जानन्तो मुक्तिदं प्रभुम् ।
समागत्याथ तीर्थानि स्नानपुण्यानि चक्रिरे ॥ ३४७ ॥
तस्मान्मद्वचनात्सर्वे पुरस्कृत्य महेश्वरम् ।
वागीश्वरं समर्च्याशु मुक्तिं धन्यां प्रयास्यथ ॥ ३४८ ॥

व्यास उवाच ।

एतत् तस्य मुनेर्वाक्यं आकर्ण्य ते द्विजातयः ।
वागीश्वरं समाराध्य मुक्ताः शिवपूरं ययुः ॥ ३४९ ॥
धन्यं यशस्यमायुष्यं पुत्रीयं सर्वकामदम् ।
पुण्यं वागीश्वराख्यानं मयैतत् समुदाहृतम् ॥ ३५० ॥
यः पठेत्प्रातरुत्थाय सर्वान्कामान् स विन्दति ।
मुच्यते सर्वदुःखैस्तु सर्वपापैः प्रमुच्यते ॥ ३५१ ॥
अपुत्रो लभते पुत्रं धनमारोग्यमेव च ।
अन्ते शिवपुरं याति कुलकोटिसमन्वितः ॥ ३५२ ॥

---

३५२. ७५ श्लोकादारभ्य ३५२ श्लोकं यावत् पाठः ने2.3 हस्तलेखयोर्नास्ति. ३५२ श्लोकात्परं ने। हस्तलेखे अध्यायसमाप्तिरित्थं सूचिता— इति श्रीस्कन्दपुराणे मा० वागीश्वरमाहात्म्यं नाम अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

व्यास उवाच ।

कङ्कह्रदं च संस्नाप्य सत्येशं चार्चयेच्छिवम् ।
तर्पयित्वा पितॄंस्तीर्थे तीर्थश्राद्धं विधाय च ॥
कुलत्रयं समुत्तार्य वसेच्छिवपुरेऽग्रणीः ॥ ३५३ ॥

कालतीर्थं ततो गत्वा सरोजाजलमध्यगम् ।
निमज्य विधिवत्तत्र कालं चाप्सु समर्चयेत् ॥
अकालमृत्युं नाप्नोति यमराजस्य सेवनात् ॥ ३५४ ॥

भोगतीर्थे सरोजायां शर्मदादक्षिणे तटे ।
कृतः श्राद्धं पुनर्मृत्योर्भयं नाप्नोति दैवतः ॥ ३५५ ॥

दक्षिणे भोगतीर्थस्य ऋषिहारीणवर्चसम् ।
समर्च्य च सरोजायां कृतस्नानादिकक्रियः ।
ब्रह्मण्यं सर्वधर्माणां प्राप्नुयान्नान्यथा क्वचित् ॥ ३५६ ॥

तस्मादधो महाभागाः संध्यायाः सङ्गमध्यगम् ।
सरोजायां शुकवलमर्चयेद् दिव्यवर्चसम् ॥
सर्वज्ञातिप्रभुत्वेन गौरवं प्राप्नुयान्नरः ॥ ३५७ ॥

तस्माद्वामं विरूपाक्षं शरव्यां शूलधारिणम् ।
विमुक्तः सर्वपापेभ्यः शिवलोके महीयते ॥ ३५८ ॥

सङ्गमे तु ततः स्नात्वा शरव्यां वामने ह्रदे ।
पूजयित्वा विधानेन पितॄन् सतर्प्य मानवः ॥
विमुक्तः सर्वपापेभ्यः शिवसायुज्यमश्नुते ॥ ३५९ ॥

ऋषीणां श्रोतमुत्तीर्य स्नात्वा कामेश्वरं जले ।
योर्चति स शिवं याति परत्रेह सुखं लभेत् ॥ ३६० ॥

---

३५३. –a) ने$_1$ ०ह्रदे (→०ह्रदं). –b) ने$_1$ चार्य्ययेत् (→चार्चयेत्). –c) ने$_2$ श्राद्धे, ने$_3$ श्राद्धं (→तीर्थे). ३५४. –a) ने$_2$ कालीतिर्थं (→कालतीर्थं) –d) ने$_3$ समर्चयन् (→समर्चयेत्). ३५५ –a) ने$_2$ सरोजाया (→सरोजायां). –b) ने$_1$ शमदा० (→शर्मदा०). –d) ने$_1$ दैवतः (→देवतः). ३५६. –b) ने$_1$ ऋषिहरिणसन्निभम्. ३५७. –b) ने$_1$ संधायाः (→सन्ध्यायाः).–e) ने$_2$ ०ज्ञा* (→०ज्ञाति–). ३५८. –a) ने$_2$ विरूपाक्ष (→विरूपाक्षं). –b) ने$_2$ श*व्यां (→शरव्यां); ने$_2$ ०धारिणी (→०धारिणम्). ३५९. –e) ने$_{2.3}$ ०पापेभ्यो (→०पापेभ्यः). ३६०. –a) ने$_1$ ऋषयः (→ऋषीणां). –b) ने$_1$ वामेश्वरं (→कामेश्वरं).

इदं तीर्थं ततः ख्यातं तारागणनिषेवितम् ।
गत्वा निमज्य सर्वेषां तीर्थानां सरयूजले ॥
यत्फलं प्राप्यते मर्त्यैः पौर्णमास्यां निमज्जनात् ॥ ३६१ ॥

ईशानस्थं महादेवं क्षेत्राच्चन्द्रमसः शुभात् ।
गत्वा निमज्य शरयूं स्रोतान्ते पूजयेच्छिवम् ॥ ३६२ ॥

महापापप्रणाशाय ब्राह्मणानां हिताय च ।
जागर्ति योऽर्चितो देवो महेन्द्राद्यैर्दिवौकसैः ॥
तमर्च्य शिवभक्तानां प्रियो भवति मानवः ॥ ३६३ ॥

दक्षिणस्थां ततस्तस्माद्ब्रह्माणीं सत्यकाचले ।
पूजयित्वा विधानेन त्रिरात्रं मुनिसत्तमाः ॥
ब्रह्महत्यादिपापेभ्यो विमुक्तो याति शाश्वतीम् ॥ ३६४ ॥

महादेवादधोभागे नारदीयह्लदं व्रजेत् ।
टङ्कणेन महेशेन तथा चन्द्रमसान्वितम् ॥ ३६५ ॥

संस्नाप्य वैष्णवं धाम विमुक्तः प्राप्नुते नरः ।
देवर्षिर्नारदो यत्र त्रिवारं स्नानमाचरन् ॥ ३६६ ॥

ध्यायन्विष्णुं जगन्नाथं पावयन् भुवनत्रयम् ।
प्राप विष्णोः परां भक्तिं महाभागवतोग्रणीः ॥ ३६७ ॥

युगे युगे च वेदानामध्ययनं कुरुते सुखी ।
वेदाङ्गपारगो भूत्वा विष्णुलोके महीयते ॥ ३६८ ॥

ततः परं महातीर्थं ख्यातमस्ति तपोधनाः ।
ब्रह्मनारदसंज्ञं वै महापापप्रणाशनम् ॥ ३६९ ॥

ब्रह्माणं नारदं चापि स्नात्वा योऽर्चति वै जले ।
ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते ॥ ३७० ॥

---

**३६१.** –c) ने$_{1}$ सर्वेषु (→सर्वेषां). **३६२.**–b) ने$_{1.3}$ शुभाम् (→शुभात्). –d) ने$_{1.3}$ स्रोतां (ने$_{3}$ तों) ते पूजय (ने$_{3}$ ०ये)च्छिवम्. **३६४.** –d) ने$_{1.2}$ त्रिरात्र– (ने$_{2}$ ०त्रे)(→त्रिरात्रं); ने$_{2}$ ०सत्तमः (→०सत्तमाः). –f) ने$_{2}$ शाश्वती (→शाश्वतीम्). **३६५.** –a) ने$_{1}$ वैस्रवं (→वैष्णवं). –b) ने$_{2}$ नरं (→नरः). –d) ने$_{1}$ आचरेत् (→आचरन्).**३६७.** –b) ने$_{1}$ ०त्रये (→०त्रयम्). –c) ने$_{1.3}$ महाभागवताग्रणी (ने$_{3}$ ०णी). **३६८.**–b) ने$_{1}$ °ध्यायनं(→°ध्ययनं) –c) ने$_{2}$ ०पारगां(→०पारगो). **३६९.** –c) ने$_{2.3}$ ०संज्ञे (→०संज्ञं).

ततस्तु पश्चिमे तस्मात्तीर्थमस्ति शुकाह्वयम् ।
मुण्डनं कारयेत्स्नात्वा तीर्थश्राद्धं तथैव च ॥
पञ्चाशत् कुलमुत्तीर्यं स्वर्गमाप्नोति मानवः ॥ ३७१ ॥

ततः पल्वलगं नाम तीर्थं पुलहनिर्मितम् ।
यः स्नाति मौनमास्थाय स शिवं याति नान्यथा ॥ ३७२ ॥

वह्नितीर्थं ततो गच्छेद्बाणतीर्थे निमज्य वै ।
यः स्नाति वह्निमुद्दिश्य उपोष्य च दिनत्रयम् ॥
लोकानां पावको भूत्वा स्वर्गलोके महीयते ॥ ३७३ ॥

ततस्तु मुनिशार्दूला उमासङ्गमिति स्मृतम् ।
सर्वपापप्रशमनं शिवलोकप्रदर्शकम् ॥ ३७४ ॥

तत्र स्नात्वा च विधिवत्संतर्प्य च पितृंस्तथा ।
श्राद्धं विधाय पितरो यान्ति शिवपुरं प्रति ॥ ३७५ ॥

ततोग्नितीर्थं विज्ञेयं सुपुण्ये चाग्निपर्वते ।
निवसन् मुनिशार्दूला ब्रह्मा लोकपितामहः ॥ ३७६ ॥

हितायोद्ध्वमृषीणां वै समाहूय सुशोभनम् ।
स चकाराध्वरं विप्रा महर्षिभिः समन्वितः ॥ ३७७ ॥

तर्पयामास चाग्निं तं हव्यैर्पुण्यैर्महाध्वरैः ।
तत्राग्नितीर्थे मनुजश्चाग्निवत्याः सुसङ्गमे ॥ ३७८ ॥

निमज्य लोकधातारं ब्रह्माणं पूज्य वै द्विजाः ।
ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते ॥ ३७९ ॥

ततः कालीयसंज्ञो वै ह्रदोऽस्ति मुनिसत्तमाः ।
तत्र स्नात्वा पितॄन् तर्प्य यान्ति ब्रह्मपदं शुभम् ॥ ३८० ॥

ततस्तु गणिकासङ्गं पुण्योस्ति मुनिसत्तमाः ।
गणेश्वरं महादेवं सम्पूज्य विधिपूर्वकम् ॥ ३८१ ॥

---

३७२. –a) ने$_2$ पल्व*गं(→पल्वलगं). ३७४. –d) ने$_1$ ०प्रदर्शनं(→°प्रदर्शकम्). ३७५. –d) ने$_3$ याति (→यान्ति). ३७६. –a) ने$_2$ ०तीर्थ (→०तीर्थं). ३७७. –a) ने$_1$ हिताय च ऋषीणा वै. ३७८. –b) ने$_1$ महाध्वरे (→महाध्वरैः) –c) ने$_1$ मनुज (→मनुजश्). ३७९. –b) ने$_1$ ब्रह्माणं पूजये द्विजाः. ३८०. –a) ने$_1$ संज्ञं (→संज्ञो). –c) ने$_1$ ततः (→तत्र); ने$_1$ पितॄस् (→पितॄन्). ३८१. –a) ने$_1$ ततस्तु मणिकासङ्गः.

निमज्य तत्र मनुजो याति शिवपुरं प्रति ।
ततः श्रोतः समुत्तीर्थ ताला पश्चिमवाहिनी ॥ ३८२ ॥

नृपेण तालजङ्घेन वाहिता पुण्यकारिणी ।
शरयूसङ्गमं प्राप्य पूज्यते दैवतैरपि ॥ ३८३ ॥

तत्र स्नात्वा तु मनुजो याति शिवपुरं प्रति ।
ततः श्रोतः समुत्तीर्य निषधासङ्गमे शुभे ॥ ३८४ ॥

निमज्य पितृकृत्यं च समाप्य विधिपूर्वकम् ।
महेन्द्रभवनं यान्ति मानवो मुनिसत्तमाः ॥ ३८५ ॥

ततस्तु कोकिलासङ्गे मानवो मुनिसत्तमाः ।
संत्यज्य पातकान् सर्वान् शिवलोके महीयते ॥ ३८६ ॥

ततः सुग्रीवसंज्ञं वै तीर्थमस्ति तपोधनाः ।
तत्र स्नात्वा च मनुजो मातुर्गर्भं न पश्यति ॥ ३८७ ॥

ततस्तु बहवः पुण्याः शरयूसङ्गमे गताः ।
सरितो मुनिशार्दूलास्तपस्विभिर्विनिर्मिताः ॥ ३८८ ॥

ततः पुण्याः सरिच्छ्रेष्ठाः शरयूसङ्गमे शुभे ।
भद्रामूलशतैर्युक्ताः सङ्गता मुनिसत्तमाः ॥ ३८९ ॥

तयोर्मध्ये महाभागाः पूज्य भद्रेश्वरं शुभम् ।
महेन्द्रभवनं यान्ति मानवा नान्यथा क्वचित् ॥ ३९० ॥

या भद्रा मुनिशार्दूला गोपीवननिवासिभिः ।
महर्षिभिः समाहूता आस्तीकाद्यैस्तपस्विभिः ॥ ३९१ ॥

पावनाय महायज्ञं नागानां गिरिवासिनाम् ।
दक्षिणाभिमुखी पुण्या गङ्गा या गीयते भुवि ॥ ३९२ ॥

---

३८२. –a) ने2.3 मनुजा (→मनुजो). –c) ने1 श्रोत (→श्रोतः). –d) ने2 °वह्निनी (→°वाहिनी). ३८३. –d) ने2.3 °कारिणा (→°कारिणी). –b) ने1 देवतैर् (→दैवतैर्).

३८४ –a) ने2 च, ने3 स (→तु); ने3 मनुजा (→मनुजो). –c) ने1.2 तत्र श्रोत्रं (→ततः श्रोतः). ३८५. –c) ने1.2 याति (→यान्ति). –d) ने2 °सत्तम (→°सत्तमाः) ३८६. –c) ने1.2 स त्यज्य (→संत्यज्य). ३८८. –a) ने1. ततः सु–(→ततस्तु). –d) ने1 निषेविता (→विनिर्मिताः). ३८९. –c) ने3 भद्रपाल° (→भद्रामूल°). ३९०. –c) ने1.2 याति (→यान्ति). ३९१. –c) ने3 समाहूतः (→समाहूताः). ३९२. –a) ने1 °यज्ञे (→°यज्ञं).

निमज्य पितृकृत्यं वै मानवा मुनिसत्तमाः ।
वैकुण्ठभवनं यान्ति संस्नात्वा सङ्गमे तयोः ॥ ३९३ ॥

इत्येतत्कथितं विप्रा क्षेत्राख्यानं फलप्रदम् ।
संक्षेपेण महापुण्यं सर्वपापान्तकारकम् ॥ ३९४ ॥

भद्रतुङ्गां समारभ्य यावद्भद्रा महानदी ।
तावद्वागीशसंज्ञं वै क्षेत्रमस्ति न संशयः ॥ ३९५ ॥

भद्रतुङ्गां समारभ्य यावद्भद्रा महानदी ।
तावद्या सरितः पुण्याः शरयूसङ्गमं गताः ॥ ३९६ ॥

ताः सर्वा शरयूं प्राया विद्यन्ते नात्र संशयः ।
तास्तु स्नात्वा जनो याति महेन्द्रभवनं शुभम् ॥ ३९७ ॥

**इति श्री स्कन्दपुराणे मानसखण्डे वागीश्वरमहात्म्यं नाम अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥**

---

३९३. –b) ने1.2 मानवो (→मानवा); ने1 °सत्तमा (→°सत्तमाः). –b) ने3 संप्राप्य (→संस्नात्वा). ३९६. –a) ने1.2 °तुंगात् (→°तुङ्गां). –d) ने1.2 °नदी (→°नदीः). ३९७. –a) ने3 प्राप्ता (→प्राया). –c) ने1 तासु (→तास्तु); ने1 नरो (→जनो).

ऋषय ऊचुः ।

सा भद्रा मुनिशार्दूल समाहूता महर्षिभिः ।
कथं तत्र महायज्ञे नागानां गिरिवासिनाम् ॥ १ ॥
ते कस्मिन् पर्वते नागा निवसन्ति तपोधन ।
कथं नागालयं हित्वा भूतले समुपागताः ॥ २ ॥

व्यास उवाच ।

पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ।
विभज्य सकलां पृथ्वीं विभागं स चकार ह ॥ ३ ॥
देवानां दानवानां च गन्धर्वाप्सरराक्षसाम् ।
गुह्यविद्याधराणां च तथान्येषां च पक्षिणाम् ।
दत्वा विभज्य भागं वै तेषु सर्वेषु वै द्विजाः ॥ ४ ॥
ग्रहीतुकामाः स्वभागं नागाः सर्वे समाहिताः ।
उपतस्थुर्विधातारं वासुकिप्रमुखा द्विजाः ॥ ५ ॥
ततस्तेभ्यो ददौ ब्रह्मा हिमालयतटं महत् ।
सुपुण्यं नागपूराख्यं संलग्नं हिमपर्वते ॥ ६ ॥
तत्र ते स्वपुरं सर्वे व्यरचन्मुनिसत्तमाः ।
विरच्य स्वां पुरीं सर्वे बलिं गृह्णन्ति भूतले ॥ ७ ॥

ऋषय ऊचुः ।

कियन्मानं स्थलं तेषां ददौ ब्रह्मा तपोधन ।
कुत्र ते रचयामासुः पुण्यं नागपुरं शुभम् ॥ ८ ॥

---

२. –b) ने1 ०धनं, ने2 ०धना (→०धन)

३ श्लोकस्य प्रारम्भे ने1. अधिकम्—

'सा भद्रा मुनिशार्दूल समाहूता महर्षिभिः ।'

३. –b) ने1.3 ०रक्षसां (→°राक्षसां). ७. –b) ने1.3 व्यचरन् (→विरच्य).

–c) ने3 तां, ने2 स्व-(→स्वां); ने2 पुरी (→पुरीं).

८. –c) ने1 ०मासु (→°मासुः). –d) ने2 ०परे (→०परं).

व्यास उवाच ।

पश्चिमे शिखराणां हि पुण्यो जीवारपर्वतः ।
विद्यते देवदेवस्य स्थलैर्बहुभिः शोभितः ॥ ९ ॥

यत्रोरुं मुनिशार्दूला ग्रीवया सह शङ्करः ।
संस्थाप्य ससुखं शेते देवदानवसेवितः ॥ १० ॥

तस्य पश्चिमभागे वै पुण्यो नागपुरः स्मृतः ।
निर्मितो नागराजेन नागकन्यानिषेवितः ॥ ११ ॥

जीवारगिरिमारभ्य स यावद्दारुपर्वतः ।
तावत्तेभ्यो ददौ ब्रह्मा हिमालयतटं शुभम् ॥ १२ ॥

तत्र ते निवसन्ति स्म भुजङ्गाद्यास्तपोधनाः ।
निवस्य तत्र ते सर्वे तपोव्रतपरायणाः ॥ १३ ॥

शिवपूजारता नागा बभूवुर्मुनिसत्तमाः ।
कदाचिद्यष्टुमि(मी?)प्सन्तो यज्ञैर्लोकपितामहम् ॥ १४ ॥

ययुर्गोपीवनं नागाः पुण्यकाननशोभितम् ।
ऋषीणां मन्त्रयामासुरास्तोकाद्यांस्तपोधनाः ॥ १५ ॥

निमन्त्रिता महाभागा ऋषयो नागनायकैः ।
समाजग्मुर्महापुण्यं गोपिकाननसंज्ञकम् ॥ १६ ॥

तत्रागतानृषीन्सर्वान् संपूज्य नागनायकाः ।
आसनानि विचित्राणि ददुस्तेषु तपोधनाः ॥ १६ ॥

आसनेषु विचित्रेषु चोपविष्टेषु वै द्विजाः ।
ब्राह्मणेषु तथा नागा यज्ञमारेभिरे शुभम् ॥ १७ ॥

समारब्धं महायज्ञं मूलनारायणस्तदा ।
दृष्ट्वोवाच महातेजा नागमुख्यांस्तपोधनाः ॥ १८ ॥

---

१०. –a) ने$_{1.2}$ यत्रांक्तं (→यत्रोरुं); ने$_{2}$ ०शार्दूल(→०शार्दूला). –d) ने$_{3}$ °सेवितं (→०सेवितः). १२. –a) ने$_{2.3}$ जीवागिरिसमा(दे$_{2}$ रिमा)रभ्य. –d) ने$_{2}$ ०तटे (→०तटं). १५. –c ने$_{1}$ ऋषीन्ते मंत्र०, ने$_{2}$ ऋषीनां मित्र० (→ऋषीनां मन्त्र°). –d) ने$_{1}$ ०काद्यां (→०काद्यांस्); ने$_{1}$ ०धनान्, ने$_{2}$ ०धनाम् (→०धना).
१६. –b) ने$_{1.2}$ ०नायका (→०नायकाः). –b) ने$_{2}$ ०धना (→०धनाः). १८. –a) ने$_{2}$ समारम्भ-(→समारब्धं). –c) ने$_{2}$ दृष्टो° (→दृष्ट्वो०). –d) ने$_{1}$ ०मुख्या (→०मुख्यांस्).

मूलनारायण उवाच ।

विना दानेन को यज्ञो विना तोयेन का विधिः ।
विना चान्नेन को भोगः क्व दानं श्रद्धया विना ॥ १९ ॥

वने चास्मिन् महाभागास्तोयहीने महाक्रतुः ।
करिष्यामः कथं भूरि साम्प्रतं तद्विचिन्त्यताम् ॥ २० ॥

व्यास उवाच ।

मूलनारायणेनोक्तां वाणीं संपूज्य ते तदा ।
चक्रुर्जलागमोपायं सह तैर्ब्राह्मणैर्द्विजाः ॥ २१ ॥

तेषां विचिन्त्यमानानां जलोपायं तपोधनाः ।
फेनिलो वदतां श्रेष्ठो वचनं समुवाच ह ॥ २२ ॥

फेनिल उवाच ।

ब्राह्मणान् वेदतत्त्वज्ञान् पूजयामस्तपोधनान् ।
पूजितास्ते महाभागा प्रार्थयन्तु महानदीम् ॥ २३ ॥

प्रार्थिता मुनिभिः पुण्या आविर्भवति शोभना ।
गङ्गा भागीरथी नामा नागानां पावनाय वै ॥ २४ ॥

व्यास उवाच ।

फेनिलेन महाभागा नागा सर्वे निबोधिताः ।
ब्राह्मणान् पूजयामासुरर्घ्याद्यैर्विधिपूर्वकम् ॥ २५ ॥

ततस्ते पूजिता विप्रा गङ्गां भागीरथीं शुभाम् ।
प्रार्थयामासुस्तां पुण्यामावाह्य मुनिसत्तमाः ॥ २६ ॥

ततः सा प्रार्थिता पुण्या समाहूता महर्षिभिः ।
आविर्बभूव पुरतः साक्षाद्भागीरथी द्विजाः ॥ २७ ॥

आविर्भूतां च तां दृष्ट्वा मुनयो जातसंभ्रमाः ।
भद्रं कुरु महाभागे नागानामिति तां वदन् ।
भद्रेति वचनात्पूर्वं सा भद्रा गीयते द्विजाः ॥ २८ ॥

---

१९. –d) ने2 क दानं (→क्व दानं). २०. –d) ने2 तम् (→ताम्). २१. –c) ने1 सहसैर् (→सह तैर्); ने1 द्विजः (→द्विजाः). २३. –b) ने1 ०धनाम् (→०धनान्). –d) ने2 ०नदम् (→०नदीम्). २४. –d) ने1 पावनार्थं-(→पावनाय). २६. –b) ने1 गंगा- (→गङ्गां). –c) न2ता(→तां). २७. –a) ने3 सं-(→सा).

तां भद्रां प्राप्य ये स्नानं प्रकुर्वन्ति तपोधनाः ।
ते यान्ति ब्रह्मभवने कुलकोटिसमन्विताः ॥ २९ ॥

प्राप्य भद्रां तदा नागा कुलकोटिप्रतारिणीम् ।
ब्रह्माणं तोषयामासुर्यज्ञैश्च विविधैर्द्विजाः ॥ ३० ॥

ब्राह्मणेभ्यो महार्हं वै दक्षिणां प्रददुर्द्विजाः ।
महार्हाणि च वस्त्राणि दानानि विविधानि च ॥ ३१ ॥

दत्वा क्षमापयामासुर्ब्राह्मणान् मुनिसत्तमाः ।
दत्तदाना द्विजाः सर्वे प्रययुः स्वं स्वमाश्रमम् ॥ ३२ ॥

नागा नागपुरं सर्वे हित्वा गोपीवनं शुभम् ।
प्राप्ताशिषा महाभागा ययुर्यज्ञं विधाय वै ॥ ३३ ॥

भद्रायाश्च समुत्पत्तिर्मयैतत्समुदाहृता ।
नागानां च महायज्ञे यथाहूता महर्षिभिः ॥ ३४ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे भद्रामाहात्म्ये**
**एकोनाशीतितमोऽध्यायः ॥ ७९ ॥**

---

२९. –a) ने$_2$ ता (→तां); ने$_1$ प्राप्यसे (→प्राप्य ये). –c) ने$_{1\cdot3}$ °भुवनं (→°भवने). ३०. –a) ने$_1$ नागां (→नागा). अतः परं ने$_1$ अधिकम्—

'ते समाप्य महायागं सोमयागं तथैव च ।'

३१. –a) ने$_1$ महार्हीं (→महार्हं).

३२. –b) ने$_2$ °सत्तमा (→°सत्तमाः). ३३. –c) ने$_3$ °भाग (→°भागा). –d) ने$_1$ च (→वै). ३४. –d) ने$_2$ °हूतां (→°हूता).

ऋषयः ऊचुः ।

कस्मिन् क्षेत्रे प्रपूज्यन्ते दत्तदानास्तपोधन ।
कमाराध्य च स्तुत्वा च प्राक्तनाः पापकोटयः ॥ १ ॥

पितृभिश्च कृताश्चापि तथा मातामहैरपि ।
विनश्यन्ति महाभाग तत्सर्वं कथयस्व नः ॥ २ ॥

व्यास उवाच ।

पितृभिश्च कृतानां च तथा मातामहैरपि ।
तथा संसर्गजातानां दुःसंसर्गास्तपोधनाः ॥ ३ ॥

प्राक्तनेषु च जन्मेषु कृतानां चापि निःकृतिः ।
शृण्वन्तु मुनिशार्दूला मयैतत्समुदाहृतम् ॥ ४ ॥

निष्कृतिं यत्र संप्राप्य यान्ति शिवपुरं प्रति ।
हिमालयतटे रम्ये नागः पुण्योः गिरिः स्मृतः ॥ ५ ॥

पश्चिमे तस्य वै विप्रा गोपिकाननसंज्ञकः ।
विद्यते नागकन्याभिः सेवितं सुमनोहरम् ॥ ६ ॥

तत्र गोपीश्वरो देवो जार्गति मुनिसत्तमाः ।
त्रैलोक्यमण्डपस्तम्भं येन संस्थापितं शुभम् ॥ ७ ॥

यस्मिन् जार्गति देवेशो द्वादशा भानवो द्विजाः ।
उदिता निःप्रभा यान्ति सत्यमेतन्मयोदितम् ॥ ८ ॥

तत्र गत्वा नराणां वै कुलकोटिसमुद्भवात् ।
नास्ति पापान्महाभीतिः सत्यं सत्यं मयोदितम् ॥ ९ ॥

वर्णशङ्करजा वापि तत्र गत्वा द्विजोत्तमाः ।
न तिष्ठन्ति महापापा मानवानां कलेवरे ॥ १० ॥

---

१. –a) ने$_3$ प्रपूर्यंते (→प्रपूज्यन्ते). –d) ने$_1$ प्राक्तन (→प्राक्तनाः). २. –c) ने$_1$ °भागास् (→ °भाग). ४ –c) ने$_1$ * (→च). –d) ने$_1$ निकृतिः (→निःकृतिः). –b) ने$_1$ सयेतत् (→मयैतत्). ६. –b) ने$_1$ °नभ°, + °नव° (→°तन°). –d) ने$_1$ सवितं (→सेवितं). ८. –c) ने$_1$ याति (→यान्ति).
९. –b) ने$_1$ °समुद्भवां (→°समुद्भवान्).

तावद्देहे महापापा मानवानां दुरात्मनाम् ।
निवसन्ति महाघोरा यावद्गोपीशमण्डलम् ॥ ११ ॥

न यान्ति पातकान्स्मृत्वा तावत्ते निवसन्ति हि ।
पितृभ्यामपि दुष्कर्म कृतं यत्र विलीयते ॥ १२ ॥

किन्न यान्ति नरास्तत्र पापलिप्तास्तपोधनाः ।
स्वर्णस्तेयादिभिः पापैर्मुच्यन्ते नात्र संशयः ॥ १३ ॥

अगम्यागमभूतानि पितृभ्यां वै कृतानि च ।
विलीयन्ते हि पापानि हिमवद्भास्करोदये ॥ १४ ॥

त्रिःसप्तकृत्वा सकलां धरित्रीं
प्रक्रम्य यद्याति महीतले वै ।
तत्तत्र गोपीश्वरपूजनेन
संपूज्य जातीकुसुमैश्च शोभनैः ॥ १५ ॥

ऋषय ऊचुः ।

कथं गोपीश्वरो विप्र गीयते परमेश्वरः ।
कथं गोपीवनं नाम वनं च प्रवदन्ति हि ॥ १६ ॥

व्यास उवाच ।

नागा नागपुरे रम्ये निवस्य मुनिसत्तमाः ।
सुरभीं पूजयामासुर्दशवर्षाणि पञ्च च ॥ १७ ॥

ततः सा सुरभी पुण्या सन्तुष्टा मुनिसत्तमाः ।
बभूव नागमुख्येभ्यः कामदा वरदा शिवा ॥ १८ ॥

सा तुष्टा तान् तदा वव्रे मत्तो वाञ्छन्त्वभीप्सितम् ।
ततस्ते नागमुख्या वै सुरभीं परितोषिताम् ॥
ऊचुः सर्वे महाभागाः कामदां लोकपावनीम् ॥ १९ ॥

---

११. –a) ने2 °पापः (→°पापा [:])
१२. –a) ने3 याति (→यान्ति). –b) ने1 त्वावत्ते, ने3 तावंते (→तावत्ते). –d) ने2 * तं (→कृतं) १३. –d) ने3 मुच्यते (→मुच्यन्ते). १४. –c) ने1 म्हा-पापा (→हि पापानि). १५. –a) ने1 धरित्री (→धरित्रीं). –b) ने3 यत्पाति (→यद्याति). –d) ने2 ते स्त्री° (→जाती°).
१८. –b) ने1 °सत्तमा (→°सत्तमाः). –d) ने1 शिवाः, ने2 शिव (→शिवा).
१९. –b) ने2 सुरभी-(→सुरभीं). –d) ने1 °पाविनीम् (→°पावनीम्).

नागा ऊचुः ।

वयं त्वत्तो महाभागे वरयामो वरं शुभम् ।
येन तृप्ता वयं सर्वे भविष्यामोनुकम्पया ॥ २० ॥

देह्यस्मभ्यं महाभागे कुलानि बह्वो गवाम् ।
वयं ताभिः सुपुण्याभिस्तर्पिताः संभवामहे ॥ २१ ॥

व्यास उवाच ।

तथेत्युक्ता(क्त्वा ?) महाभागा कामदा देवपूजिता ।
ययौ महेन्द्रभवनं देवगन्धर्वपूजितम् ॥ २२ ॥

गवां कुलानि संप्राप्य नागाः सर्वे तपोधनाः ।
व्रजं विरचयामासुर्विस्तीर्णे गोपिकानने ॥ २३ ॥

विरच्य ते व्रजं सर्वे गवां संचारणाय वै ।
ययुर्नागपुरं रम्यं नागकन्यानिषेवितम् ॥ २४ ॥

संचारणाय ते नागा गवां सत्यव्रते स्थिताः ।
नागकन्यासमूहं वै रक्षणायोपरेभिरे ॥ २५ ॥

उपदिष्टास्तदा कन्या नागमुख्यैस्तपोधनाः ।
ता गाः संचारयामासुर्विस्तीर्णे गोपिकानने ॥ २६ ॥

शिवमाराधयन्त्यस्ताश्चारयन्त्यश्च गास्तथा ।
ददृशुः काननं घोरं नानापादपवेष्ठितम् ॥ २७ ॥

नानावृक्षलताकीर्णं नानापक्षिविराजितम् ।
नानामृगगणाकीर्णं शिवाभिश्च निनादितम् ॥ २८ ॥

तत्र ताः शङ्करं दृष्ट्वा चिक्रीडुर्द्विजसत्तमाः ।
आराधयन्त्यो गोप्यस्तं शङ्करं लोकशङ्करम् ॥ २९ ॥

---

२०. –b) ने$_{3}$ ०याम (→०यामो) २१. –a) ने$_{1}$ °स्मभ्यां (→°स्मभ्यं).
२१. ने$_{1\,2}$ ०पूरितम् (→०पूजितम्).

२३. –d) ने$_{1}$ बीलीणे, ने$_{2}$ विस्तीर्णं (→विस्तीर्णे). २४. –b) ने$_{1}$ गवां तं, ने$_{2}$ गवां सां-(→गवां सं—). २५. –b) ने$_{1.3}$ सत्यं (→सत्य-); ने$_{1}$ स्थिता (→स्थिताः). २६. –b) ने$_{1}$ °मुष्यास् (→०मुख्यैस्). २७. –b) ने$_{1}$ तदा (→तथा). २९. –b) ने ने$_{2.3}$ विक्रीडुर् (→चिक्रीडुर्).

दहृशुः पर्वताग्रे वै गिरिराजगुहां शुभाम् ।
शाण्डिल्येन महाभागा भूतले सुप्रकाशिताम् ॥ ३० ॥

तथा सरस्वतीं गङ्गां समाहूतां महर्षिणा ।
गुहाद्वारात्समायान्तीं पुण्यतोयवहां शुभाम् ॥ ३१ ॥

तां दृष्ट्वा तादृशीं पुण्यां शाण्डिल्यस्य महागुहाम् ।
हरं संपूजयामासुस्तास्तत्र मुनिसत्तमाः ॥ ३२ ॥

तासां सम्पूजयन्तीनां मूलनारायणं सुताः (णसुता ?) ।
ददर्श कन्दरायां वै रन्ध्रं पाषाणसम्भवम् ॥ ३३ ॥

दृष्ट्वा रन्ध्रान् सुचपला हित्वा पूजां हरस्य च ।
उवाच ताः सखोः सर्वाः प्रविशन्त्विति शोभनाः ॥ ३४ ॥

तस्यास्तद्वचनं श्रुत्वा सख्यः सर्वाः सुशोभनाः ।
शाण्डिल्यस्य महासत्यं पुरस्कृत्य तपोधनाः ॥
प्रविशुः कन्दरां पुण्यां भाषयन्त्यः शुभं वचः ॥ ३५ ॥

यद्यस्माकं परा भक्तिः शङ्करे देवसेविते ।
तर्ह्येनां चातिशोभाढ्यां गुहां निःसृत्य यामहे ॥ ३६ ॥

इत्युक्त्वा मुनिशार्दूलास्ताः सर्वास्तां गुहां शुभाम् ।
निससर्जुर्महापुण्यां पुरस्कृत्य महेश्वरम् ॥ ३७ ॥

ऊचुस्ता मुनिशार्दूला रन्ध्रे तस्मिन्विनिसृताः ।
धर्म्माधर्मपरीक्षैषा अस्माकं निष्फला गताः (ता ?) ॥
नास्माभिः शङ्करः कान्तः प्राप्यते नान्यथा क्वचित् ॥ ३८ ॥

इति संभाषयन्तीनां गोपीनां गा विदूरगाः ।
बभूवुर्मुनिशार्दूलाः पश्यन्तीनामितस्ततः ॥ ३९ ॥

---

३० –a) ने$_1$ पर्वंतोग्रे (→पर्वंताग्रे). –b) ने$_1$ गुहा (→गुहां). ३१. –b) ने$_2$ ०हूतो, ने$_3$ ०हूता (→०हूतां). –c) ने$_{2.3}$ ०द्वारं (→०द्वारात्). ने $_{2.3}$ यांति (→०यान्तीं). –d) ने$_2$ ०महा-(→०वहां).

३३. –b) ने$_3$ सुर० (→मूल०); ने$_1$ मूलनारायणांगजाः. ३४. –a) दृष्ट्वा रंध्रसु च पत्न्या. –c) ने$_3$ तां(→ताः). ३५. –f ) ने$_1$ भावयंत्या (→भाषयन्त्यः). ३७. –b) ने$_3$ सर्वास्वां (→सर्वास्तां). –c) ने$_1$ निससेजुर् (→निससर्जुर्). ३८. –b) ने$_1$ रंध्वे तस्मिन्वितिः स्मृताः. –c) ने$_1$ परिक्षेषा (→परीक्षैषा). ३९. a) ने$_1$ इति संभाषयंतो तां.

ततो गाः संप्रपश्यन्त्यो ययुः सर्वा वनान्तरम् ।
इतस्ततः प्रधावन्त्यो नागकन्यास्तपोधनाः ॥ ४० ॥

ततो वनान्ते गाः सर्वाश्चरन्त्यो ददृशुर्द्विजाः ।
आविच्छिन्नं तृणं भूरि तृणलोभेन दूरगाः ॥ ४१ ॥

गवां मध्ये महादेवं सिद्धकिन्नरसेवितम् ।
द्वादशादित्यसंकाशं वनान्ते ददृशुर्द्विजाः ॥ ४२ ॥

यस्य भासा जगत्सर्वं भासितं सचराचरम् ।
स ज्योतिर्मध्यगो भानुर्यस्य भासा पराजितः ॥ ४३ ॥

तं ज्योतिर्मध्यगं लिङ्गं गवां मध्ये विराजितम् ।
ददृशुस्ते तदा गोप्यः शङ्करस्य महात्मनः ॥ ४४ ॥

तं दृष्ट्वा नागमुख्यानां गोप्यः सर्वाः सुशोभनाः ।
नमश्चक्रुर्महाभागाः प्रफुल्लमुखपङ्कजाः ॥ ४५ ॥

नमस्कृत्य महादेवं ताः सर्वाश्चातिशोभनाः ।
पूजयामासुर्देवेशं नियमव्रतकर्शिताः ॥ ४६ ॥

ततस्तं प्रार्थयामासुर्गोप्यः सर्वास्तपोधनाः ।
प्रणतास्तन्मनस्काश्च तस्य ध्यानपरायणाः ॥ ४७ ॥

गोप्य ऊचुः । ❀

नमो हरायामितभूषणाय
चितासमिद्भस्मविलेपनाय ।
वृषध्वजाय सुवृषप्रभाय
शिवाय शान्ताय नमो नमस्ते ॥ ४८ ॥

नमो विरूपाय कलाधराय
षडर्धनेत्राय परावराय ।
ऋषिस्तुताय परिसेविताय
नमो नमस्ते वृषवाहनाय ॥ ४९ ॥

---

४०. –c) ने1.3 प्रधावत्यो, ने2 प्रधावत्यां (→प्रधावन्त्यो). ४१. –c) ने1 तृण ४४. –a) ने2.3 ज्योति-(→ज्योतिर्). –b) ने2 गवा (→गवां). –c) ने1 तास् (→ते). ४६. –c) ने2 देवेश-(→देवेशं).

❀ ने1.3.⊙.

व्यास उवाच ।

इति सम्यक् स्तुतो देवो गोपीभिर्मुनिसत्तमाः ।
आविश्चक्रे महाज्वालां दुर्दृश्यां देवदानवैः ॥ ५० ॥

ततो ज्वालामुखी देवो निमज्य च तपोधनाः ।
उवाच देवदेवेशो गोपीमध्यगतः स्वयम् ॥ ५१ ॥

शिव उवाच ।

प्रार्थन्तो(न्त्यो ?) महाभागाः केन यूयमिहागताः ।
मामेव देवदेवेशं ब्रुवन्तु तत्करोम्यहम् ॥ ५२ ॥

गोप्य ऊचुः ।

त्वामेव देवदेवेश प्रियं स्वाभिलषामहे ।
त्वामेव जगतां नाथं प्रियं मत्वा न संशयः ॥ ५३ ॥

अपि त्रैलोक्यनाथं वा महेन्द्रं न स्पृहामहे ।
त्रैलोक्यं देवदेवेशं त्वत्पादकमलं विना ॥ ५४ ॥

व्यास उवाच ।

इति तासां गिरं श्रुत्वा देवदेवो महेश्वरः ।
तथेत्युक्त्वा महाभागास्तत्रैवान्तरधीयत ॥ ५५ ॥

गोभिः सह तु ताः सर्वा गोप्यो देवेश्वरं हरम् ।
प्रविशुर्मुनिशार्दूला हित्वा देहं पुरातनम् ॥ ५६ ॥

क्रीडन्त्यश्च महाभागा गोप्यो नीता सुदुर्लभाम् ।
देवगन्धर्वमनुजैर्दुःप्राप्यां गतिमुत्तमाम् ॥ ५७ ॥

पातका विलयं यान्ति गोपीशस्मरणादपि ।
किमु तद्दर्शनाद्विप्राः पूजनात्कथयाम्यहम् ॥ ५८ ॥

इत्येतत्कथितं विप्राः सर्वपापप्रणाशनम् ।
गोपीश्वरस्य चाख्यानं तथा गोपीवनस्य च ॥ ५९ ॥

---

५१. –a) ने$_1$ ०मुखा, ने$_3$ ०मुखो (→°मुखी). ५२. –c) ने$_1$ ०देवेश (→°देवेशं). –d) ने$_1$ जुवंतु (→ब्रुवन्तु). ५३. –b) ने$_1$ प्रियं वाभिलषामहे, ने$_2$ प्रियं चाभिलखामहे. ५६. –a) ने$_1$ ततः (→तु ताः). ५७. –a) ने$_{1.3}$ क्रीडंत्योश्च (ने$_3$ ०स्य) (→क्रीडन्त्यश्च). ५८. –a) ने$_2$ पताकानि प्रलीयंते, ने$_3$ पताका विप्रलीयंते.

गोपीश्वरेति देवेशो यथा सञ्ज्ञीयते भुवि ।
यथा संपूज्यते लोके यथा लिङ्गं प्रतिष्ठितम् ॥ १६० ॥

गोपीश्वरस्य माहात्म्यं यः पठेत्सुसमाहितः ।
शिवलोकमवाप्नोति रुद्रकन्यानिषेवितः ॥ ६१ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे गोपीश्वर-माहात्म्येऽशीतितमोऽध्यायः ॥ ८० ॥**

---

६०. -d) ने2.3 ययौ (→यथा); ने1 लिंग-(→लिङ्गं).

## ८१

गोपीवनप्रमाणं वै श्रोतुमिच्छाम सुव्रत ।
क्षेत्राणां चापि माहात्म्यं लिङ्गानां वर्णनं तथा ॥ १ ॥

व्यास उवाच ।

गोपीवनप्रमाणं वै शृण्वन्तु सुसमाहिताः ।
लिङ्गानां चापि माहात्म्यं मयैतत्समुदाहृतम् ॥ २ ॥

पुण्यो नागपुरो नाम पर्वतो मुनिसत्तमाः ।
तत्र फेनिलसंज्ञो वै नागः सम्पूज्यते द्विजाः ॥ ३ ॥

तस्य क्षेत्रात् समारभ्य यावद्भद्रपुरं स्मृतम् ।
तावद्गोपीवनं पुण्यं ख्यायते मुनिसत्तमाः ॥ ४ ॥

गोपीशस्य महाभागाः परिवारे समास्थिताः ।
तावद्देवाः सगन्धर्वा निवसन्ति न संशयः ॥ ५ ॥

भद्राया दक्षिणे पार्श्वे पुण्यो भद्रपुरः स्मृतः ।
कालीयतनयो यत्र भद्राख्यो नागनायकः ।
व्यचरद्भद्रपूराख्यं निवसाय तपोधनाः ॥ ६ ॥

तत्र भद्राख्यनागं वै सम्पूज्य मुनिसत्तमाः ।
मानवो भूतले सम्यग्नागभीतिं न पश्यति ॥ ७ ॥

तत्र भद्रवती नाम कन्दरायां महेश्वरि ।
पूज्यते नागकन्याभिर्नागैश्चान्यैस्तथैव च ॥ ८ ॥

सुभद्रासरितस्तोयैर्निमज्य मुनिसत्तमाः ।
देवीं भद्रवतीं पूज्य नरा यान्ति परां गतिम् ॥ ९ ॥

---

१. –b) ने$_{1.3}$ इच्छामः(→इच्छाम);ने$_{1.3}$ सुव्रतः(→सुव्रत). २. –b) ने$_{2}$ °हितः (→°हिताः). –d) ने$_{1}$ मयेतत् (→मयैतत्). ३. –a) ने$_{1}$ °गिरो (→°पुरो). –b) ने$_{1}$ °सत्तमः (→°सत्तमाः). ४. –b) ने$_{2.3}$ °पुर– (→°पुरं). ५. –b) ने$_{1.3}$ °स्थिता (→°स्थिताः). ६. –e) ने$_{1}$ °पूराण्यं (→°पूराख्यं).
८. –b) ने$_{2.3}$ महेश्वरी (→महेश्वरि).
९. –d) ने$_{1}$ नरो वाति (→नरा यान्ति).

ततस्तु पूर्वभागे वै भद्राया दक्षिणे तथा ।
काली संपूज्यते विप्राः कालीयेन महात्मना ॥ १० ॥

तां सुपूज्य जनो याति महेन्द्रभवनं शुभम् ।
भद्रामूले महादेवो भद्रेशो नाम वै द्विजाः ॥ ११ ॥

पूज्यते देवगन्धर्वैस्तथैव च महोरगैः ।
तं सुपूज्य नरो याति शिवलोकं न संशयः ॥ १२ ॥

चटकश्चैनवश्चैव तथा कालीयसंज्ञकम् ।
सन्त्येतानि सुपुण्यानि भद्रामूले तपोधनाः ॥ १३ ॥

तीर्थानि देवगन्धर्वैः सेवितानि समाहिताः ।
श्रृण्वन्तु मुनिशार्दूला भद्रातीर्थानि साम्प्रतम् ।
यस्या वामे महादेवो गोपीशः पूज्यते द्विजाः ॥ १४ ॥

निमज्य मुनिशार्दूला भद्रातोये प्रयत्नतः ।
पूज्य गोपीश्वरं देवं प्रयाति परमं पदम् ॥ १५ ॥

क्षेत्रपालं प्रपूज्याशु कालिं चापि हरिप्रियाम् ।
शिवलोकमवाप्नोति मानवो मुनिसत्तमाः ॥ १६ ॥

भद्रायाः शेषवत्याश्च सङ्गमे मुनिसत्तमाः ।
चिताभस्मविलिप्ताङ्गो हरः संपूज्यते द्विजाः ॥ १७ ॥

तयोः सङ्गे महाभागा रुद्रतीर्थमिति स्मृतम् ।
तत्र स्नात्वा नरो याति महेन्द्रभवनं शुभम् ॥ १८ ॥

गोपीश्वरस्य चरणात्सम्भवा सा सरस्वती ।
भद्रायाः सङ्गमं पुण्यं सङ्गता मुनिसत्तमाः ।
तस्यां स्नात्वा नरो याति ब्रह्मलोकं न संशयः ॥ १९ ॥

सङ्गमे ब्रह्मतीर्थाख्यं तीर्थं त्रिदशसेवितम् ।
विद्यते मुनिशार्दूलाः सर्वपापप्रणाशनम् ॥ २० ॥

तत्र स्नात्वा च विधिवत्पिण्डं दत्वा तथैव च ।
त्रिसप्तकुलमुद्धृत्य नरो याति परां गतिम् ॥ २१ ॥

---

११. –c) ने₃ ०देवं (→देवो). १२. –c) ने₁ जनो (→नरो).
१३. –b) ने₁ ०संज्ञकः (→°संज्ञकम्), १४. –d) ने₃ भद्र° (→भद्रा०).
१६. –b) ने₂ काली (→कालीं).
१७. –c) ने₂ ०भस्मा° (→०भस्म०).

तदूर्ध्वं नागतीर्थाख्यं तीर्थमस्ति तपोधनाः ।
तत्र स्नात्वा च मनुजो नागभीतिं न पश्यति ॥ २२ ॥

तदूर्ध्वं कनखलाख्यो वै विद्यते तीर्थनायकः ।
कणमात्रं हिरण्यं हि दत्वा स्नात्वा च मानवः ।
शिवलोकमवाप्नोति प्रसादाच्छङ्करस्य च ॥ २४ ॥

तस्यां तीर्थाण्यनेकानि सन्निधौ मुनिसत्तमाः ।
चत्वारि सुविशिष्टानि सन्निधौ मुनिसत्तमाः ॥ २५ ॥

ततो वेगवती नामा भद्रासङ्गमसङ्गता ।
तत्र स्नात्वा नरो याति महेन्द्रभवनं प्रति ॥ २६ ॥

ततो ढुंढुसरं नाम सरमस्ति तपोधनाः ।
ततः स्नात्वा च मनुजः पूज्य ढुंढुवतीं शिवाम् ॥ २७ ॥

चिताभस्मविलिप्ताङ्गं हरं सम्पूज्य वै तथा ।
शिवलोकमवाप्नोति मानवो मुनिसत्तमाः ॥ २८ ॥

ततः सरस्वतीसङ्गं भद्रायां वर्ण्यते द्विजाः ।
सरस्वतीं महादेवीं प्रेक्ष्य शिवपुरं व्रजेत् ॥ २९ ॥

ततो भद्रा महाभागा शरयूसङ्गमं गता ।
तत्र स्नात्वा च भद्रेशं पूज्य सन्तर्प्य वै पितॄन् ।
शिवलोकमवाप्नोति मानवो मुनिसत्तमाः ॥ ३० ॥

तदूर्ध्वं शरयूमध्ये पुण्यः शिवसरः स्मृतः ।
तत्र स्नात्वा महाभागाः कुलत्रयसमन्वितः ।
महेन्द्रभवनं याति मानवो नात्र संशयः ॥ ३१ ॥

इत्येतत्कथितं विप्रा भद्रामाहात्म्यमुत्तमम् ।
यः श्रृणोति महापुण्यं स याति परमां गतिम् ॥ ३२ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे भद्रामाहात्म्यं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥**

---

२२. –b) ने1.3 ०धना (→०धनाः). २४. –a) ने1 तदूद्धं कनखलाख्यो वै. –d) ने1 मानवाः (→मानवः). २५. –d) ने1 मति वै (→सन्निधौ). २६. –a) ने2.3 नाम (→नामा). २७. –d) ने1 2 शुभाम् (→शिवाम्). २८. –d) ने1 सामवो ? (→मानवो). २९. –a) ने1 °संगो (→°सङ्गं). b) ने1 भद्रायाः (→भद्रायां). –d) ने1 पूज्य (→प्रेक्ष्य). ३०. –b) ने1 गताः (→गता). –f) ने1 °सत्तमा (→°सत्तमाः) ३१. –e) ने 2 °भवने (→°भवन).

ऋषय ऊचुः ।

माहात्म्यं नागमुख्यानां श्रोतुमिच्छामः साम्प्रतम् ।
तत्तथा शिवलिङ्गानां तेषामाख्यां तथैव च ॥ १ ॥

व्यास उवाच ।

हरं गोपीश्वरं पूज्य शिखरे मुनिसत्तमाः ।
खराख्यं हि महानागं पूजयेत् सुसमाहितः ।
ततो गोपालकं नागं पूजयेत् सुसमाहितः ॥ २ ॥

तथैव नागकन्यानां गोपीनां सङ्गमेव च ।
संपूज्य मानवो याति गोपीशपदवीं शुभाम् ॥ ३ ॥

ततो गोपि(पी ?)वने देवीं कालीं सम्पूज्य वै द्विजाः ।
मानवः सर्वदुर्गेभ्यो न विन्दति भयं महत् ॥ ४ ॥

याः सर्वाः सरितः सन्ति पुण्ये नागगिरौ द्विजाः ।
ताः सर्वाः नागमुख्यैर्वै समाहूता दिवस्थलात् ।
तासु स्नात्वा नरो याति महेन्द्रभवनं शुभम् ॥ ५ ॥

शाण्डिल्येन समाहूतां पुण्यां गुप्तसरस्वतीम् ।
निमज्य मानवो याति महेन्द्रभवनं शुभम् ॥ ६ ॥

ततस्तु पश्चिमे भागे कोकाकोटीश्वरी शिवा ।
कालिकेति च विख्याता पूज्यते देवनायकैः ॥ ७ ॥

ततस्तु दक्षिणे विप्राः कालीयाद्यैर्निषेविता ।
भद्रनामा महादेवी पूज्यते मुनिसत्तमाः ॥ ८ ॥

---

२. ने1.2 ef ⊙.–b) ने2 °सत्तमा (→ °सत्तमाः). –c) ने2 खराख्यां (→खराख्यं).

३. –b)ने2 सह्य° (→सङ्ग°). –d) ने2 शुभम् (→शुभाम्).

४. –b) ने1 स पूज्य (→संपूज्य).

६. –a) ने2 शांडिलेन (→शाण्डिल्येन).

७. –b) ने2 कोटीश्वर–(→कोटीश्वरी). –c) ने2.3* (→च).

८. –a) ने2 द *णे (→दक्षिणे). –c) ने1 भद्रा (→ भद्र–).

सुभद्रासरितोर्मध्ये भद्रां यः पूजयेद् द्विजाः ।
त्रिसप्तकुलमुद्धृत्य स याति परमां गतिम् ॥ ९ ॥

ततस्तु कनकाख्यस्य शिखरे मुनिसत्तमाः ।
पूज्य तां शाङ्करीं देवीं नागकन्यानिषेविताम् ।
तां सुपूज्य महाभागा नरो नाप्नोति दुर्गतिम् ॥ १० ॥

ततस्तु शिखरे नागो फेनिलाख्यः प्रपूज्यते ।
कालीयस्य सुतो ज्येष्ठः सर्वकामवरः(र ?) प्रदः ॥ ११ ॥

तं सुपूज्य सुकुसुमैस्तथा तोयैः समाहितः ।
प्रन(ण?)श्यति महाभागा मनुष्याणाममङ्गलम् ॥ १२ ॥

ततस्त्रिलोकसंज्ञो वै नागोऽस्ति मुनिसत्तमाः ।
आरोग्यं तं सुपूज्याशु प्राप्यते न हि संशयः ॥ १३ ॥

ततो वनान्तशिखरे मूलनारायणं शुभम् ।
पूज्यते नागकन्याभिर्नागैश्चान्यैस्तथैव च ॥ १४ ॥

येन नारायणं देवं समाराध्य तपोधनाः ।
नारायणाख्या संप्राप्ता दुःप्राप्यैर्दैवतैरपि ।
तमाराध्य नराः सर्वे सिद्धिं यान्ति न संशयः ॥ १५ ॥

ऋषय ऊचुः ।

कथं नारायणाख्यां सः प्राप्तवान् मुनिसत्तम ।
कथं स शिखरारुढो ज्ञानमापदुरत्ययम् ॥ १६ ॥

व्यास उवाच ।

कालीयदयितायां वै पुङ्गव्यां मुनिसत्तमाः ।
ब्राह्मणो वेदवेदान्ततत्त्वज्ञोविष्णुमव्ययम् ॥ १७ ॥

समाराध्य स पुङ्गव्या मूलर्क्षे संबभूव ह ।
मूलर्क्षजातं तनयं नदीमध्ये विनिक्षिपत् ॥ १८ ॥

---

९. –b) ने$_{1}$ पूज्यते (→पूजयेद्). –c) ने$_{3}$ °कु* (→°कुल–). १०.–b) ने$_{2}$ शिषरे (→शिखरे). –c) ने$_{2}$ शांकरी (→शाङ्करीं.). १४. –a) ने$_{1}$ °शिषरे (→ °शिखरे). –b) ने$_{2.3}$ °नारायणः (→°नारायणं); ने$_{1}$ शुभः, ने$_{2}$ शुभा (→शुभम्). १५. –b) ने$_{1}$ दुःप्राप्या, ने$_{3}$ दुःप्रप्य(?) (→दुःप्राप्यैर्). १६. –a) ने$_{1}$ कथं नारायणाख्यां सः.–b) ने$_{1}$ °सत्तमः (→°सत्तम).

१७. –a)ने$_{1}$ कालीष° (→कालीय°). –b) ने$_{2}$ °सत्तमा (→°सत्तमाः). १८. –a) ने$_{1}$ पुंगव्यां (→पुङ्गव्या) –b) ने$_{2.3}$ मूलक्षे (→मूलर्क्षे). –c) ने$_{2}$ मूलक्ष° (→मूलर्क्ष°). –d) ने$_{2}$ विनिक्षिपेत् (→विनिक्षिपत्).

क्षिप्तमात्रस्तु शिखरे जगाम मुनिसत्तमाः ।
न च तं जानयामास कालीयः शिखरे गतम् ।
न च सा पुङ्गवती माता जीवन्तं रुदती सुतम् । ।१९ ॥

स च तं शिखरं प्राप्य जातमात्रस्तपोधनाः ।
नारायणं जगन्नाथं पुराणं पुरुषोत्तमम् ॥ २० ॥

समाराधय धर्मात्मा स्मरन् प्राक्तनसंभवम् ।
शीर्णपर्णानिलाहारो वायुभक्षो जितेन्द्रियः ।
नारायणं निरीहं वै पूजयामास सुव्रताः ॥ २१ ॥

ततः काले व्यतीते तु पूजयन् विष्णुमव्ययम् ।
आविर्भूतं जगन्नाथं ददर्श मुनिसत्तमाः ॥ २२ ॥

तं दृष्ट्वा कोयमित्येव पुराणपुरुषो यथा ।
चिन्तयामास धर्मात्मा स नागो मुनिसत्तमाः ॥ २३ ॥

इति संचित्यमानं तं भगवान् प्रभुरव्ययः ।
मेघगम्भीरयावाचा उवाच करुणानिधिः ॥ २४ ॥

नारायण उवाच ।

नारायणोऽस्मि वै नाग मास्तु ते संशयो वृथा ।
स्मर त्वं प्राक्तनं पुण्यं येन त्वं तप्यसेऽधुना ॥ २५ ॥

जन्मनि प्राक्तने नाग ब्राह्मणो वेदपारगः ।
जातोऽसि गौतमकुले ममार्चनपरायणः ॥ २६ ॥

आराधितेन ते नाग मया संदर्शितं वपुः ।
पूजितं देवगन्धर्वैर्नारदाद्यैस्तपस्विभिः ॥ २७ ॥

त्वया संयाचितस्तत्र मतश्चाभीप्सितं वरम् ।
अजरामरदेहत्वं द्वितीये जन्मनि शुभम् ॥ २८ ॥

तथेत्युक्त्वा तदा नाग सत्यलोकं गतोस्म्यहम् ।
गते मयि त्वया सर्वे भूसुरास्तर्पिता तथा ॥ २९ ॥

---

१९. -c)ने1 नव तं(→ न च तं). -d) ने1 कालीयं, ने2 कालीय-(→कालीयः). २०. -d) ने1 *राणं (→पुराणं). २१. -a) ने1 समारराध (→समाराधय). -b) ने1 ०संभवन् (→०संभवम्). २३. -a) ने2 काय० (→कोय०). २६. -b) ने2 विद० (→वेद०).-d) ने2 ०परायण (→०परायणः). २८. -a) ने3 संयाचितं (→संयाचितस्). -b) ने2 मंतस्वाभीप्सितं वरम्. २९. -d) ने3 तर्पितास् (→तर्पिता).

त्वं तत्र दैवयोगेन पञ्चत्वं प्राप्य सुव्रत।
जातोऽसि नागमुख्यस्य कुले महति साम्प्रतम्॥ ३०॥

पितृभ्यामपि संत्यक्तो भूतमात्रशुभे दिने।
ममार्चनपरो भूत्वा इहायातोऽसि साम्प्रतम्॥ ३१॥

प्राक्तनं संभवं स्मृत्वा तुषितोस्मि महामते।
तेन मे दर्शितं रूपं त्वया पुण्येन साम्प्रतम्॥ ३२॥

न कदाचिन् महाभाग दर्शनं विफलं भवेत्।
वरं वरय भद्रं ते यत्ते मनसि वर्त्तते॥ ३३॥

व्यास उवाच।

नारायणस्य वचनाज्ज्ञात्वा नारायणं प्रभुम्।
नमस्कृत्वा तदा नागो वचनं समुवाच ह॥ ३४॥

नाग उवाच।

पितृभ्यामपि संत्यक्तस्त्वामाराध्य जगत्पते।
इह तिष्ठामि शिखरे क्षुत्पिपासादिवर्जितः॥ ३५॥

करुणादर्शितं रूपं त्वयेह परमेश्वरः।
लोकनाथेन देवेन सृष्टिसंहारकारिणा॥ ३६॥

यदि तुष्टोसि देवेश यदि त्वं वरदो ह्यसि।
स्वांशं प्रयच्छ तन्मह्यं वरमेतद्वृणोम्यहम्॥ ३७॥

व्यास उवाच।

तथेत्युक्त्वा स भगवान् तत्रैवान्तरधीयत।
सोऽपि नारायणस्यांशं प्रापविष्णोरनुग्रहात्॥ ३८॥

प्राप्य नारायणस्यांशं नागोऽपि मुनिसत्तमाः।
दर्शयामासनागेषु रूपाणि सुबहूनि सः॥ ३९॥

ततः प्रभृति तं नागं सर्वे नागास्तपोधनाः।
मूलनारायणं नाम कथयामासुः शोभनम्॥ ४०॥

---

३१. –b) ने1 इत्यशुभे (→ –मात्रशुभे).
३४. –d) ने2 प्रभुः (→प्रभुम्). ३५. –c) ने1 तिष्ठसि (→तिष्ठामि). ३७. –c) ने1 स्वाशं (→स्वांशं). ३८. –c) ने2 नारायणः, ने3 नारायणात् (→नारायण–). ३९. –b) ने2 °सत्तमा (→°सत्तमाः). ४०. –a) ने2·3 सर्वे (→नागं). –b) ने2·3 नागास्तस्मै (→सर्वे नागाः).

श्रुत्वाथ पुङ्गवी माता जीवन्तं स्वसुतं द्विजाः ।
जगाम शिखरे पुण्ये यत्र नागः सुशोभने ॥ ४१ ॥

ततः स्वमातरं दृष्ट्वा स नागो मुनिसत्तमाः ।
प्रत्युत्थाय प्रपूज्याशु अर्घं तस्यै प्रकल्पयत् ॥ ४२ ॥

ततो गङ्गाजलैः पुण्यैः पूरितं शुभलक्षणम् ।
स्वमात्रे प्रददौ नागः कृत्वा पादावनेजनम् ॥ ४३ ॥

यावदर्घजलं भूमौ निपतन् मुनिसत्तमाः ।
तावद्दर्शनसंभूता नदीनागैर्निषेविताम् ॥ ४४ ॥

मूलनारायणस्थानान्नाग नारायणी सरित् ।
बभूव मुनिशार्दूला नागवंशप्रतारिणी ॥ ४५ ॥

यथा नारायणाख्यां सः प्राप्तवान् नागनायकः ।
तथा निवेदितं विप्राः किमन्यत्प्रष्टुमिच्छथः ॥ ४६ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे नागपर्वतमाहात्म्ये द्व्यशीतितमोऽध्यायः ॥ ८२ ॥**

---

४१. –a) ने1 श्रुत्वा तुर्युंगवा माता. –c) ने2 शिषरे (→शिखरे).
४४. –b) ने1 प्रपतन् (→निपतन्). –c) ने1 तावद्वदर्शनं भूतां.
४५. –d) ने1 °प्र*रिणि (→°प्रतारिणि).
पुष्पिका—ने1 °पु° मा° (→°पुराणे मानसखण्डे).

# ८३

ऋषय ऊचुः ।

अथान्यदपि माहात्म्यं नागानां मुनिसत्तम ।
विशिष्टानी(नां ?) नदीनां च श्रोतुमिच्छामहे वयम् ॥ १ ॥

व्यास उवाच ।

नागानां मुनिशार्दूलाः कुलानि सुबहून्यमिव(पि ?) ।
निवसन्ति महाभागाः सुपुण्ये नागपर्वते ॥ २ ॥

शृण्वन्तु मुनिशार्दूलाः प्राधान्येन मयोदिताम् ।
बहुलान्नैव शक्यन्ते वक्तुं वर्षशतैरपि ॥ ३ ॥

नागनारायणीमध्ये पुंगवीनागनायकैः ।
पूज्यते मुनिशार्दूला नागपुत्रैर्निषेविता ॥ ४ ॥

नागनारायणीमध्ये चण्डिकासङ्गमं शुभम् ।
विद्यते मुनिशार्दूलाः सर्वपापान्तकारकाम् ॥ ५ ॥

तत्र स्नात्वा च वृत्तेशं चिताभस्मविलेपनम् ।
संपूज्य मुनिशार्दूला नरः शिवपुरं व्रजेत् ॥ ६ ॥

दक्षिणे नागनाथाख्यं हरं संपूज्य पर्वते ।
प्राप्नोति देवभुवनं मानवो मुनिसत्तमाः ॥ ७ ॥

नागनारायणीमध्ये शैवीसङ्गं वदन्ति हि ।
तत्र स्नात्वा च मनुजः शिवं संपूज्य सुव्रताः ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ८ ॥

---

१. ने2.3. १cd–२ab ⊙. –b) ने2.3 °सत्तमः (→°सत्तम). २. –c) ने2.3 °भाग (→°भागाः). ३. –b) ने1 शादूंला(→°शादूंलाः). –c) ने2.3 बहुला नैव (→बहुलान्नैव) ४. –b) ने1 नाम° (→नाग°); ने3 पुंगवैर्नागनायकैः. –c) ने3 पूज्यंते (→पूज्यते). –d) ने2 निषेविताः (→निषेविता).

५. –b) ने1 °संगमे (→°सङ्गमं).

७. –c) ने.3 °भवनं (→°भुवनं). –d) ने1.2 °सत्तमा (→°सत्तमाः).

८. –d) ने2 शिव–(→शिवं).

वामे तस्या महादेवी दुर्गानाम प्रपूज्यते ।
सिद्धगन्धर्वमनुजैर्नागमुख्यैस्तथैव च ॥ ९ ॥

तां सुपूज्य महाभागाः स्नात्वा दुर्गासरिज्जले ।
महेन्द्रभवनं याति मानवो मुनिसत्तमाः ॥
दुर्गासौमवती सङ्गे सर्वदुर्गप्रणाशनम् ॥ १० ॥

हरं संपूज्य मनुजो निमज्य विधिपूर्वकम् ।
शिवलोकमवाप्नोति प्रसादाच्छूलपाणिनः ॥ ११ ॥

ततस्तु पर्वतप्रान्ते शेषः संपूज्यते द्विजाः ।
देवगन्धर्वमनुजैस्तथा नागैर्महोरगैः ॥
तं सुपूज्य जनो याति महेन्द्रभवनं शुभम् ॥ १२ ॥

वामे मूलाख्यनागस्य त्रिपुराख्यस्तपोधनाः ।
नागः संपूज्यते पुण्यः सर्वपापप्रणाशनः ॥ १३ ॥

ततस्तु मुनिशार्दूला नागनारायणसुताम् ।
आराधयन्ति गिरिजां सुपुत्राख्यां शशिप्रभाम् ॥
संपूज्य मानवो याति पातकान्तं न संशयः ॥ १४ ॥

फेनिलस्य सुतो ज्येष्ठः सुचूडाख्यस्तपोधनाः ।
पूज्यते दक्षिणे भागे नागनारायणस्य च ॥ १५ ॥

ततस्तु पर्वताग्रे वै चोत्तरे फेनिलस्य च ।
धवलं नागनागेशं नागकन्यानिषेवितम् ॥
प्रसादात्तस्य संपूज्य विभवं प्राप्नुयान्नरः ॥ १६ ॥

तत्रैव वासुके कन्यां शिवतोषणतत्पराम् ।
वेलावतीं महापुण्यां नागकन्यासमन्विताम् ॥ १७ ॥

संपूज्य तां महाभागा हरध्यानपरायणाम् ।
मनोभिलषितां सिद्धिं प्राप्यते नात्र संशयः ॥ १८ ॥

---

९. –a) ने$_{1}$ महा (→वामे). १०. –a) ने$_{2}$ °भागा (→°भागाः). –c) ने$_{3}$ यांति (→याति). –d) ने$_{3}$ मानवा [:] (→मानवो); ने$_{1\cdot2}$ °सत्तमा (→°सत्तमाः). १२. ने$_{3}$.१२f–१४e⊙. –b) ने$_{1\,2}$ शेष-(→शेषः); ने$_{2\cdot3}$ द्विजा (→द्विजाः). १४. –b) ने$_{2}$ सुताम् (→सुतान्). –c) ने$_{2}$ आराधयति (→आराधयन्ति). –d) ने$_{2}$ पुत्राख्यं (→पुत्राख्यां).
१५. –b) ने$_{2\cdot3}$ सुवडाख्यस् (→सुचूडाख्यस्). १७. –c) ने$_{2}$ विलावतीं (→वेलावतीं); ने$_{3}$ °पुण्या (→°पुण्यां). –d) ने$_{3}$ °समन्विता (→°समन्विताम्).
१८. –b) ने$_{3}$ °परायणा (→°परायणाम्). –c) ने$_{1}$ °लखितां (→°लषितां).

ततस्तु तक्षको नागो गुहामध्ये तपोधनाः ।
पूज्यते नागमुख्यैश्च धवलाद्यैर्न संशयः ॥ १९ ॥

ततः पर्वतमध्ये वै कालीयो यत्र तिष्ठति ।
इलावर्त्तो महानागः कर्कोटकधनञ्जयः ॥ २० ॥

धृतराष्ट्रः सुराष्ट्रश्च पूज्यन्ते नागनायकाः ॥
तान् दृष्ट्वा मनवो धन्यः ख्यायते मुनिसत्तमाः ॥ २१ ॥

नागकन्यासहस्रं वै कालीयो यत्र तिष्ठति ।
विद्यते मुनिशार्दूला कालीयस्य महात्मनः ॥ २२ ॥

नागकन्यासहस्रं वै संपूज्य मुनिसत्तमाः ।
मानवः परमां सिद्धिं प्रयाति न हि संशयः ॥ २३ ॥

मधुर्नाम महानागो मूलनारायणस्य हि ।
नि(न्य ?)वसद्दक्षिणे पार्श्वे नागमुख्यस्तपोधनाः ॥ २४ ॥

एतैर्नागैर्महानागो मूलनारायणो द्विजाः ।
पूज्यते शिखराग्रे वै नागकन्याभिरेव च ॥ २५ ॥

कदाचित् कुपितो नागः शिखरे मुनिसत्तमाः ।
शतमष्टोत्तरं रूपं चकार बहुरूपधृक् ॥ २६ ॥

कदाचिच्छिखरं हित्वा कालीयेन प्रकोपितः ।
वने स प्रययौ नागो मूलनारायणो द्विजाः ॥ २७ ॥

ततस्तु पश्चिमे भागे वनान्तरगतं हि तम् ।
पूजयामासुः गन्धर्वा नागनारायणं शुभम् ॥ २८ ॥

कदाचिद्विपिने घोरे वासुकिप्रमुखैर्द्विजाः ।
कोपितो नागशार्दूलस्तोयमध्ये जगाम ह ॥
तोये नागसहस्रं हि पूजयामास तं तथा ॥ २९ ॥

यथा मान्यो महेन्द्राद्यैः शेषः सङ्गीयते द्विजाः ।
पूज्यते देवगन्धर्वैर्मूलनारायणस्तथा ॥ ३० ॥

तत्रैव शिखाराग्रे वै नागो वासुकिसंज्ञकः ।
पूज्यते नागकन्याभिर्नागमुख्यस्तपोधनाः ॥ ३१ ॥

---

२१. –b) ने3 पूज्यते (→पूज्यन्ते); ने1.2 °नायका (→°नायकाः). २२. ने1.⊙.
२३. –d) ने3 प्रयांति (→प्रयाति).
२४. –c) ने1.3 निवसद् (→नि(न्य?,वसद्). २५. –b) ने1.2 द्विजा (→द्विजाः).
–c) ने2.3 शिषराग्रे (→शिखराग्रे). २८. –d) ने3 नागं (→नाग-).
२९. –f) ने2.3 °मासुस् (→°मास). ३१. –d) ने2 तपोधन (→तपोधनाः).

यस्य नेत्रेण भगवान् वेष्टयित्वाथ मन्दरम् ।
ममन्थ सागरं सर्वे महेन्द्रप्रमुखैः सह ॥ ३२ ॥

यस्याङ्गे वासुदेवस्य दृश्यन्ते चाङ्गुलिक्षताः ।
शङ्खचक्रादिपद्मेन लक्षिताः शुभलक्षणाः ॥ ३३ ॥

संपूज्य वासुकिं नागं नागकन्याभिरन्वितम् ।
ईतयो नानु पश्यन्ति मानवा नात्र संशयः ॥ ३४ ॥

शिखराग्रे महाभागः पुण्यो नागह्रदः स्मृतः ।
तत्र स्नात्वा नरो याति महेन्द्रभवनं शुभम् ॥ ३५ ॥

मधुना नागमुख्येन या सा मधुमती सरित् ।
प्रकाश्य वाहिता पुण्या रामगङ्गां प्रतिद्विजाः ॥ ३६ ॥

ऋषय ऊचुः ।❀

कथं तत्र सरं चक्रुर्नागाः सर्वे तपोधनः ।
एतदाख्याहि भगवन् सर्वज्ञोऽसि महामते ॥
कथं हि मधुनागेन वाहिता मधुवाहिनी ॥ ३७ ॥

व्यास उवाच ।

मूलनारायणं नागमुपास्य मुनिसत्तमाः ।
नागाः सर्वे सरं चक्रुः पूज्य मन्दाकिनीजलैः ॥ ३८ ॥

न मधुं दर्शयामासुः सरं तं नागनायकाः ।
विक्रीड(डु ?)स्ते सरे तस्मिन्नागकन्याभिः संघशः ॥ ३९ ॥

ततस्तु कुपितो भूत्वा मधुनागस्तपोधनाः ।
सरात्तस्मान्मधुमती वाहयामास तां नदीम् ॥४० ॥

---

३२. –c) ने1 सवं (→सर्वे).

३३. –c) ने1 चिह्नेन (→पद्मेन). –d) ने1 पद्मेन (→लक्षिताः); ने3 °लक्षणं (→°लक्षणाः). ३४. –c) ने2 मनु (→नानु). ३६. –b) ने1 यस्मान्(→या सा). –d) ने2.3 रामं (→राम–).

❀ ने2 ऋषय उवाच.

३७. ने1.cd⊙; ने3.ef⊙.

३८. –c) ने3 सरश् (→सरं). ३९. –b) ने1.2 °नायका (→°नायकाः). –c) ने1 चक्रोदुस्, ने2 चिक्रीडस्, ने3 विक्रीडस् (→विक्रीड(डु?)स्); ने3 सरं (→सरे). –d) ने1 संयशः (→संघशः).

कालीयस्य महाभागा वामपार्श्वे सुपुण्यदा ।
पुण्या मधुमती नाम्ना विद्यते सरितां वरा ॥ ४१ ॥

तस्यां स्नात्वा च विधिवत् संतर्प्य च पितॄन् तथा ।
महेन्द्रभवनं याति मानवो नात्र संशयः ॥ ४२ ॥

इलावर्तो महानागो वामे तस्य प्रपूज्यते ।
तं सुपूज्य नरो विप्राः पातकाद्विप्रमुच्यते ॥ ४३ ॥

तथा इलावती देवी देवगन्धर्वपूजिता ।
विद्यते नागराजेन सेविता सुमनोहरा ॥
तां सुपूज्य मनुष्याणामग्निभीतिर्न जायते ॥ ४४ ॥

तस्या दक्षिणपार्श्वे वै कालीयो नागनायकः ।
विद्यते नागकन्यानां सहस्रैः परिवारितः ॥ ४५ ॥

श्रेष्ठो नागसहस्राणां नागपर्वतवासिनाम् ।
अष्टभिः प्रमुखैः पुत्रैः सेव्यमानो महायशाः ॥ ४६ ॥

वेदवेदाङ्गतत्त्वज्ञः सर्वशास्त्रविशारदः ।
नागानां प्रथमो नागो यो गुरुर्गीयते द्विजाः ॥ ४७ ॥

नागपूरस्थशिखरे राजते मुनिसत्तमाः ।
कालीयं पूज्य मनुजा गन्धपुष्पाक्षतैस्तिलैः ॥ ४८ ॥

पञ्चगव्यैस्तथाशुद्धैर्मौक्तिकैर्मणिपुष्पकैः ।
परां सिद्धिं महापुण्याः प्राप्नुवन्ति न संशयः ॥ ४९ ॥

तत्र नागवती नामा गुहा नागैः प्रपूजिताः ।
विद्यते नागकन्याभिः सेविता सुमनोहरा ॥ ५० ॥

तत्र नागजलैः पुण्यैर्निमज्य विधिपूर्वकम् ।
देवीं नागवतीं पूज्य परां सिद्धिमवाप्नुयात् ॥ ५१ ॥

वासुकेर्मातरं तत्र सपूज्य मुनिसत्तमाः ।
नमो नारायणावासं प्राप्नोति न हि संशयः ॥ ५२ ॥

कालीयस्य महाभागा वामे मधुवती सरित् ।
नागकन्याभिः पुण्याभिः सेविता सुमनोहरा ॥ ५३ ॥

---

४१. –c) ने1 2 नामा (→नाम्ना). ४२. –c) ने1 यांति (→याति). ४३. –a) ने1 °भागो (→°नागो).–b) ४४. –a) ने1 ** (→देवी). ने1 °पूजिताः (→°पूजिता). –d) ने1 °हराः (→°हरा). ४६. ने1 अष्टो ( →श्रेष्ठो). ५२. –a) ने1 वासुके (→वासुकेर्).

मूले नागसरस्तस्या विद्यते देवसेवितम् ।
ततस्तु शकटीसङ्गं पुण्यमस्ति तपोधनाः ॥ ५४ ॥

निमज्य मानवस्तत्र सुनन्दा च महेश्वरीम् ।
संपूज्य मुनिशार्दूला मानवः शाङ्करं पदम् ॥
प्रयाति न च सन्देहः सत्यमेतन्मयोदितम् ॥ ५५ ॥

देवदानवगन्धर्वैस्तथा नागैर्महाबलैः ।
नागकन्याभिः पुण्याभिः पूजितां परमेश्वरीम् ।
संपूज्य मानवाः सम्यक् पापिनोपि तरन्ति हि ॥ ५६ ॥

तावद्देहे मनुष्याणां वैचित्यं जायते द्विजाः ।
यावद्देवीं सुनन्दां तां पूजयन्ति न शोभनाम् ॥ ५७ ॥

अरण्ये प्रान्तरे वापि दावाग्नेर्मध्यगोपि हि ।
स्मृत्वा देवीं सुनन्दां वै नरो मुच्येत सङ्कटात् ॥ ५८ ॥

बलिपूजोपहारेण सुनन्दां पूजयन्ति ये ।
तेषामभीप्सितं कामं तुषिता संप्रयच्छति ॥ ५९ ॥

सुनन्दां तत्र संपूज्य ततः कुगवतीं व्रजेत् ।
देवीं कुगवतीं पूज्य नरः प्राप्नोति गौरवम् ॥ ६० ॥

कुगमधुवतीसङ्गे कुगेशो नाम शङ्करः ।
चिताभस्मविलिप्ताङ्गः पूज्यते सिद्धनायकैः ॥ ६१ ॥

ततो मधुवती पुण्या रामगङ्गासुसंगमम् ।
सङ्गता मुनिशार्दूला नागकन्यानिषेविता॥ ६२ ॥

वामे तस्या महाभागाः पुण्यः कण्वगिरिः स्मृतः ।
तत्र कण्वाश्रमं विप्रा विद्यते ऋषिसेवितम् ॥ ६३ ॥

तत्र कण्वमृषिश्रेष्ठं संभाव्य मुनिसत्तमाः ।
वेदवेदाङ्गतत्त्वज्ञो जायते मानवो भुवि ॥ ६४ ॥

---

५४. –a) ने$_{1.2}$ °सरं (→°सरस्).

५५. –b) ने$_{2}$ सुनंदो (→सुनंदा). ५७. –b) ने$_{1.3}$ वै चित्यं (→वैचित्यं). –c) ने$_{2}$ देवी (→देवीं); ने$_{2}$ सुनंदानां (→सुनन्दां तां). ५९. –d) ने$_{1}$ मुषिता (→तुषिता). ६०. –b) ने$_{2.3}$ कुगंवती (ने$_{3}$ °तिं) (→कुगवतीं); ने$_{2}$ व्रजत् (→व्रजेत्). –c) ने$_{2}$ देवी (→देवीं). ६१. –a) ने$_{1.2}$ कुगा° (→कुग°). –b) ने$_{3}$ नाग–(→नाम). ६४. –b) ने$_{1}$ स भाव्य (→संभाव्य).

पर्वताग्रे महापुण्यां कण्वां देवीं प्रपूज्य वै ।
मानवः सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ६५ ॥

कालीयपुत्रपौत्राद्यास्तक्षकस्य सुतादयः ।
इलावर्त्तकुलोद्भूताः कर्क्कोटककुलोद्भवाः ॥
निवसन्ति महानागा सुपुण्ये कण्वपर्वते ॥ ६६ ॥

तत्र वै पुण्डरीकाख्यो नागः संपूज्यते द्विजाः ।
पुण्डरीकं प्रपूज्याशु ज्ञानवाञ्जायते नरः ॥ ६७ ॥

तत्रैव कुण्डली नाम नागः संपूज्यते गणैः ।
दिनत्रयकृतं पापं दर्शनात्तस्य नश्यति ॥ ६८ ॥

ततो होमगिरिः पुण्यः कथ्यते मुनिसत्तमाः ।
तत्र नागैर्हुतं द्रव्यं समश्नन्ति दिवौकसः ॥ ६९ ॥

तत्र होमान्वसंस्नाता हुताशनविनिसृताः ।
नदी हुतवती नामा विद्यते मुनिसत्तमाः ॥ ७० ॥

तस्यां निमज्य विधिवत्पितॄन् संतर्प्य वै तथा ।
वाजिमेधस्य यज्ञस्य फलमाप्नोति मानवः ॥ ७१ ॥

ततः पृथुगिरिः पुण्यो विद्यते मुनिसत्तमाः ।
यत्र स्थित्वा हिमगिरिं प्रार्थयित्वा वसुन्धराम् ॥
विलिखत्स महाभागः पृथुर्वैण्यः प्रतापवान् ॥ ७२ ॥

तत्र पृथूदके पुण्ये निमज्य मुनिसत्तमाः ।
स्थितं तथा सरिन्मध्ये चिताभस्मविलोपनम् ॥
पार्थिवेशं हरं पूज्य नरः शिवपुरं व्रजेत् ॥ ७३ ॥

सुनन्दा च महानन्दा काली चैव हरप्रिया ।
महादेव्यो महाभागाः स्थानेषु विविधेषु च ॥ ७४ ॥

---

६५. –b) ने$_{1\cdot 2}$ कस्त्वां (→कण्वां); ने$_{3}$ ते (→वै).

६६. ने$_{2.3}$.ab⊙.–c) ने$_{1}$ इलावर्तें (→इलावर्तं–). ६७. –a) ने$_{3}$ पुण्डरीकाक्षो (→पुण्डरीकाख्यो). –b) ने$_{2}$ नाग (→नागः); ने$_{3}$ गणैः (→द्विजा). ६९. –a) ने$_{1}$ उत्तरे (→कथ्यते). ७०. –) ने$_{3}$ °संस्नात्वा (→°संस्नाता). –b) ने$_{2.3}$ °विनिसृतः (→°विनिसृता). ७२. –c) ने$_{3}$ °भागाः (→°भागः). ७३. –c) ने$_{1}$ पृथा (→तथा). –f) ने$_{1}$ °प्रदं (→°पुरं).

पूज्यन्ते नागकन्याभिर्नागमुख्यैस्तथैव च ।
देवगन्धर्वदितिजैर्दानवैश्च विशेषतः ॥ ७५ ॥

तेषु पर्वतमुख्येषु निवसन्ति महाबलाः ।
नागाश्च दानवाश्चैव तथैव देवतागणाः ॥
निवसन्ति महाभागा नागानां हितकाम्यया ॥ ७६ ॥

कालीयस्य महाभागा दक्षिणे वासुकिः स्मृतः ।
जलशायी महापुण्यो नागमुख्यस्तपोधनाः ॥ ७७ ॥

चरणात्तस्य निष्क्रान्ता बोधनेन महात्मना ।
विद्यते बहुला नामा पुण्यतोयवहा सरित् ॥ ७८ ॥

वामे तस्या महानागः शितरूपस्तपोधनाः ।
नागायुतबलो नागो विद्यते मुनिसत्तमाः ॥
तं स्मृत्वा नागशार्दूला अहिभीतिं न विन्दति ॥ ७९ ॥

ततस्तु दक्षिणे तस्याः पिङ्गलाख्यो महोरगः ।
सेवितो नागकन्याभिर्नागैश्चान्यैस्तथैव च ॥ ८० ॥

पिङ्गलं पूज्य वै विप्रा गन्धपुष्पाक्षतैः शुभैः ।
मनोभिलषितां सिद्धिं कामं प्राप्नोति मानवः ॥ ८१ ॥

चरणात्तस्य भूता तु भूजङ्गाख्या महानदी ।
विद्यते नागकन्याभिः सेविता सुमनोहरा ॥ ८२ ॥

प्राधान्येन महानागाः कथिता मुनिसत्तमाः ।
आयुरारोग्यदातारः सुखसौख्यप्रवर्द्धकाः ॥ ८३ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे नागाख्याने**
**त्र्यशीतितमोऽध्यायः ॥ ८३ ॥**

---

७५. –c) ने$_{1}$ भाग° (→नाग°). ७६. –d) ने$_{1}$ दे*ता° (→देवता°)
७७ –c) ने$_{1}$ जलं (→जल–). ७९. –a) ने$_{1}$ °भागः (→°नाग) –e) ने$_{2}$ °शादूंला (→°शादूंल). –f) ने$_{3}$ महि° (→अहि°).
८३. –a) ने$_{1.2}$ मया (→महा–).
**पुष्पिका**—ने$_{1}$ स्कं. पु. मा. (→स्कंदपुराणे मानसखण्डे).

ऋषय ऊचुः ।

कमाराध्य महानागा विस्तीर्णे नागपर्वते ।
निवसन्ति महाभाग ज्ञातुमिच्छामस्तद्वयम् ॥ १ ॥

व्यास उवाच ।

सर्वे नागा महात्मानो देवीं त्रिभुवनेश्वरीम् ।
समाराध्य बलिं शुद्धां बुभुजुर्मुनिसत्तमाः ॥ २ ॥

देवीमाराधयामास मूलनारायणः स्वयम् ।
स तस्मिन्शिखरे पुण्ये मूर्तिं कृत्वा महीमयीम् ॥
स चकारार्हणां तस्याः पुष्पधूपाग्नितर्पणैः ॥ ३ ॥

तेन संपूजिता देवी पुष्पधूपाग्नितर्पणैः ।
आविर्बभूव पुरतः साक्षादग्निशिखोपमा ॥ ४ ॥

तां दृष्ट्वा मुनिशार्दूलाः स नागोत्थाय सत्वरः ।
ननाम परया भक्त्या देवीं त्रिभुवनेश्वरीम् ॥ ५ ॥

ततः प्रणमिता देवी तेन नागेन सुव्रताः ।
वरं वरय भद्रं ते इत्युवाच महेश्वरी ॥ ६ ॥

ततो वव्रे महानागो द्रष्टुमिच्छामि ते पुनः ।
तत्र त्वां पूजयिष्यामि नागैः सह महेश्वरि ॥ ७ ॥

व्यास उवाच ।

तथेत्युक्त्वा भगवती मूलनारायणस्य वै ।
कन्दरां दर्शयामास सिद्धगन्धर्वसेविताम् ॥ ८ ॥

---

१. –d) ने2 कमा*ध्य, ने3 कमाध्याय (→कमाराध्य). –d) ने1.2 ज्ञातुमिछाम तद्वयम्. ३. –a) ने1 °मारोधया° (→°माराधया°). –e) ने2.3 चकाराहंणो (ने3 °णं) (→चकाराहंणां). ४. –a) ने2 संपूज्ञितां (→संपूजिता). –d) ने1 विषोपमा, ने2 शिषोपमा (→शिखोपमा). ६. –c) ने1-स्त्वित्युवाच, ने2*त्युवाच(→इत्युवाच). ७. –d) ने2.3 महेश्वरी (→महेश्वरि). ८. –c) ने1 कन्दरा (→कन्दरां).

दशयोजनविस्तीर्णां योजनद्वादशायताम् ।
दर्शयन्तीं तथा कान्तां ज्योतिरूपां तथापराम् ।
ददर्श स महाभागो भोगिराजनिषेविताम् ॥ ९ ॥

दर्शयित्वा महादेवी पुरं स्वसिद्धसेवितम् ।
पश्य तां नागमुख्यानां तत्रैवान्तरधीयत ॥ १० ॥

मूलनारायणो विप्रास्तां ततः परमेश्वरीम् ।
पूजयामास विधिवन्नागैः सह तपोधनैः ॥ ११ ॥

ततस्तां कन्दरां सर्वे आख्यया मुनिसत्तमाः ।
मूलनारायणी नाम्ना कथयामासुः शोभनाम् ॥ १२ ॥

सर्वे नागा महाभागास्तामाराध्य महेश्वरीम् ।
तस्थुर्नागपुरे रम्ये नागकन्यानिषेविते ॥ १३ ॥

मूलनारायणी देवीं गिरिकन्दरवासिनीम् ।
पूज्य याति परां सिद्धिं मानवो मुनिसत्तमाः ॥ १४ ॥

यामाराध्य महाभागः सुग्रीवो नाम वानरः ।
प्राप्तवान्दुर्लभं राज्यं वालिना परिपालितम् ॥ १५ ॥

ऋषय ऊचुः ।

कथं नागपुरं रम्यं सुग्रीवो नाम वानरः ।
ययौ स स्वपुरं रम्यं हित्वा कस्मात्तपोधन ॥ १६ ॥

मूलनारायणीं देवीं कथं स ज्ञातवान्द्विजः(ज ?) ।
कथं नृपासनं प्राप बालिना परिपालितम् ।
एतत्सर्वमशेषेण कथयस्व तपोधनः(न ?) ॥ १७ ॥

---

९ –a) ने$_1$ विस्तीर्णा, ने$_2$ विस्तीर्णं (→विस्तीर्णां). –c) ने$_1$ दर्शयतींतथैकांता. –a) ने$_1$ °परा (→°पराम्). –f) ने$_1$ °निषेवितम् (→°निषेविताम्).

११. –b) ने$_1$ ततस्तां (→तां ततः).

१२. –c) ने$_1$ °नारायणीं (→°नारायणी). –d ने$_1$ शोभनम् (→शोभनाम्).

१३. –b) ने$_1$ महेश्वरम् (→महेश्वरीम्).

१४. –a) ने$_1$ °नारायणीं (→°नारायणी); ने$_2$ देवी (→देवीं). –c) ने$_2$ परा (→परां)

१७. –a) ने$_3$ °नारायणी (→°नारायणीं); ने$_{2.3}$ देवी (→देवीं).

व्यास उवाच ।

किष्किन्धायां महाभागा वानरौ द्वौ बभूवतुः ।
भ्रातरौ बालिसुग्रीवौ महाबलपराक्रमौ ॥ १८ ॥

सत्यमार्गरतौ शान्तौ सर्वविद्याविशारदौ ।
प्रीत्या चाधिकसोभाढ्यौ पूजितौ वानरर्षभौ ॥ १९ ॥

सुग्रीवस्तु महाभागस्तारां प्राप यशस्विनीम् ।
नवोढां सुकुमाराङ्गीं साक्षात्सुरसुतामिव ॥ २० ॥

लक्ष्मीमिव गुणोपेतां पत्नीं प्राप्य शशिप्रभाम् ।
स मुदं परमं लेभे निःस्व[ः]प्राप्य यथा धनम् ॥ २१ ॥

स रेमे सुचिरं कालं तया सह तपोधनाः ।
काननेषु च कुञ्जेषु वनेषु पर्वतेषु च ॥ २२ ॥

कदाचिन्मुनिशार्दूलास्तारां ताराधिपप्रभाम् ।
तां ददर्श ततो बाली रूपयौवनशालिनीम् ॥ २३ ॥

तां दृष्ट्वा मोहमापन्नो मन्मथेन प्रपीडितः ।
जग्राह च करं तस्या देवमार्गविरोधकः ॥ २४ ॥

तारां स ताराधिपशोभिताननां
जहार सुग्रीवसुखावहां वराम् ।
प्रगृह्य तां वानरपुङ्गवेश्वरो
लतां यथा वन्यगतो दुरासदाम् ॥ २५ ॥

हृत्वा च तारां प्रथमं सुदुर्मति-
र्मतिं च सुग्रीववधे प्रचक्रिरे ।
स्वसौहृदं त्यज्य विमोहितो धिया
स्वयं सहामात्यपुरोहितैर्बली ॥ २६ ॥

स हृत्वा प्रहृतां तारां सुग्रीवो विमना यथा ।
प्रपच्छ मन्त्रिमुख्यानां मन्त्रं मन्त्रविदांवरः ॥ २७ ॥

---

१८. –c)ने1 भ्रातारौ, ने2 वानरौ(→भ्रातरौ).–d)ने2 ०पराक्रमैः(→०पराक्रमौ). १९. –c) ने2 ०शोभाढ्यै (→०शोभाढ्यौ). २०. –a) ने3 °भागास् (→°भागस्). –b) ने2 यशस्विनी (→यशस्विनीम्). –c) ने2 ०कुमारांगो (→°कुमाराङ्गीं). २१. –b) ने3 ०प्रभां (→०प्रभा). २२. –d) ने2.3 वनेषूपवनेषु च. २४. –d) ने3 °निरोध्रकः (→°विरोधकः). २५. –a) ने2 °ननो (→°ननां). –c) ने1 जग्राह (→जहार). २६. –a) ने1 स (→सु-). २७. –a) ने1 श्रुत्वा (→हृत्वा); ने1 तारा (→तारां).

शुश्राव स्ववधोपायं ताराहेतोस्तपोधनाः ।
तारां तथा कृतां श्रुत्वा बालिना बहुशालिना ॥ २८ ॥

स चकार महाबुद्धिर्वानरेण हनूमता ।
सह पलायनं विप्रा बलवद्भिर्विरोधितः ॥ २९ ॥

स कदाचिन् महाभागः सह तेन हनूमता ।
पलायमानो नागाढ्यं गिरिं नागनिषेवितम् ॥ ३० ॥

ययौ नागसहस्राणां परिवारैर्विराजितम् ।
तत्र गत्वा चरन् क्वापि ददर्श गिरिकन्दराम् ॥ ३१ ॥

नागपूराह्वये पुण्ये पर्वते मुनिसत्तमाः ।
मूलनारायणीं देवीं महादेवस्य वल्लभाम् ॥ ३२ ॥

सिद्धगन्धर्वमुख्यैश्च सेवितां सुमनोहराम् ।
मूलनारायणीं नाम्ना नागकन्यानिषेविताम् ॥ ३३ ॥

तस्या मध्ये महादेवीं दीपज्योतिमिवापराम् ।
ददर्श नागमुख्येन सेवितां सुमनोहराम् ॥ ३४ ॥

तां दृष्ट्वा देवराजस्य वरदां लोकपूजिताम् ।
पूजयामास विधिवत्सह तेन हनूमता ॥ ३५ ॥

स वालिभयवित्रस्थस्तस्थौ तत्र महामनाः ।
पूजयन् गिरिजां देवीं मूलनारायणीं गुहाम् ॥ ३६ ॥

कदाचित् सा महादेवीं सर्वदेवनमस्कृता ।
आविर्बभूव पुरतः सुग्रीवस्य महात्मनः ॥ ३७ ॥

ततः सा वानरं देवो वचनं समुवाच ह ।
मनोभिलषितां सिद्धिं याचयस्व ददाम्यहम् ॥ ३८ ॥

ततो वव्रे स सुग्रीवो हत्वा बालिं महाबलम् ।
तारां वानरराज्यं स साहाय्यकरणं जनम् ॥ ३९ ॥

---

२८. –a) ने$_{1}$ °वधोपायंस् (→°वधोपायं).
३०. –c) ने$_{1}$ भागोख्यं (→नागोख्यं). –d) ने$_{2.3}$ नागा°(→नाग°). ३१. –b) ने$_{3}$ °विराजितः (→°विराजितम्). –c) ने$_{1}$ कापि (→क्वापि). ३२. –c) ने$_{1.2}$ °नारायणी (ने$_{2}$ °णो) (→°नारायणी). ३४. –b) ने$_{1.3}$ दीपं (→दीप–).
३८. –a) ने$_{2}$ देवीं, ने$_{3}$ देवी (→देवो). –c) ने$_{1}$ °लखितां (→°लषितां).
३९. –c) ने$_{2.3}$ °राजान् (→°राज्यं).

व्यास उवाच ।*

ततोवाच महादेवी वानरं बलिनां वरम् ।
स्वल्पैरहोभिः साहाय्यं प्राप्स्यते रघुनायकम् ॥ ४० ॥

कर्तव्यं तस्य साहाय्यं त्वया वानरपुंगव ।
स तुभ्यं वानराणां वै राज्यं दास्यति राघवः ।
निहत्य बालिं बलिनं तारया सह शोभनम् ॥ ४१ ॥

सांप्रतं रामसरितोर्मध्ये बालीश्वरं हरम् ।
त्वद्वधाय स ते भ्राता संपूजयति शङ्करम् ॥ ४२ ॥

मम प्रभावाद्वरदस्य शम्भो-
र्वरं न संपूजति वानरेशे ।
न ते प्रहाराभिमुखः कदाचि-
दत्तः परं संभविता स राजा ॥ ४३ ॥

सुरेश्वरस्यापि महाभयं कपे
न ते प्रहाराभिमुखे भविष्यति ।
मम प्रभावाद्रघुनायकः स्वयं
गृहे समायात्यनुजेन सम्मतः ॥ ४४ ॥

व्यास उवाच ।

इत्युक्त्वा सा भगवती तत्रैवान्तरधीयत ।
प्रहृष्टवदनो भूत्वा सुग्रीवोऽपि गृहं ययौ ॥ ४५ ॥

मूलनारायणाख्यानं नारायण्यास्तथैव च ।
कथितं मुनिशार्दूला पातकौघप्रणाशनम् ॥ ४६ ॥

---

* ने2.⊙.
४०. ने2. ab⊙. –c) ने1 साहाय्यं (→साहाय्यं).
४१. –a) ने1 साहाय्यं (→साहाय्यं). –e) ने2.3 बालिनं राम (→बालिं बलिनं).
४२. –c) ने3 धाता (→भ्राता).
४३. –b) ने1 संति धृति (→संपूजति).
४४. –a) ने3 °भयंकरो (→°भयं कपे). –d) ने2.3 गृहे समागत्यनुजेन सम्मतः.
४५. –c) ने2 °वदनौ (→°वदनो)
४६. –c) ने1 °शार्दूला (→°शार्दूलाः).

यामाराध्य महानागाः संस्थिता नागपर्वते।
सुग्रीवोऽपि च तां प्राप्य परां सिद्धिं प्रजग्मिवान् ॥ ४७ ॥

यः शृणोति महाभागा मूलनारायणीकथाम्।
प्राप्नोति परमां सिद्धिं महामायाप्रभावतः ॥ ४८ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे नारायणीमाहात्म्ये**
**चतुरशीतितमोऽध्यायः ॥ ८४ ॥**

---

४७. –d) ने2 सिद्धै (→सिद्धिं).
४८. –b) ने1 °नारायणो (→°नारायणी–).
**पुष्पिका**—ने1 स्कं. मा. (→स्कन्दपुराणे मानसखण्डे); ने1 चतुरा° (→चतुर°).

## ८५

व्यास उवाच ।

वासुकेः पदसंभूता बहुलां यो महानदीम् ।
निमज्जति महाभागाः स याति परमां गतिम् ॥ १ ॥

मूले तस्या महादेवी बहुलाख्या प्रपूज्यते ।
तां सुपूज्य निमज्याशु महेन्द्रभवनं व्रजेत् ॥ २ ॥

ततस्तु फेनिलासङ्गे निमज्य मुनिसत्तमाः ।
महेन्द्रभवनं याति मानवो नात्र संशयः ॥ ३ ॥

तस्या वामे महाभागाः कालीयपदसंभवा ।
बहुलासङ्गमं पुण्यं सङ्गता मुनिसत्तमाः ॥ ४ ॥

तस्यां कोटीश्वरी देवी पूज्यते नागनायकैः ।
तां सुपूज्य जनो याति महेन्द्रभवनं शुभम् ॥ ५ ॥

वोकाबहुलयोर्मध्ये हरः संपूज्यते द्विजाः ।
तं संपूज्य मनुष्याणां पापभीतिः प्रणश्यति ॥ ६ ॥

बहुला रामगङ्गायां सङ्गता वर्ण्यते द्विजाः ।
वासुकिप्रमुखैर्नागैः सेविता सुमनोहरा ॥ ७ ॥

दक्षिणे पिङ्गलं पूज्य भुजङ्गसरितो जले ।
निमज्य मानवो विप्राः पातकेभ्यः प्रमुच्यते ॥ ८ ॥

माहात्म्यं नागमुख्यानां सर्वपापप्रणाशनम् ।
कथितं मुनिशार्दूलाः किमन्यत्प्रष्टुमिच्छथ ॥ ९ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे नागपर्वतमाहात्म्ये पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥**

---

१. –a) ने$_1$ वासुके (→वासुकेः); ने$_2$ °संभूता (→°संभूतां). –b) ने$_{2.3}$ वाहुलां (→बहुलां); ने$_1$ या (→यो). २. –a) ने$_1$ °देवी (→°देवी). ४. –c) ने$_{2.3}$ वाहुला° (→वहुला°). ५. –c) ने$_2$ ततो (→जनो). ६. ने$_3$.६c–७b⊙. ७. –d) ने$_2$ सेविताः, ने$_1$ सेवितः (→सेविता). ९. –d) ने$_1$ °मिच्छथः (→मिच्छथ).

**पुष्पिका**—ने$_1$ स्कं. मा. (→स्कन्दपुराणे मानसखण्डे).

ऋषय ऊचुः ॥

ततो याः सरितः पुण्या ये देवा सन्ति वै द्विज ।
तेषां च ब्रूहि माहात्म्यं सर्वज्ञोऽसि स्वतो यतः ॥ १ ॥

व्यास उवाच ।

पिङ्गलस्य महाभागा गौरी नामा सरिद्वरा ।
विद्यते देवगन्धर्वैः सेविता सुमनोहरा ॥ २ ॥

गौरीगङ्गेति सा गौरी वाहिता पुण्यवाहिनी ।
तस्यां तीर्थाण्यनेकानि वर्ण्यन्ते मुनिसत्तमाः ॥ ३ ॥

तस्यां स्नात्वा च विधिवत् संतर्प्य च पितॄंस्तथा ।
महेन्द्रभवनं याति मानवो मुनिसत्तमाः ॥ ४ ॥

मूले तस्या बलिर्नागः पूज्यते नागनायकैः ।
तं सुपूज्य निमज्याशु परां गतिमवाप्नुयात् ॥ ५ ॥

वृद्धबालीश्वरो देवो वृद्धबालीश्वरे सरे ।
पूज्यते नागमुख्येन पिङ्गलेन महात्मना ॥ ६ ॥

ह्रदे तस्मिन् महाभागा निमज्य सुसमाहितः ।
संतर्प्य पितृदेवादीन् वृद्धबालीश्वरं हरम् ।
संपूज्य मानवो याति महेन्द्रभवनं शुभम् ॥ ७ ॥

गौरी भुजङ्गसरितोः सङ्गमे मुनिसत्तमाः ।
भुजङ्गेशं हरं पूज्य विधिवद्द्विजसत्तमाः ।
महेन्द्रभवनं याति मानवो नात्र संशयः ॥ ८ ॥

ततस्तु निर्झरो विप्रा वर्ण्यते सिद्धनायकैः ।
यत्र स्नात्वा नरो याति शिवलोकं न संशयः ॥ ९ ॥

---

१. –b) ने$_1$ वैषिजाः (?) (→वै द्विज). २. –b) ने$_2$ सरिद्वरः (→सरिद्वरा). ३ –a) ने$_1$ गौर नागेन सा गौरा. ५. –c) ने$_1$ तु (→सु–) ७. –a) ने$_1$ सतर्प्यं (→संतर्प्य). –b) ने$_1$ ह*म् (→हरम्). ८. –a) ने$_2$ सरितौ (→सरितोः). –c) ने$_2$ भुजंगेश– (→भुजङ्गेशं); ने$_3$ हरे (→हरं). ९. –a) ने$_2$ निर्गणे, ने$_3$ निर्झरो (→निर्झरं). –d) ने$_2$ °लोके (→°लोकं).

ततस्तु निर्झरप्रान्ते लम्बुकेशो महेश्वरः।
विद्यते मुनिशार्दूला गौर्याः सह शिवः स्वयम् ॥ १० ॥

यत्र गौरी जलैः पुण्यैर्गणगन्धर्वकिन्नराः।
अभिषिञ्चति देवेशं लम्बुकेशं तपोधनाः ॥ ११ ॥

भवान्या सह देवेशो जलक्रीडां प्रकुर्वति।
महेन्द्रप्रमुखैर्देवैः सरितो यत्र वै द्विजाः ॥ १२ ॥

निर्झरान्ते महादेवं लम्बुकेशं तपोधनाः।
दारिद्रभीतिमशुभां पूज्य नाप्नोति मानवः ॥ १३ ॥

निर्झराद् वामपार्श्वे वै लम्बुकाख्या महागुहा।
सेविता रुद्रकन्याभिर्नागकन्याभिरेव च।
तस्यां जागर्ति देवेशो वृद्धपूगीश्वराह्वयः ॥ १४ ॥

जरारोगभयं तावत्तावद्दारिद्रजं भयम्।
यावद्गौरी जले स्नात्वा वृद्धपूगीश्वरो हरः।
न समाराधितो विप्रा वर्तते नात्र संशयः ॥ १५ ॥

लम्बुकाख्यह्लदे स्नात्वा सप्तरात्रं तपोधनाः।
वृद्धपूगीश्वरं देवं संपूज्य विधिपर्वकम्।
मनुष्येषु जरादुःखं नायाति मुनिसत्तमाः ॥ १६ ॥

अजरामरदेहत्वं ये वसन्ति भुवंःस्थले।
पूगीशं मासमात्रं ते पूजयन्तु समाहिताः ॥ १७ ॥

ये धनं विपुलं विप्रा वाञ्छन्ति वसुधातले।
निर्झरान्ते गुहायां वै पूगीशं पूजयन्तु ते ॥ १८ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे वृद्धपूगीश्वरमाहात्म्ये षडशीतितमोऽध्यायः ॥ ८६ ॥**

---

१३. –a) ने3 निर्मलं ते (→निर्झरान्ते). १४. –a) ने1-3 निर्झरान् (ने2 °रात्) (→निर्झरात् (द् ?) ). १७. –b) ने2 °स्थलः (→°स्थले). –c) ने2 मात्रगात्रं (→मासमात्रं). –d) ने2 समाहिता (→समाहिताः). १८. –a) ने1.3 ते (→ये). –d) ने1.2 पूज्यते तु, ने3 पूजयेत्तु (→पूजयन्तु ).

## ८७

व्यास उवाच ।

ततो गौरीसरिन् मध्ये पुण्यो बालिसरः स्मृतः ।
तत्र वामे महाभागाश्चक्रद्वारेश्वरं हरम् ।
पूजयन्तु गुहायां वै निमज्य विधिपूर्वकम् ॥ १ ॥

ततो गौरी महापुण्या रामगङ्गां सुशोभनाम् ।
सम्मिलन्मुनिशार्दूलाः सर्वपापप्रणाशिनी ॥ २ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे गौरीमाहात्म्ये**
**सप्ताशीतितमोऽध्यायः ॥ ८७ ॥**

---

१. –b) ने$_2$ पुण्ये (→पुण्यो). –d) ने$_1$ °द्वारेश्वरे (→°द्वारेश्वरं). २. –b) ने$_3$ °गंगा (→°गङ्गां); ने$_1$ सुशोभनाः (→सुशोभनाम्).

**पुष्पिका**—ने$_1$ स्कंद. मा$_8$ (→स्कन्दपुराणे मानसखण्डे).

ऋषय ऊचुः ।

अजरामरवत् क्षेत्रं धनधान्यप्रवर्द्धकम् ।
कथयस्व महाभाग भोगमुक्तिप्रदं तथा ॥ १ ॥

व्यास उवाच ।

सर्वं क्षेत्रोत्तमं क्षेत्रं श्रृण्वन्तु मुनिसत्तमाः ।
भुक्तिमुक्तिप्रदं पुण्यं धनधान्यविवर्द्धनम् ॥ २ ॥

व्रतोपवासैर्यै देवो नान्यजन्मनि तोषितः ।
ते नरा मुनिशार्दूला जगद्दुखैः प्रपीडिताः ।
धनधान्यविहीनाश्च रटन्ति भुवि मण्डले ॥ ३ ॥

आरोग्यं परमां वृद्धिं मनसा ये समाहिताः ।
वसन्ति मुनिशार्दूलास्तोषयन्ति शिवं हितैः(ते?) ॥ ४ ॥

गौर्या दक्षिणभागे वै देवः पूगीश्वरः स्मृतः ।
भवान्या सह देवेशो राजते मुनिसत्तमाः ॥ ५ ॥

पूगीश्वरस्थलमपि यो याति मुनिसत्तमाः ।
इहातुलां श्रियं प्राप्य भुक्तिं मुक्तिं च विन्दति ॥ ६ ॥

धनधान्यादिभिः पूर्णाः पुत्रपौत्रैर्विवर्द्धिताः ।
भवन्ति मानवाः सम्यक् पूगीशस्मरणादपि ॥ ७ ॥

यामाहुर्वैद्यनाथं हि भवान्या सह शोभितम् ।
तं गत्वा मानवानां च न हि दारिद्रजं भयम् ॥ ८ ॥

पूगीश्वरेति विख्यातो देवदेवो महेश्वरः ।
दक्षिणे नागपूरस्य वामे दारुगिरेस्तथा ॥ ९ ॥

---

१. –a) ने$_{1.2}$ अजरारोग्यदं क्षेत्रं. –b) ने$_{1}$ ०प्रदंस् (→०प्रदं). २. –d) ने$_{1}$ ०प्रवर्द्धनम् (→०विवर्द्धनम्). ३. –a) ने$_{2.3}$ ये (→[यैः]). –b) ने$_{2.3}$ अन्य० (→नान्य०); ने$_{1}$ तोषिताः (→तोषितः). –d) ने$_{1.3}$ जरादुःखैः (→जगद्दुःखैः). –f) ने$_{1}$ सुचि (→भुवि). ४. –c) ने$_{1}$ वसति (→वसन्ति). –d) ने$_{1}$ ये (→तैः (ते?)). ५. –b) ने$_{3}$ स्मृता (→स्मृतः). ७. –a) ने$_{3}$ पूर्णं (→पूर्णाः). –d) ने$_{1}$ ०दरिः (→०दपि).

महेन्द्रप्रमुखा देवा बाणाद्या दैत्यनायकाः ।
यामाराध्य स्थितास्तत्र क्रीडन्तो गौरिनिर्झरे ।
विद्यते मुनिशार्दूलाः मनोभिलषितप्रदः ॥ १० ॥

वैद्यनाथाद्दशगुणं महाकालात् तथैव च ।
यस्य संदर्शनात् पुण्यं प्राप्यते नात्र संशयः ॥ ११ ॥

मानसे स्वर्णहंसस्य दर्शने यत्फलं विदुः ।
पूगीश्वरस्य देवस्य दर्शनात्तत्फलं भवेत् ॥ १२ ॥

भुक्तिमुक्तिप्रदो देवो धनधान्यप्रदस्तथा ।
स एव भूतले देवो विद्यते नात्र संशयः ॥ १३ ॥

ऋणसागरमग्नानां मग्नानां दुःखसागरे ।
सैव प्लवो मनुष्याणां विद्यते नात्र संशयः ॥ १४ ॥

सैव कर्ता विकर्त्ता च संप्रदो मुनिसत्तमाः ।
सैव मृत्युर्मनुष्याणां सैवोत्पत्तिकरः स्मृतः ॥ १५ ॥

सैव भूमण्डले रुद्ररे(ए ?)क एव विराजते ।
तथापि स्थानभेदेन विशिष्टा(ष्टः ?) कथ्यते द्विजाः ॥ १६ ॥

तं नागा नागपुत्राश्च संप्राप्य पर्वणी(णि?)द्विजाः ।
पूजयन्ति महार्हैश्च मणिभिः कमलैस्तथा ॥ १७ ॥

पर्वणी(णि ?) दिवसे तत्र नागयात्रामहोत्सवः ।
विद्यते मुनिशार्दूलाः क्षेत्रे पूगीश्वराह्वये ॥ १८ ॥

यात्रा सर्वासु तिथिषु वासरेषु तथैव च ।
देवानां दानवानां च गन्धर्वाप्सरसां तथा ॥
विद्यते मुनिशार्दूलास्तत्र पुण्यां कुहुं विना ॥ १९ ॥

पूगीक्षेत्रं समायान्ति नागाः पर्वणि पर्वणि ।
तमाराध्य महादेवं समश्नन्ति विनिश्चितम् ॥ २० ॥

---

१०. –c) ने1 यमाराध्या स्थिता तत्र. ११. ने1. १२. cd– १३. cd⊙.
१४. ने3.⊙. १५. –b) ने3 संपदो (→संप्रदो).
१७.–a) ने1.2 °युज्याश्च (→°पुत्राश्च). १८. ने3. १८c–१९e⊙. –b) ने1.2 °याग° (°यात्रा°).
२०. –c) ने2.3 तेन माराध्यमार्गं (ने3 °मानां) हि. –d) ने1 समश्नन्ति (→समश्नन्ति).

ये चरन्ति महाविघ्नं नागानां पुण्यकारिणाम् ।
शापं ते नागमुख्यानां समश्नन्ति न संशयः ॥ २१ ॥

कुहुदिनं च संप्राप्य तद्भक्तैरपि वै द्विजाः ।
वर्जनीया महायात्रा तत्र पूगीश्वरस्य हि ॥ २२ ॥

न हि नागारु(उ ?)पासते मानवैः सह शङ्करम् ।
नागपूजां विना तां तु कः समर्थोऽस्ति भूतले ॥
यस्मिन्नहनि सर्पाणां यात्रा सम्यक् प्रकीर्तिता ॥ २३ ॥

देवानां दानवानां न तस्मिन्नहनि स्मृताः ।
अनुक्रमेण देवेशमुपासन्ते महोरगाः ॥ २४ ॥

न देवा न च गन्धर्वा न यक्षा न च राक्षसाः ।
तथा पूगीश्वरं देवं पूजयन्ति महोरगाः ॥ २५ ॥

न जरा क्षुत्पिपासा च न च रोगभयं महत् ।
जायते मुनिशार्दूलाः पूगीशस्मरणादपि ॥ २६ ॥

यमाराध्य स्थिताः सर्वे ब्रह्माद्यास्त्रिदिवौकसः ।
तस्य देवस्य माहात्म्यं कथितुं न हि शक्यते ॥ २७ ॥

जलक्रीडापरिश्रान्तं भवान्या सह शङ्करम् ।
पूजयित्वा च पूगीशं पूगीशाख्यां प्रचक्रिरे ॥ २८ ॥

ऋषय ऊचुः ।

कथं तस्य महाभाग पूगीशाख्यां प्रचक्रिरे ।
के संप्रपूज्य शुभगाः संजातास्तद्वदस्व हि ॥ २९ ॥

व्यास उवाच ।

पुरा कृतयुगस्यादौ समुद्वाह्य गिरेः सुताम् ।
जलक्रीडां समारेभे सुपुण्ये गौरनिर्झरे ॥ ३० ॥

जलक्रीडां समारब्धां श्रुत्वा ब्रह्मादयो द्विजाः ।
देवाश्च दानवाश्चैव गन्धर्वोरगराक्षसाः ॥ ३१ ॥

---

२१. –a) ने1 °विघ्न–(→विघ्नं). –d) ने1 समश्नांति (→समश्नन्ति) २४. –c) ने1 अ*क्रमेण (→अनुक्रमेण). २८. –b) ने1 भ*न्या (→भवान्या); ने3 परि–(→सह). –d) ने2 पूगीशाख्या (→पूगीशाख्यां). २९. –b) ने1 पूगीशाख्यं (→पूगीशाख्यां). –c) ने1 के संपूज्यन्ति सुभगाः. ३०. –b) ने1 सुता (→सुताम्). ३१. –a) ने1.2 समारद्धां (→समारब्धां). –d) ने1 °रक्षसां, ने2 °राक्षसा (→°राक्षसाः).

विद्याधरगणाश्चान्ये तथैवाप्सरसां गणाः ।
राजानो राजपुत्राश्च राजपत्न्यस्तथैव च ॥ ३२ ॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव तथापरे ।
आत्मनो विहितां वृत्तिं परित्यज्य समाहिताः ॥
समाजग्मुर्जलक्रीडां द्रष्टुं कौतूहलेन ते ॥ ३३ ॥

गायन्त्यः सहसन्त्यश्च राजपत्न्यो नृपैः सह ।
ददृशुस्तस्य देवस्य जलक्रीडामहोत्सवम् ॥ ३४ ॥

देवर्षयो महाभागास्तथा ब्रह्मर्षयोऽपरे ।
गायन्त्यन्ये स्तुवन्त्ये हसत्यन्ये दिवौकसः ॥
शङ्करस्य जलक्रीडां दृष्ट्वा संमुमुदुः परे ॥ ३५ ॥

देव्यो देवीं पुरस्कृत्य विमानस्था दिवौकसः ।
सहस्रं क्रीडयामासुः सुपुण्यैर्गौरिसीकरैः ॥ ३६ ॥

तथा देवाः सगन्धर्वाः पुरस्कृत्य महेश्वरम् ।
विमानस्थाः सुचिक्रीडुरप्सरोभिः समं ततः ॥ ३७ ॥

ततः क्रीडापरिश्रान्तो भवान्या सह शङ्करः ।
क्षेत्रं जीवेशसंज्ञं वै जगाम मुनिसत्तमाः ॥ ३८ ॥

तत्र देवाः सगन्धर्वाः पुङ्गवध्वजधारिणम् ।
पूगीफलैः सुकुसुमैः प्रथमं तुष्टुवुर्द्विजाः ॥ ३९ ॥

पूगीफलैः सुकुसुमैः पूरितं परमेश्वरम् ।
पूगीश्वरेति तं देवी तुष्टुवुर्मुनिसत्तमाः ॥ ४० ॥

गौर्य्या दक्षिणभागे वै दृष्ट्वा पूगीश्वरं हरम् ।
जजग्मुस्ते यथायाता देवदानवमानवाः ॥ ४१ ॥

यं वा संचिन्त्य सत्कामं समायाता दिवौकसः ।
तथान्ये देवगन्धर्वा दैतेयाश्च महोरगाः ॥ ४२ ॥

दानवा मानवाश्चैव ततः प्रापुर्विनिश्चितम् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेतरजातयः ॥ ४३ ॥

---

३३. –a) ने$_1$ वेश्याः (→वैश्याः). –f) ने$_1$ द्रष्टु, ने$_2$ इदं (→द्रष्टुं). ३५. –c) ने$_1$ स्तुवस्त्यन्ये (→स्तुवन्त्यन्ये). ३६. –a) ने$_3$ देवी (→देवीं). ३९. –b) ने$_3$ वृषभध्वजमित्यथ. –c) ने$_1$ स कुसुमैः (→सुकुसुमैः).
४०. –b) ने$_1$ पूरित्यं (?) (→पूरितं). ४२. –a) ने$_1$ यं व्राह्मं चिन्त्य सत्कामं. –d) ने$_1$ दैत्येयाश्च (→दैतेयाश्च). ४३. –b) ने$_{1\cdot2}$ तं तं (→ततः).

यां यां वृत्तिं परित्यज्य समायातास्तपोधनाः ।
तां तां प्रापुः सुसम्पूर्णां प्रसादाच्छूलपाणिनः ॥ ४४ ॥

ऋषय ऊचुः ।

कानि तीर्थानि पुण्यानि सन्ति तत्र तपोधन ।
कथं पूजाविधिस्तस्य विद्यते कुत्र मज्जनम् ॥ ४५ ॥

व्यास उवाच ।

पूगीशपदसंभूता जटागङ्गा सुशोभना ।
विद्यते देवगन्धर्वैः प्रार्थिता सुमनोहरा ॥ ४६ ॥

सा गौर्याः सङ्गमे प्राप्य पूज्यते सिद्धनायकैः ।
रुद्रतीर्थमिति ख्यातं सङ्गमे मुनिसत्तमाः ॥ ४७ ॥

तत्र स्नात्वा च विधिवत् मौनमास्थाय दुर्द्धरम् ।
ततो बालिसरं पुण्यं तयोर्मध्ये तपोधनाः ॥ ४८ ॥

गत्वा निमज्य विधिवत्संतर्प्य च पितॄंस्तथा ।
व्रजेत् पूगीश्वरं देवं मौनीभूत्वा तपोधनाः ॥ ४९ ॥

तत्र गत्वा च देवेशं परिक्रम्य समाहितः ।
क्षेत्रपालं प्रपूज्याशु द्वारपालान् तथेतरान् ॥ ५० ॥

महादेवीं प्रपूज्याशु हरार्द्धाङ्गस्थितां शुभाम् ।
ततः पूगीश्वरं देवं शालितण्डुलपूरितम् ॥ ५१ ॥

विधाय चाञ्जलिं पुण्यं पूजयेत् सुसमाहितः ।
पूजयित्वा महादेवं सुशुभ्रैः शालितण्डुलैः ॥ ५२ ॥

गन्धपुष्पाक्षतैः शुभ्रैर्देशकालोद्भवैः फलैः ।
पूजयेन् मुनिशार्दूला यथाशक्त्या शिवापतिम् ॥ ५४ ॥

संपूज्य शङ्करं शान्तं शालितण्डुलपूरितम् ।
पुनरेवाञ्जलिं कृत्वा प्रार्थयेत् सुसमाहितः ॥ ५५ ॥

---

४४. –c) ने$_{2.3}$ सुसंपन्ना (→सुसम्पूर्णा).

४९. –a) ने$_{2}$ तपोधनः (→तपोधनाः). ५०. –a) ने$_{3}$ देवेशो (→देवेशं). –d) ने$_{1}$ °पालां, ने$_{2}$ °पालांस् (→°पालान्). ५१. –c) ने$_{2}$ पूगीश्वरे (→पूगीश्वरं). –d) ने$_{1}$ °तंदुल° (→°तण्डुल°). ५२. –b) ने$_{3}$ °समाहितम् (→°समाहितः). –c) ने$_{2.3}$ पूरयित्वा (→पूजयित्वा). –d) ने$_{2}$ सुशुभेः (→सुशुभ्रैः); ने$_{1}$ °तंदुलैः (→°तण्डुलैः). ५४. –d) ने$_{2}$ शिवां पतिम् (→शिवापतिम्).

भवसागरमग्नोऽहं निमग्नो ऋणसागरे ।
गतोऽस्मि शरणं शम्भो त्राहि मां भवसागरात् ॥ ५६ ॥

इति संप्रार्थ्य देवेशं पूजयित्वा यथाविधि ।
अनुज्ञाप्य शिवं शान्तं विनिर्गच्छेच्छिवस्थलात् ॥ ५७ ॥

अनेन विधिना दैवं योपसर्पति मानवः ।
संप्राप्य परमां सिद्धिमिहलोके तपोधनाः ॥
शिवेन सह सायुज्यं मुक्तिं याति परत्र च ॥ ५८ ॥

कथितं हि मया विप्राः पूगीशाख्यानमुत्तमम् ।
यः शृणोति हरस्याग्रे स याति परमां गतिम् ॥ ५९ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे पूगीश्वरमाहात्म्ये**
**अष्टाशीतितमोऽध्यायः ॥ ८८ ॥**

---

५६. –a) ने$_1$ मन० (→भव०).
५७. –c) ने$_1$ अनुताप्य (→अनुज्ञाप्य). –d) ने$_1$ ०स्थलान् (→०स्थलात्).
५८. –c) ने$_1$ परमा (→परमां). –e) ने$_1$ शिवेन सह सायोज्यां. –f) ने$_2$ मुक्ति– (→मुक्तिं).
**पुष्पिका**—ने$_1$ श्रीस्कंदपुणे मा. (→श्रीस्कन्दपुराणे मानसखण्डे); ने$_2$ ०माहात्म्येष्टाशीति० (→०माहात्म्ये अष्टाशीति०).

ऋषय ऊचुः ।

नागपर्वतसंभूता या नद्यः शरयूं शुभाम् ।
सङ्गता मुनिशार्दूल श्रोतुमिच्छामहे वयम् ॥ १ ॥

व्यास उवाच ।

नागानां फेनिलो नाम नागमुख्यः प्रकथ्यते ।
नागकन्यासहस्रेण सेवितो वरदस्तथा ॥ २ ॥

तस्यपश्चिम भागे वै फेनिला सरितां वरा ।
कुहकानां विनाशाय यावतीर्णा महीतले ॥ ३ ॥

राजते मुनिशार्दूलाः सरयूसङ्गामिनी ।
तस्यां स्नात्वा महाभागाः सन्तर्प्य च पितॄंस्तथा ॥
मानवो देवभवनं प्रयाति न वृथा भवेत् ॥ ४ ॥

मूले कुहकहं देवं संपूज्य मुनिसत्तमाः ।
द्वादशाब्दसमुद्भूतात् पातकाद्विप्रतीर्यते ॥ ५ ॥

ततस्तस्यां महाभागाः सुपुण्यास्त्रिपुरासरः ।
विद्यते नागकन्याभिः सेवितं सुमनोहरम् ॥ ६ ॥

तत्र स्नात्वा विधानेन गुह्त्वं याति मानवः ॥
ततस्तु त्रिपुरां देवीं वामे सम्पूज्य मानवः ।
अब्दत्रयकृतात् पापात् प्रमुच्यति न संशयः ॥ ७ ॥

ततस्तस्यां शशाख्यं वै तीर्थमस्ति तपोधनाः ।
तत्र स्नात्वा च मनुजः शशयोनिन्न पश्यति ॥ ८ ॥

---

१. –b) ने1 तद्वः (→नद्यः); ने3 शरयुं (→शरयूं). –c) ने1 ०शार्दूला (–०शार्दूल). २. –a) ने1 फनिलो (→फेनिलो). –b) ने1 °पुष्पः (→०मुख्यः). –d) ने1 ०वरदास् (→०वरदस्). ३. –b) ने3 फेनिलो (→फेनिला). ४. –e) ने2 ०भ*नं (→°भवनं). ५. –d) ने1 ०मुच्यते (→°तीर्यते). ६. –a) ने1 तस्या (→तस्यां). –b) ने1 सुपुण्यास् (→सुपुण्यस्). –d) ने1.2 सेवितः (→सेवितं); ने1.2 सुमनोहरः (→सुमनोहरम्). –f) ने2.3 गुह्त्वा–(→गुह्त्वं). ७. –b) ने2 मानवाः (→मानवः). ८. –a) ने1 ततस्तस्या शशाख्या वै.

ततः कुहकहासङ्गे सुमनासङ्गमं स्मृतम् ।
तत्र मेनां प्रपूज्याशु मानवो याति शाश्वतम् ॥ ९ ॥

ततस्तुषवतीसङ्गं विद्यते मुनिसत्तमाः ।
तयोर्मध्ये महादेवं सम्पूज्य मुनिसत्तमाः ॥
निमज्य च विधानेन भोगमाप्नोति मानवः ॥ १० ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे नागपूरमाहात्म्ये एकोननवतितमोऽध्यायः ॥ ८९ ॥**

१०. –a) ने1 ततस्तु यवतीसंगं.
**पुष्पिका**—ने1 नागपूरमाहात्म्ये ⊙.

सूत उवाच ।

ततस्तु ऋषयः सर्वे प्रणिपत्य तपोनिधिम् ।
व्यासं धर्म्मार्थतत्त्वज्ञं प्रपच्छुर्मुनिसत्तमाः ॥ १ ॥

ऋषय ऊचुः ।

कथितं भवता ब्रह्मन् नागपर्वतवर्णनम् ।
तथैव नागमुख्यानां माहात्म्यं कथितं त्वया ॥ २ ॥

तथा पातकलिप्तानां सत्सङ्गाभिगामिनाम् ।
परद्रोहरतानां च मानवानां दुरात्मनाम् ॥
अधुना श्रोतुमिच्छामि येन सिद्धिः प्रजायते ॥ ३ ॥

व्यास उवाच ।

शृण्वन्तु मुनिशार्दूला वचनं समुदाहृतम् ।
शरयूरामसरितोर्मध्ये नागगिरिः स्मृतः ॥ ४ ॥

यत्र नागकुलान्यष्टौ निवसन्ति तपोधनाः ।
दक्षिणे तस्य गिरिजा सिद्धगन्धर्वपूजिता ॥ ५ ॥

गुहायां चन्द्रिका नामा विद्यते मुनिसत्तमाः ।
चण्डिकाक्षेत्रसदृशं नान्यं पश्यामि भूतले ॥ ६ ॥

यथा हिमाद्रिशिखरे यथा विन्ध्ये महेश्वरी ।
गुहायां सा तया देवी पूजिता देवनायकैः ॥ ७ ॥

जागर्ति मुनिशार्दूला चण्डिका चण्डविक्रमा ।
ब्रह्मर्षिभिर्महाभागा नारदाद्यैर्महर्षिभिः ॥
सेविता सिद्धगन्धर्वैर्ब्रह्माद्यैस्त्रिदिवौकसैः ॥ ८ ॥

---

१. –d) ने$_{2.3}$ ०सत्तम (→०सत्तमा). ३. –d) ने$_{2}$ दुरात्मना (→दुरात्मनाम्). –e) ने$_{2}$ ०मिच्छाम (→०मिच्छामि). –f) ने$_{1}$ सिद्धि–(→सिद्धिः). ४. –b) ने$_{1}$ *वचं (→वचनं). ८. –a) ने$_{2.3}$ °शार्दूलश् (→०शार्दूलाश्). –c) ने$_{1}$ महाभागा (→महाभाग).

चण्डिकादर्शनाद् विप्रा वाजपेयसमं फलम् ।
प्राप्यते नात्र संदेहः सत्यमेतन् मयोदितम् ॥ ९ ॥

तावत्सिद्धिं न पश्यन्ति मानवः मुनिसत्तमाः ।
यावच्चण्डीं महामायां न सम्यक् पूजयन्ति हि ॥ १० ॥

संपूज्य विन्ध्याचलवासिनीं शिवां
सुवर्णपुष्पैः कमलैश्च शोभनैः ।
फलं यथा लभ्यति मानवो द्विजाः
संपूज्य चण्डीं किल लभ्यते तथा ॥ ११ ॥

संसर्गेणापि मनुजा दृष्ट्वा देवीं हि चण्डिकाम् ।
देवगन्धर्वमनुजैः दुःप्राप्यां प्राप्नुवन्ति हि ॥ १२ ॥

सिद्धिं देव्याः प्रभावेण भक्त्या चानन्यपूर्वया ।
यां सुपूज्य महामायां सिद्धिं पश्यति चण्डिकाम् ॥ १३ ॥

कथं क्लेशकरैः पुण्यैर्न तां विन्दन्ति मानवाः ।
उपपातकलिप्तानां महापातकिनामपि ॥ १४ ॥

ददाति दर्शनात्सिद्धिं चण्डिका चण्डविक्रमा ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ १५ ॥

नकुलस्य च संवादं दिलीपस्य तथैव च ।
इक्ष्वाकुवंशे राजर्षिर्दिलीपो नाम विश्रुतः ॥ १६ ॥

बभूव सर्वधर्मज्ञः सत्यवाक् सत्यविक्रमः ।
शशास सकलां पृथ्वीं धर्मेण स नराधिपः ॥ १७ ॥

स कदाचिद्वने राजा नकुलं मरकतप्रभम् ।
विलाद्विनिःसृतं शुद्धं स्वर्णदेहमयं द्विजाः ॥ १८ ॥

---

९. –b) ने1 ०फलं लभेत् (→°समं फलम्).
११. –a) ने1 शिवा (→शिवां). –d ने3 चंडी (→चण्डीं).
१२. –d) ने1.3 दुःप्राप्यं (ने3 ०व्या) (→दुःप्राप्यां).
१३. –a) ने3 देव्या (→देव्याः. –c) ने1 ०माया (→०मायां).
१४. –c) ने2.3 उपपायन° (→उपपातक०).
१६. –a) ने1 वसंवादं (→च संवादं). –b). ने1.2 तपोधानाः (→तथैव च).
–d) ने1 दिलीप इति (→दिलीपो नाम).
१८. –d) ने1 ०भवं (→०मयं).

दद‍र्श देवकान्तं तं भाषन्तं मानुषीं गिरम् ।
कोऽयमत्यद्भुताकारो ब्रुवन् राजा तपोधनाः ।
नकुलं पूजयामास गत्वा तस्यान्तिकं वली ॥ १९ ॥

न पूजां तस्य राजर्षेर्गृह्णाण नकुलो द्विजाः ।
उवाच वचनं घोरं दारयन्निव मेदिनीम् ॥ २० ॥

नकुल उवाच ।

नाहं गृह्णामि ते पूजां पापलिप्तस्य दुर्मतेः ।
प्रजापीडनवृत्तस्य वृत्तहीनस्य वै तथा ॥ २१ ॥

राजोवाच ।

न मया पीडिता लोका न वेश्यासुरतं कृतम् ।
कथं पापेति मां साधो भाषसे प्राक्तनो(प्राकृतो?)यथा ॥ २२ ॥

को भवानीदृशं देहं धृत्वा यातोऽसि साम्प्रतम् ।
सर्वं स्वर्णमयं देहं दर्शयित्वा प्रभाषसे ॥ २३ ॥

नकुल उवाच ।

कालुष्येन मया नोक्तं न द्वेषान्न च मत्सरात् ।
न ते पुष्पाणि पान्थस्य पदरेणुसमानि वै ।
कुसुमानि न जातानि कारणं तद्वदस्व हि ॥ २४ ॥

नकुल उवाच ।❀

पातकेन महाराज प्राक्तनेन न संशयः ।
जातोस्मि नकुलो दुष्टः सर्वप्राणिविहिंसकः ॥ २५ ॥

तथापि कथयिष्यामि पान्थस्य चरितं महत् ।
निवस्य दण्डकारण्यं भुक्ता (क्त्वा?) सर्पमहीश्वरम् ॥ २६ ॥

सुप्तं मां पथिकः कश्चित् पदा संस्पृष्टवान् बली ।
चरणात्तस्य राजर्षे रेणवो मम मस्तके ।
पतिताः संविलग्नाश्च गाङ्गेयजलसंमिताः ॥ २७ ॥

---

१९. –b) ने3 मानुषं (→मानुषीं); ने2 गिरिं (→गिरं). –d) ने1.2 तपोधनः (→तपोधनाः). २१. –b) ने2 दुर्मते (→दुर्मतेः). २३. –c) ने1 सर्वं–(→सर्वं). २४. –c) ने2 पाथस्य (→पान्थस्य).

❀ अत्रेदं पाठो नोचितः किन्तु त्रिष्वेव हस्तलेखेषु सद्भावत्वाद् गृहीतः.

२५. –c) ने2 जातास्मि (→जातोस्मि). २६. –b) ने1.2 पाथस्य (→पान्थस्य).

रेणुभिः स्पृष्टगात्रोहं हित्वा देहं पुरातनम् ।
धारयामि इदं देहं दिव्यं स्वर्णमयं प्रभो ॥ २८ ॥

राजोवाच ।

स कस्मात्तादृशं पुण्यं प्राप्तवान् पथिकः शुभम् ।
को नाम पथिकः पुण्यो मिलितः स त्वया सह ॥ २९ ॥

इष्टापूर्त्तादिकं तेन किं पुण्यं तत्कृतं शुभम् ।
किमधीतो महाविद्यां कमाराध्य च सन्मते ।
प्राप्तवान् परमं पुण्यं दुःप्राप्यं दैवतैरपि ॥ ३० ॥

नकुल उवाच ।

पान्थः कश्चिन् महाराज पदा मां स्पृश्य सङ्गतः ।
स्पृष्टमात्रं तु रजसा तस्य पादोद्भवेन वै ॥ ३१ ॥

देहं मे नृपशार्दूल बभूव स्वर्णसम्मितम् ।
दृष्ट्वा स्वर्णमयं देहं स्वकीयं जातसंभ्रमः ॥ ३२ ॥

स चाहं तं नमस्कृत्य पृष्टवानस्मि तस्य तत् ।
सोवाच मामवज्ञाय कथां संभवपूर्वकम् ॥ ३३ ॥

पान्थ उवाच ।

अहं निषधदेशस्य वैश्योऽस्मि मूषकान्तकः ।
सर्वदा पापनिरतो हिंसावृत्तिपरायणः ॥ ३४ ॥

मया नेष्टादिपूर्तं च न दत्तं ब्राह्मणेषु हि ।
न मया सरितां श्रेष्ठा संस्नाता जाह्नवी शुभा ॥ ३५ ॥

न मया शङ्करो देवस्तोषितो नकुलोत्तम ।
न मयाराधिता देवी देवतैरपि सेविता ॥ ३६ ॥

प्रसङ्गेन मया पुण्या हिमालयतटे शुभे ।
दृष्टैका चण्डिका नामा गुहायां परमेश्वरी ॥ ३७ ॥

---

२८. –c) ने$_1$ द्वारयामि (→धारयामि).
३०. –c) ने$_1$ किमतीतो (→किमधीतो). ३१. –a) ने$_1$**, ने$_2$ पाथः (→पान्थः). ३२. –d) ने$_3$ °संधमः (→°संभ्रमः). ३३. –c) ने$_2$ मानवज्ञाय (→मामवज्ञाय). –d) ने$_1$ कथा (→कथां). ३५. –a) ने$_{2.3}$ °पूर्वं (→°पूर्तं). ३६. –c) ने$_1$ देवीं (→देवी). –d) ने$_1$ दैव° (→देव°). ३७. –d) ने$_2$ परमेश्वरीम् (→परमेश्वरी).

तस्या दर्शनमात्रेण पापा मे विलयं गताः ।
नष्टपापे महाभाग विचरामि महीतले ॥ ३८ ॥

संस्पृष्टं चरणाभ्यां मे चण्डिकाक्षेत्रमुत्तमम् ।
तेन मे चरणौ पुण्यौ पूतौ स्तः नकुलोत्तम ॥ ३९ ॥

धूलिभिस्ते शरीरं मे संस्पृष्टं चरणोद्भवैः ।
तेन स्वर्णमयं देहं संजातं ते न संशयः ॥ ४० ॥

इति तस्योदितं वाक्यं श्रुत्वाऽहं नृपसत्तम ।
प्रणिपत्य महाभाग प्रष्टुमारेभिरे ततः ॥ ४१ ॥

नकुल उवाच ।

कुत्र सा चण्डिका नामा देवी देवनिषेविता ।
प्रसङ्गेन कथं पान्थ पूजिता सा महेश्वरी ॥ ४२ ॥

इति पृष्ठै मया राजन् स पान्थो मामुवाच ह ।
मनसा परिपूर्णेन कौतुकाविष्टचेतसम् ॥ ४३ ॥

पान्थ उवाच ।❀

हिमालयतटे रम्ये शरयूराममध्यगः ।
नागपूरेति विख्यातः पर्वतो नकुलोत्तम ॥ ४४ ॥

तत्राहं निजवृत्यर्थं गतोऽस्मि सह बान्धवैः ।
स्वां वृत्तिं परिपूर्णाशु(?)क्रयविक्रयवृत्तिभिः ॥ ४५ ॥

ततस्तु चण्डिका नामा गुहायां संश्रुता मया ।
देवगन्धर्वदनुजैर्नागैश्च विनिषेविता ॥ ४६ ॥

---

३८. –c) ने1 °पावो (→°पापे).
३९. –d) ने2 पपातोस्तु कुलोत्तम, ने3 पूतौस्ते नकुलोत्तम.
४०. –a) ने1 कलिभिस् (→धूलिभिस्). –b) ने2 सस्पृष्टं
४२. –c) ने1 प्रासंगेन (→प्रसङ्गेन); ने1.2 पाथ (→पान्थ).
❀ ने1.2 पाथ उवाच.
४४. –b) ने1 °मध्यगं (→°मध्यगः).
४५. –a) ने1 तत्राह (→तत्राहं).

ततस्तु बान्धवान् हित्वा एकाकी नकुलोत्तम ।
फेनिलातुषवत्योश्च मध्ये देव्याः स्थलं शुभम् ।
गतोऽस्मि देवगन्धर्वैः सेवितं सुमनहोरम् ॥ ४७ ॥

तस्य प्रान्ते महापुण्या गुहा सिद्धनिषेविता ।
तत्र मध्ये महादेवी शिवेन सह चण्डिका ॥ ४८ ॥

संदृष्टा लोकपापघ्नी मया नकुलसत्तम ।
तत्र धात्रीजले स्नात्वा संपूज्य च महेश्वरम् ।
देव्या दक्षिणपार्श्वे वै पूजितं(?) देवनायकैः ॥ ४९ ॥

ततः सा चण्डिका देवी मया संपूजिता शुभा ।
गन्धपुष्पाक्षतैः शुद्धैः स्वर्णपुष्पैस्तथैव च ॥ ५० ॥

तत्र सिद्धिं प्रलभ्याशु समायातोस्मि सांप्रत्तम् ।
इत्येतत्कथितं पुण्यं यथा त्वं परिपृच्छसि ।
स्वस्ति तेऽस्तु गमिष्यामि पुरीं निषधपालिताम् ॥ ५१ ॥

नकुल उवाच ।

इत्युक्तः स ययौ पान्थो निषधं नृपसत्तम ।
अहमप्यागतोऽरण्यं द्रष्टुं राजन् गृहेश्वरम् ॥ ५२ ॥

दृष्टोऽसि त्वं मया राजन् राजराज गृहेश्वर ।
नान्यं हि तत्समं भूप प्रपश्यापि महीतले ॥ ५३ ॥

नेर्ष्यायोगान्मया प्रोक्तं न द्वेषान्न च मत्सरात् ।
इमां वाणीं प्रकथितुं कथितं नृपसत्तमः ॥ ५४ ॥

व्यास उवाच ।

नकुलस्य महावाणीं स राजा मुनिसत्तमाः ।
नकुलं पूजयित्वाशु श्रुत्वा स्वस्थमनाभवत् ॥ ५५ ॥

---

४७. –c) ने1 तुषवत्याश्च, ने2 तुग्रवत्योश्च (→तुषवत्योश्च). –d) ने1 देवाः (→देव्याः); ने1 स्थले (→स्थलं). –f) ने1 सवितुं ने2 सेवितुं (→सेवितं). ४९. –b) ने2 °सत्तमः (→सत्तम). ५०. –f) ने2 शुभम् (→शुभा). –d) ने2 स्वर्गं° (→वर्णं°) ५१. –f) ने1 नैषध° (→निषध°). ५२. –a) ने1 इत्युक्ता (→इत्युक्तः); ने1 पाथोन्, ने2 पांथो (→पार्थो). ५३. –a) ने1 ** (→राजन्). –b) ने1 °गृहेश्वरः (→गृहेश्वर). –c) ने1·3 त्वत् (→तत्). ५४. –d) ने2 °सत्तम (→°सत्तमः). ५५ –c) ने2 पूजयित्वा तु (→पूजयित्वाशु).

हित्वा देहं महाभागा नकुलोऽपि पुरातनम् ।
विमानमधिरुह्याशु समानीतं दिवौकसैः ॥ ५६ ॥

इत्युक्त्वा सत्यलोकं वै ययौ देव्याः प्रभावतः ।
इत्येतत्कथितं विप्राः चण्डिकाख्यानमुत्तमम् ॥
संपर्केणापि या देवी सिद्धिं सम्यक् प्रयच्छति ॥ ५७ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे चण्डिकामाहात्म्ये नवतितमोऽध्यायः ॥ ९० ॥**

---

**पुष्पिका**—ने₁ मा. (→मानसखण्डे).

## THE BOARD OF TRUSTEES

OF

THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A., D.Litt.; Fort, Ramnagar, Varanasi (*Chairman*).

*Trustee nominated by the Govt. of India* :—

2. Dr. Raghunath Singh, M.A., Ph.D., D.Litt., LL.B.; Varanasi.

*Trustees nominated by the Govt. of Uttar Pradesh* :—

3. Pt. Kamalapati Tripathi, New Delhi.
4. Vacant.

*Trustees nominated by His Highness the Maharaja Banaras* :—

5. Maharaj-Kumar Dr. Raghubir Sinh, M. A., D. Litt.; Raghubir Niwas, Sitamau (Malwa).
6. Pt. Giridhari Lal Mehta, Varanasi; Managing Director; Jardine Handerson Ltd.; Scindia Steam Navigation Ltd.; Trustee : Vallabhram-Saligram Trust, Calcutta.
7. Padmabhushan Pt. Baladeva Upadhyaya, M. A. Sahityacharya, Vachaspati; Formerly Director, Sampurnanand Sanskrit University; Ravindrapuri, Varanasi.

Donation made to All-India Kashiraj Trust, Fort Ramnagar, Varanasi, will qualify for exemption under Sec. 80G of the Income Tax Act, 1961 in the hands of donors.

Statement of ownership and other particulars about

पुराणम्—PURĀṆA

| | | |
|---|---|---|
| 1. | Place of Publication | ....Fort Ramnagar, Varanasi |
| 2. | Periodicity of Publication | ....Half-yearly |
| 3. | Printer's Name | ....Vinaya Shankar |
| | Nationality | ....Indian |
| | Address | ....Ratna Printing Works, B21/42 A, Kamachha, Varanasi |
| 4. | Publisher's Name | ....Yogendra Narain Thakur General Secretary, All-India Kashiraj Trust |
| | Nationality | ....Indian |
| | Address | ....All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |
| 5. | Editors' Name with Address | ....R. K. Sharma (Varanasi), Dr. R. N. Dandekar (Pune), R. S. Bhattacharya (*Editor*) (Purāṇa Deptt., Fort Ramnagar Varanasi). |
| | Nationality | ....Indian. |
| 6. | Name of the owner | ....All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |

I, Yogendra Narain Thakur, hereby declare that the particulars given above are true, to the best of my knowledge.

**Yogendra Narain Thakur**
Publisher.

Printed at the Ratna Printing Works, Kamachha, Varanasi.